831

जीवनमुक्तिविवेक

		Jivana-Mukti-Viveka.	Title
		Vidyāraṇya Muni.	Author
			Editor
			Year. Vols.
			Publisher
831			Remarks

ॐ नमः भगवते वासुदेवाय ॥ ॥ ॐ यस्य निश्वसितं वेदा यो वेदेभ्यो ऽखिलं जगत् । निर्म्ममे तम
हं वंदे विद्यातीर्थमहेश्वरं ॥१॥ वक्ष्ये विविदिषान्यासं विद्वन्यासं च भेदतः । हेतू विदेहमुक्तेश्च जीवन्मु
क्तेश्च तौ क्रमात् ॥२॥ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा प्रव्रजेदिति वेदोक्तेः स्मृतेश्च पुरा
णतः ॥३॥ वैराग्यं द्विविधा प्रोक्ता तीव्रा तीव्रतरा तीव्रतमेति च । सत्यामेव तु तीव्रायां न्यसेद्यो
गी कुटीचके ॥४॥ शक्तो बहूदके तीव्रतरायां हंससंज्ञिते । मुमुक्षुः परमे हंसे साक्षाद्विज्ञा
नसाधने ॥५॥ पुत्रदारधनादीनां नाशे तात्कालिकी मतिः । धिक् संसारमितीदृक् स्यात्
विरक्तेर्मंदता हि सा ॥६॥ अस्मिन् जन्मनि मा भूवन् पुत्रदारादयो मम । इति या सुस्थिरा बुद्धिः
सा वैराग्यस्य तीव्रता ॥७॥ पुनरावृत्तिसहितो लोको मे मास्तु कश्चन । इति तीव्रतरत्वं स्यात्
मंदेष्वासो न कश्चन ॥८॥ यात्राद्यशक्तिसां तीव्रे न्यासद्वयं न वेत् । कुटीचको बहूदकश्च
लुनावेतौ त्रिदंडिनौ ॥९॥ द्वयं तीव्रतरे ब्रह्मलोकमोक्षाविंदतः । तत्र लोके तत्त्वविद् हंसो लो

के ऽस्मिन् परहंसकः ॥१०॥ एतेषां तु समाचाराः प्रोक्ताः पाराशरस्मृतौ । व्याख्याते ऽस्माभिरत्राये
परहंसो विविच्यते ॥११॥ जिज्ञासुर्ज्ञानवांश्चेति परहंसो द्विधा मतः । प्राकृतानाम् जिज्ञासोर्न्या
सं वाजसनेयिनः ॥१२॥ प्रव्राजिनो लोकमेतमिच्छतः प्रव्रजंति हि । एतस्यार्थं तु गद्येन वक्ष्ये मं
दविबुद्धये ॥१३॥ लोको हि द्विविधः आत्मलोको ऽनात्मलोकश्चेति । तत्रानात्मलोकस्त्रै
विध्यं बृहदारण्यके तृतीयाध्याये श्रूयते । अथ त्रयो वाव लोकाः मनुष्यलोकाः मनु
ष्यलोकः पितृलोको देवलोक इति । सोयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्म
णा । कर्मणा पितृलोको विद्यया देवलोक इति तत्रैवाम्नायते । यो ह वा अस्माल्लोकात्स्वं
लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्तीति । आत्मानमेव लोकमुपासीत स य आत्मा
नमेव लोकमुपास्ते न हास्यायुः क्षीयत इति च । षष्ठाध्याये ऽपि किं प्रजया करिष्यामो येषां नोऽय
मात्मायं लोक इति । एवं च सत्येतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीत्यत्रात्मलोको विव

क्षितइतिगम्यते।सवाएषमहानजआत्मेतिप्रक्रम्यात्मनएतच्छब्देनपरामृष्टत्वात्।लोक्य
तेअनुभूयतेपरहंससमाक्रयं।यंगातिद्रान्यादिभिःसर्वैःसाधनैःसहितोनवेदितिइहजन्म
निजन्मांतरेवासम्यगनुष्ठितैर्वेदानुव+तेषमति।तथाचात्मानुभवमिच्छंतःप्रव्रजंतीतिश्रु
तेस्तात्पर्यार्थःसंपद्यते।स्मृतिश्चब्रह्मविज्ञानलाभाय+चेत्यादिनिरूपयंत्या।विविषया
संपादितत्वादयंविविदिषासंन्यासइत्युच्यते।अयंचवेदनहेतुःसंन्यासोद्विविधः।जन्मा
पादककर्मादित्यागमात्रात्मकःप्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपश्चेति
॥त्यागश्चेति।त्यागश्चतैत्तिरीयादौश्रूयते।नकर्मणानप्रजयाधनेनत्यागेनैकेअमृ
तत्वमानशुरिति।अस्मिंश्चत्यागेस्त्रियोऽप्यधिक्रियंते।अतएवमैत्रेयीवाक्यमाम्नाय
ते।येनाहंनामृतास्यांकिमहंतेनकुर्यांयदेवभगवान्वेदतदेवमेब्रूहीति।ब्रह्मचारि
गृहस्थवानप्रस्थानांकेनचिन्निमित्तेनसंन्यासाश्रमस्वीकारेप्रतिबद्धेसतिस्वाश्रमध

र्मेष्वनुष्ठीयमानेष्वपिवेदनार्थिमानसकर्मादित्यागोनविरुध्यते।श्रुतिस्मृतीतिहासपुरा
णेषुलोकेचतादृशांतत्वविदांबहूनामुपलंभात्।यस्तुदंडधारणादिरूपोवेदनहेतुःपरम
हंसाश्रमःसएवैराचार्यैर्बहुधाप्रपंचितस्तस्मान्निरूपरमते।इतिविविदिषासंन्यासः॥अ
थविद्वत्संन्यासंनिरूपयामः।सम्यगनुष्ठितैःश्रवणमनननिदिध्यासनैःपरंतत्त्वंवि
दितवद्भिःसंपाद्यमानोविद्वत्संन्यासः।तंचयाज्ञवल्क्यःसंपादयामास॥तथाहिविद्वच्छिरो
मणिर्भगवान्याज्ञवल्क्योविजिगीषुकथायांबहुविधेनतत्वनिरूपणेनाश्वलप्रभृतीन्मु
नीन्विजित्यवीतरागकथायांसंक्षेपविस्तराभ्यामनेकधाजनकंबोधयित्वामैत्रेयीं
तुबुबोधयिषुस्तस्यास्त्वरयातत्वाभिमुख्यायस्तत्त्वंसंप्रतिजज्ञे।ततस्तांबोधयित्वासंन्या
संचकार।तदुभयंमैत्रेयीब्राह्मणस्याद्यंतयोराम्नायते।अथहयाज्ञवल्क्योऽन्यद्वृत्तमुपा
करिष्यन्मैत्रेयीतिहोवाच।याज्ञवल्क्यःप्रव्रजिष्यन्वाअरेऽहमस्मात्स्थानादस्मीति।एताव

दरेखल्वमृतत्वमितिहोक्त्वायाज्ञवल्क्यःप्रवव्राजेतिच। कहोलब्राह्मणेपिविविदिषासंन्यासआम्ना
यते। एतंवैतमात्मानंविदित्वाब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथा
थभिक्षाचर्यंचरंतीति। नचैतद्वाक्यंविविदिषासंन्यासपरमितिशंकनीयं। सर्वकालवाचिनो
विदित्वेतिक्त्वाप्रत्ययस्यब्रह्मविद्वाचिनोब्राह्मणशब्दस्यचबाधप्रसंगात्। नचात्रब्राह्मणश
ब्दोजातिवाचकः वाक्यशेषेपांडित्यबाल्यमौनशब्दाभिधेयैःश्रवणमनननिदिध्यास
नैःसाध्यब्रह्मसाक्षात्कारमतिप्रेत्याथब्राह्मणइत्यभिहितत्वात्। ननुतत्रविविदिषापा
संन्यासोपेतःपांडित्यादौप्रवर्तमानोपिब्राह्मणशब्देनपरामृष्टः। तस्मात्ब्राह्मणः। पांडि
त्यंनिर्विद्यबाल्येनतिष्ठासेदितिमैवं। भाविनींवृत्तिमाश्रित्यतत्रब्राह्मणशब्दस्यप्रयुक्तत्वा
त्। अन्यथाकथंब्राह्मणइतिसाधनानुष्ठानात्पूर्वकालवाचिनमथशब्दंप्रयुंजीत। शारीर
ब्राह्मणेपिविद्वत्संन्यासाद्विविदिषासंन्यासोस्पष्टंनिर्दिष्टः। एतमेवविदित्वामुनिर्भव

श्रि
राम०
३

एतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीति। मुनित्वंमनननशीलत्वंतच्चासतिकर्त्त
व्यांतरेसंभवतीत्यर्थात्संन्यासएवाभिधीयते। एतच्चवाक्यशेषेस्पष्टीकृतं। एतद्धस्मवैतत
पूर्वेविद्वांसःप्रजांनकामयंतेकिंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइति। तेहस्मपुत्रैष
णायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंति। अयंलोकइत्यपरोक्ष्ये
णानुभूयतइत्यर्थः। तस्मात्रमुनित्वेनफलत्वेनप्रलोभ्यविविदिषासंन्याससंविधायवाक्यशेषेस
एवप्रपंचितः। अतोनसंन्यासांतरंकल्पनीयंमेवंवेदनस्यैवविविदिषासंन्यासफलत्वात्। न
चवेदनमुनित्वयोरेकत्वंशंकत्वंशंकनीयं। विदित्वामुनिर्भवतीपूर्वोत्तरकालीनयोस्तयोःसाध्य
साधनत्वप्रतीतेः। ननुवेदनस्यैवपरिपाकातिशयरूपमवस्थांतरंमुनित्वं। अतोवेदनद्वारासर्वसं
न्यासस्यैवैतत्फलमितिचेत्। बाढं। अतएवसाधनरूपात्संन्यासादस्यफलरूपमेतंसंन्यासंब्रूमः।
यथाविविदिषासंन्यासिन्यात्मतत्वज्ञानायश्रवणादीनिसंपादनीयानि। तथाविद्वत्संन्यासि

जीवन. ४

नामपि जीवन्मुक्तये मनोनाशवासनाक्षयौ संपादनीयौ॥ एतच्चोपरिष्टात्प्रपंचयिष्यामः॥ अ-
स्त्वेवं तयोः संन्यासयोरवांतरभेदे परमहंसत्वाकारेणैकीकृत्य चतुर्विधा भिक्षव इति स्मृतिषु
चतुःसंख्योक्ता॥ एवंकैक्ययोः तयोः संन्यासयोः परमहंसत्वं जाबालश्रुतावगम्यते॥ तत्र हि जनके-
न संन्यासे पृष्टे सति याज्ञवल्क्योऽधिकारिविशेषविधानेनोक्त्वा कालानुष्ठेयेन च सहितं विवि-
दिषासंन्यासमभिधाय पश्चादत्रिणा यज्ञोपवीतहीनस्य सिसेब्राह्मण्ये पृष्टे पश्चादात्मज्ञानमेव
यज्ञोपवीतमिति समादधौ॥ अतो बाह्ययज्ञोपवीताभावात्परमहंसत्वं निश्चीयते॥ तथान्त्यसं-
कंडिकायां परमहंसो नामेत्युपक्रम्य संवर्त्तकादीन्बहून्विधान्ब्रह्मविदो जीवन्मुक्तानुदाहृत्य
अव्यक्तलिंगा अव्यक्तलिंगाचारा अनुन्मत्ता उन्मत्तवदाचरंत इति विद्वत्संन्यासिनो दर्शिताः॥ तथा
त्रिदंडकमंडलुं शिक्यं विशिखां पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेतत्सर्वं भूः स्वाहेत्य-
प्सु विसृज्यात्मानमन्विच्छेदिति॥ त्रिदंडिनः सत एकदंडलक्षणं विविदिषासंन्यासं विधाय

राम. ४

तस्य स्वरूपं विद्वत्संन्यासमेवमुदाजहार॥ यथाजातरूपधरो निर्द्वन्द्वो निःपरिग्रहस्तत्त्वब्रह्मा-
र्गे सम्यक्संपन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरपात्रे-
ण लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशाला-
ग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थंडिलेष्वनिकेतवासी निःप्रयत्नो निर्म-
मः शुक्लध्यानपरायणः॥ आत्मनिष्ठः शुभाशुभकर्मनिर्मूलनाय संन्यासेन देहत्यागं करो-
ति स परमहंसो नामेति॥ तस्मादनयोरुभयोः परमहंसत्वं सिद्धं॥ समानेपि परमहंसत्वे विरु-
द्धधर्मकत्वादवांतरभेदोऽभ्युपगंतव्यः॥ विरुद्धधर्मत्वं चारुणेयोपनिषत्परमहंसोपनिषदोः
पर्यालोचनयावगम्यते॥ केन भगवन्कर्माण्यशेषतो विसृजामीति शिखायज्ञोपवीतस्वाध्या-
यगायत्रीजपाद्यशेषकर्मत्यागरूपे विविदिषासंन्यासे शिष्येणारुणिना पृष्टे गुरुः प्रजापति-
ः शिखां यज्ञोपवीतमित्यादिना सर्वत्यागमभिधाय दंडमाच्छादनं कौपीनं च परिग्रहेदिति

जीवन. ५

दंडाजिनादिस्वीकारंविधायत्रिसंध्यादिस्नानमाचरेत्संधिंसमाधावात्मन्याचरेदितिसर्वेषु
वेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेदिति।वेदनहेतूनांकर्मधर्मानिर्दिष्टत्वात्तथाविधत्वे
॥अथयोगिनांपरमहंसानांकोयंमार्गइतिविद्वत्संन्यासेनारदेनपृष्टेसनिर्गुरुर्भगवान्
स्वपुत्रमित्रकलत्रादीन्पूर्ववत्संन्यासमभिधायकौपीनंदंडमाच्छादनंचस्वशरीरोपभोगा
र्थायलोकस्योपकारार्थायचपरिग्रहेदितिदंडादिस्वीकारस्यपुनःकिंचकारमभिधायतच्च
नमुख्योस्तीतिशास्त्रीयत्वमात्रेविधक्रोयमुख्यइतिचेदयंमुख्योनदंडनशिखांनयज्ञोप
वीतंनाछादनंचरतिपरमहंसइतिदंडादिनिराकरणाहित्यस्यशास्त्रीयएतामुक्त्वानशीतंनचोष्णा
मित्यादिवाक्येनआशांबरोननमस्कारइत्यादिवाक्येनचलोकव्यवहारातीतत्वमभिधा
यांतेयल्लक्षणानिर्देकेबोधस्तत्वमस्याहमस्मीतिकनकल्पोभवतीसंतेनग्रंथेनब्रह्मानुभवमात्र
पर्यवसानमाचष्टे।अतोविरुद्धधर्मोपेतत्वादेवानयोर्महान्भेदः।स्मृतिष्वप्ययंभेदउक्तोद्विधा

राम. ५

प्रष्टव्य।संसारमेवनिःसारंदृष्ट्वासारदिदृक्षया।प्रव्रजंत्यकृतोद्वाहाःपरवैराग्यमाश्रिताः।प्र
वृत्तिलक्षणोयोगोज्ञानंसंन्यासलक्षणं।तस्माज्ज्ञानंपुरस्कृत्यसंन्यसेदितिबुद्धिमान्।इत्यादिवि
विदिषासंन्यासः।यदातुविदितंतस्मात्परंब्रह्मसनातनं।तदैकदंडंसंगृह्यसोपवीतांशिखांत्यजेत्
॥ज्ञात्वासम्यक्परंब्रह्मसर्वंत्यक्त्वापरिव्रजेदित्यादिर्विद्वत्संन्यासः।ननुकथमविद्यास्थिवकर्तृत्वादिदेह
अभिमानेनापिवेदितुमिष्टासंभवत्स्वविवक्ताप्यापादनदृष्टिनिः।पंडितंमन्यमानस्याप्यवलोक्यातेनचेतोप्रव्र
जितादृष्टेअतोविविदिषाविवक्षेकाहइयोविवक्षितइतिचेदुच्यते।यथातीव्रायांबुभुक्षायामुत्पन्नायां
भोजनादन्योनरुचतेव्यापारः।भोजनेचविलंबोनसोढुंशक्यते।तथाजन्महेतुषुकर्मस्वत्यंतमरुचि
।वेदनसाधनश्रवणादिषुत्वरामहतीसंपद्यते।तादृशीविविदिषासन्यासहेतुः।विद्वत्तायाअवधिरु
पदेशसाहस्र्यामभिहितं।देहात्मज्ञानवत्ज्ञानंदेहात्म।तादृशीविविदिषासन्यासहेतुः।विद्वत्तानबा
धकं।आत्मन्येवभवेद्यस्यसनेच्छन्नपिमुच्यतेइति।क्रतावपि।भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः

जीवन०
६

क्षीयंते चास्य कर्माणि तस्मिं दृष्टे परावर इति । परमपि हैरण्यगर्भ्यादिपदमवरं यस्मादसौ परावरः । हृदये बु
द्धौ साक्षिणस्तादात्म्याध्यासो नाम विद्यानिमित्तत्वेन यं ग्रंथिवद्दृढसंश्लेषरूपत्वाद्ग्रंथिरित्युच्यते
॥ आत्मा साक्षी कर्त्ता वा साक्षित्वेपि ब्रह्मत्वमस्ति न वा । ब्रह्मत्वेपि बुद्ध्या वेदितुं शक्यते न वा । शक्यत्वेपि ते
वेदनमात्रेण मुक्तिरस्ति न वेत्यादयः ॥ संशयाः ॥ कर्माणि प्रारब्धानि आगामिजन्मकारणानि
॥ तदेतद्ग्रंथ्यादित्रयमविद्यानिमित्तत्वादात्मदर्शनेन निवर्त्तते । स्मृतावप्ययमर्थ उपलभ्यते । यस्य नाहंकृतो भा
वो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यत इति ब्रह्मविदां मतः ॥ आत्मानात्मकं तोना
स्कारेणालादृत्माति शायादेतावित्तबुद्धिविक्षेपः संशयाः तद्भावे प्रोक्तं प्रधेत भिनवध्यते किमुतास्य कर्मणि
सर्वः । नष्टे विभिन्ने क्षीणे फलेन तत्त्वज्ञाने नवागामिजन्मतानिवारितत्वात् कर्मभाजन्मशरीरस्य जीवन्मु
क्तिहेतुत्वात् । तस्माद्वेदनाय विविदिषासन्यासः ॥ एवं जीवन्मुक्तये विद्वत्संन्यासः संपादनीयः
इति विद्वत्संन्यासः ॥ अथ केयं जीवन्मुक्तिः ॥ किं चात्र प्रमाणं कथं वा तत्सिद्धिः ॥ सिद्धौ वा किं प्रयो

सन्नासस्व
वो:॥

दि २

राम०
६

जनं इति चेदुच्यते जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बं
धो भवति । तस्य निवारणं जीवन्मुक्तिः । ननु अयं बंधः किं साक्षिणो निवार्यते किं वा चित्ता
त् । नाद्यः तत्त्वज्ञानेन तन्निवारितत्वात् । न द्वितीयः असंभवात् । यदा तु जलाद्द्रवत्वं निवार्यते । वह्नेर्वौ
ष्ण्यं । तदा चित्तात्कर्तृत्वादिनिवारणं संभवः । स्वाभाविकत्वं तु समानमस्त्वत्र । मैवं । आस्तकनिवारणा
संभवेपि अभिभवसंभवात् । यथा जलगतद्रवत्वं मृत्तिकामेलनेनाभिभूयते । वह्न्यौष्ण्यं मणिमंत्रादिना । त
था सर्वाश्चित्तवृत्तयो योगाभ्यासेनाभिभवितुं शक्याः । ननु प्रारब्धं कर्म ऊर्जितं विद्यातत्कार्यतात्तानेप्रबल
स्य तत्त्वज्ञानस्याप्रतिबंधकत्वात्स्वफलदानाय देहेंद्रियादिकमवश्यायायति । न च सुखदुःखादिभोगश्चि
त्तवृत्तिर्निर्वर्तितान्संपादयितुं शक्यते । ततः कथमभिभवः । मैवं । अभिभवसाध्याया जीवन्मुक्तेरपि सुखा
तिशयरूपत्वेन प्रारब्धफलत्वसंभवात् । तर्हि कर्मैव जीवन्मुक्तिं संपादयिष्यति । मा भूत्पुरुषप्रयत्न इ
ति चेत् । कृषिवाणिज्यादावपि समानं पर्यनुयोगः । कर्मणः स्वयमदृष्टरूपस्य दृष्टसाधनसंपत्तिमंतरेण

जीवन॰ ७

फलजननासामर्थ्यत्वाद्दृष्टैहितः कृष्यादौ पुरुषकृतप्रयत्न इति चेज्जीवन्मुक्तावपि समानसमाधानं॥
सत्यपि पुरुषस्य प्रयत्ने कृष्यादेः फलपर्यवसानं यत्र न दृश्यते तत्र प्रबलेन कर्मांतरेण प्रतिबंधः
॥कल्पनीयः॥ तच्च प्रबलं कर्म स्वानुकूलां दृष्ट्यावरूपां दृष्टसामग्रीं संपाद्यैव प्रतिबध्नाति॥ स च
प्रतिबंधो विरोधिना प्रबलतरेणोत्तेजकेन कारीरीष्ट्यादिरूपेण कर्मणाऽपनीयते॥ तद्धि कर्म स्वा
नुकूलां वृष्टिलक्षणां दृष्टसामग्रीं संपाद्यैव प्रतिबंधकमपनयति॥ किं बहुना प्रारब्धकर्मणोऽपि स्वं
तत्केन न नवता योगाभ्यासरूपस्य पुरुषप्रयत्नस्य वैयर्थ्यमिति न साऽपि चिंतयितुं अशक्यं अथवा प्रा
रब्धं कर्म यथा तत्त्वज्ञानात् बलं॥ तस्मादधिककर्मणो योगाभ्यासः प्रबलः॥ तथा च योगिनामुद्दाल
कप्रभृतीनां स्वेच्छया देहत्याग उपपद्यते॥ यद्यप्यल्पायुषामस्माकं तादृशो योन संभवति॥ तथा च
योगिनामुद्दालकप्रभृतीनां स्वेच्छया देहत्याग उपपद्यते यद्यप्यल्पायुषामस्माकं तादृशो योन संभ
वति॥ तथापि कामादिधीवृत्तिनिरोधे को नाम प्रयास॥ यदि शास्त्रीयप्रयत्नस्य प्राबल्यं नांगीक्रियते तर्हि

राम॰ ७

न्चिकित्सामारभ्य मोक्षशास्त्रपर्यंतानां सर्वेषां मानार्थक्यं प्रसज्येत॥ न हि कादाचित्कक कर्मफलविसंवा
दमात्रेण सर्वत्राप्यभावमापादयितुं शक्यं अन्यथाकाराणि लोकपराजयं दृष्ट्वा सर्वत्र योगाभ्यासादिः सेतोऽपे
क्षेत अतएवानंदबोधाचार्या आहुः॥ न ह्यजीर्णभयादाहारपरित्यागो भिक्षुकभयाद्वा स्थाल्या
नधिश्रयणं युक्तं यथा वा रोगावैरेणापरित्याग इति॥ शास्त्रीयस्य प्रयत्नस्य प्राबल्यं हि शिष्टरामसंवा
दे विस्पष्टमवगम्यते॥ सर्वमेवेह हि सदा संसारे रघुनंदन सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते॥ व
सिष्ठः॥ सर्वमेवेह हि सदा संसारे रघुनंदन॥ सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते॥ शु
च कित्स्वर्गलोकादिफलं पौरुषं॥ पुत्रकामेष्टिशिबागिज्यज्योतिष्टोमलोपासनानुष्ठा
नादिलक्षणः पुरुषप्रयत्नः॥ उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं॥ तत्रोच्छास्त्रमनर्था
य परमार्थाय शास्त्रितं॥ उच्छास्त्रं परस्त्रीगमपरद्रव्यार्थः॥ आबाल्यादलमभ्यस्तैः शास्त्रैः
रूपापहारादि॥ शास्त्रितं नित्यनैमित्तिकानुष्ठानादि॥ अनर्थो निरकः॥ अर्थः स्वर्गा

जीवन्० ६

दिषु परमो मोक्षः परमार्थः ॥ आबाल्याद् अलमभ्यस्तैः शास्त्रसत्संगमादिभिः ॥ गुणैः पुरुष
यत्नेन सोऽर्थः संपाद्यते हितः ॥ अलं संपूर्णं सम्यगित्यर्थः गुणैर्युक्तेनेत्यध्याहारः ॥ हित
श्रेयोरूप ॥ श्रीरामः ॥ उवाचः ॥ प्राक्तनवासनाजालं नियोजयति मां यथा ॥ मुने तथैव
तिष्ठामि कृपणः किं करोम्यहं ॥ वासना धर्माधर्मरूपा जीवगतसंस्कारः ॥ वसिष्ठः ॥ अ
त एव हि हे राम श्रेयः प्राप्नोति शाश्वतं ॥ स्वप्रयत्नोपनातेन पौरुषेणैव ना कायजन्य
पुरुषव्यापारोऽत्र ॥ द्विविधो वासनाव्यूहः शुभश्चैवाशुभश्च ते ॥ प्राक्तनो विद्यते रा
म द्वयोरेकतरोऽथवा ॥ किं धर्माधर्मौ उभावपि त्वां नियोजयतः ॥ उतैकतर इति विक
ल्पः ॥ एकतरपक्षेऽपि शुभो वा अशुभो वेत्यर्थसिद्धो विकल्पः ॥ वासनौघेन शुद्धेन तत्र चेदद्य
नीयसे ॥ तत्क्रमेणाशु तेनैव पदं प्राप्स्यसि शाश्वतं ॥ तत्र तेषु तत्र हि तेनैव क्रमेणाशु तत्
वासनया प्राप्यते नैवाचरणेन प्रयत्नान्तरं ॥ भावो भावना ॥ तत्र हि यत्नोऽशुभा विरोधि

राम० ६

शास्त्रीयधर्मानुष्ठानं तेन स्वयं जेतव्यो ॥ न तु शुद्धेन तत्प्रसुप्तेनैव पुरुषान्तरसुखेन खेन जेतुं श
क्यः ॥ शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् ॥ पौरुषेण प्रयत्नेन योजनीया शुभे पथि ॥ अन्यतरपक्षे
तु शुभेन मार्गस्य प्रयत्ननैरपेक्ष्येऽपि अशुभेन मार्गं शास्त्रीयप्रयत्नेन निवार्य शुभेन मेदृतस्य स्थाने
समाचरेत् ॥ अशुभेषु समाविष्टं शुभेष्वेवावतारयेत् ॥ स्वमनः पुरुषार्थेन बलेन बलिनां
वर ॥ अशुभेषु परस्त्र्यादिषु ॥ शुभेषु शास्त्रार्थदेवताध्यानादिषु पुरुषार्थेन पुरुषप्र
यत्नेन बलेन प्रयत्नेन ॥ अशुभाच्चालितं याति शुभं तस्मादपीतरत् ॥ जंतोश्चित्तं तु शिशुवत्तस्मा
च्चालयेद्बलात् ॥ यथा शिशुर्मृत्क्षणान्निवार्य फलभक्षणे योज्यते ॥ तथा चित्तमसत्संगे न
तत्र विपरीतं विषयान्निवारयितुं शक्यः ॥ समतासान्त्वनेनाशु न द्रागिति शनैः शनैः ॥ पौरु
षेण प्रयत्नेन लालयेच्चित्तबालकं ॥ चपलस्य पशोर्बद्धबंधनस्थाने प्रवेशनाय रावुपायो नव
त ॥ हरितृणादर्शनकण्डूयनादिकं कारुपारुष्यदण्डादिभिर्नैसेनंचति ॥ तत्राद्येन समहसा

जीवन॰ ९

प्रवेशयते द्वितीयेनेतस्ततो धावतश्चलनैश्वा। नुःप्रवेशसते॥ तथा शत्रुमित्रादिसमत्वं सुखबोधनं
॥ प्राणायामप्रत्याहारादिपुरुषप्रयत्नस्वोत्पत्तेर्तादि चिंतशः। सुपायो॥ तत्राद्येन मृदुयोगेन शी
घ्रं नाशयेत्॥ द्वितीयेन हठयोगेन कायेति न जालयेत्। किंतु शनैरिति मांसमासवशाद्याति य
द्वाते वासनोदये॥ तत्रामासस्य साकल्यं विदित्वा मरिमि हृदि नमृदुयोगा। मासाष्ठीघ्रमेव सवास
नोदये सति साफल्यमस्मासस्य संभवतव्यं॥ न त्वल्पकालत्वेन संभावनाशानीया संदिग्धाया
मपि तत्र शास्त्रतावैव समाहर॥ शुभायां वासनायां वृत्तानां दोषो न कश्चन॥ शुभवासनाप्यस्यास
नास्ति कर्माणि न वेति संदेहः स्यात् तदापि शुभाभ्यासे दैवमतः पथ्य॥ सहस्रजपे प्रवृत्तस्य दशशमी शांतसं
ख्यासंदिग्धा न तदापुनरपि शांतं जयेत्॥ असंख्यातासंख्यासहस्रं फलिष्यति॥ संख्याते सति व्याख्या न स
हस्रजपो दुष्यति तद्वत्॥ अत्र मुमुक्षुमनायावत्संचावाजानं तत्संपद॥ गुरुशास्त्रप्रमाणैः संस्कृतं नि
र्णीतं तावत्संचर॥ ततः परिपक्वकषायेण एतेन विज्ञानकर्तृना॥ शुभोऽभ्यासो लयात्याज्यो वासनो

राम॰ ९

धेनिरोधिना॥ यदाहितुभगमायम्से वितंतत्त्युनमनुसत्यमनोज्ञभावमुक्त्या॥ अ
भिगमयपदं यदद्वितीयं तदनुतद्ध्प्रवमुक्तमसौ धातिष्ठस्यपरेद्यः॥ तस्माद्योगाभ्या
सेन कामादिभिरवसंभवात् जीवन्मुक्तो न विवदितव्यमिति॥ ॥इति जीवन्मु
क्तिस्वरूपं॥ अथ तिस्मृतिवाक्यानि जीवन्मुक्तिसद्भावे प्रमाणानि॥ तत्र विनिश्चक
ग्व वह्न्यादिषु पगंति॥ विमुक्तश्च विमुच्यते इति जीवन्नश्च बंधनात्कामादेर्विशेषेण
मुक्तः॥ स न देहपतिभाविबंधाद्विशेषेण मुच्यते॥ वेदनात्मागपिनामसदमादि
स्वपादनेन कामादिभ्यो मुच्यत एव तथा प्युत्पन्नकामानां वेदनात्मीनां तत्र प्रय
त्नेन निरोधः॥ अनुत्पन्नतुधीवृक्ष्यनुदयमात्रादनुत्पत्तिरेव॥ ततो विशेषेणेत्सुक्त
ते॥ तथा प्रत्नने देहपाते सति कं चित्कालं भाविदेहबंधान्मुच्यते॥ अन्नत्वात्स्म
ति कामो क्षयस्त्यभिप्रेत्य विशेषेणेत्युक्तं॥ वर्द्धदारएपेपदातें॥ यदा सर्वे प्रमुच्य

जीव. १०

ऽनेकामायेस्य हृदि स्थिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥ सकस्मात्तरोपि
सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इवेति ॥ एवमन्यत्राप्युदाहार्यम्
॥ स्मृतिषु ॥ जीवन्मुक्तः स्थितप्रज्ञ भगवद्भक्त गुणातीत ब्राह्मणातीतवर्णाश्रमा
दिनामभिस्तत्र तत्र व्यवह्रियते ॥ वसिष्ठरामसंवादे ॥ तृष्णा ज्ञाने कनिष्ठानामि
त्यारभ्य सप्तकिविदद्वरिष्ठपर्यन्तं तेन जीवन्मुक्तः प्रपञ्च्यते ॥ वसिष्ठः ॥ तृष्णा ज्ञाने
कनिष्ठानामात्मज्ञानविचारिणां सा जीवन्मुक्तता देहान्मुक्त एव या ॥ ज्ञानैकनिष्ठ
त्वं लौकिकवैदिककर्मत्यागः ॥ देहेन्द्रियसदसद्भावमात्रेण मुक्तिर्वपुषस्य वि
शेषो न त्वनुभवतः द्वैतमप्रतीतेरुन्नयन्त्याऽभावात् ॥ श्रीरामः ॥ ब्रह्मन्विदेहमुक्त
स्य जीवन्मुक्तस्य जीवन्मुक्तलक्षणं ॥ ब्रूहि येन तथैवाहं यतेय शास्त्रदृष्टा ॥ व
सिष्ठः ॥ यथा स्थितमिदं यस्य व्यवहारवतोपि च ॥ अस्तं गतं स्थितं व्योम जीवन्मुक्त

राम. १०

ः स उच्यते ॥ इदं प्रतीयमानं गिरिनदीसमुद्रादिकं जगत्प्रतिपन्नं देहेन्द्रियव्यवहा
रेण सह महाप्रलये परमेश्वरेणोपसंहृतं देसत्स्वरूपोपमर्देनास्तंगतं भवति
॥ अत्र तु न तथा ॥ किं तु विद्यत एव देहेन्द्रियव्यवहारो गिरिनद्यादिकं च ॥ पर
मेश्वरेणानुपसंहृतत्वात् ॥ यथा पूर्वमवतिष्ठमानं सत् सर्वैरितरैः प्राणिभि
र्विस्पष्टमवलोक्यते ॥ जीवन्मुक्तस्य तत्स्वरूपावकधीवृत्त्यभावात्सुषुप्ताविव
सर्वमस्तंगतं भवति ॥ स्वयंप्रकाशमात्मानं विद्योम्य केवलमवशिष्यते ॥ बद्धस्य सु
षुप्तौ तात्कालिकधीवृत्त्यभावसाम्येपि भाविधीवृत्तिबीजस्य सद्भावान्न जीव
न्मुक्त उच्यते ॥ नोदेति नास्तमायाति सुखे दुःखे मुखप्रभा ॥ यथाप्राप्ते स्थितिर्य
स्य स जीवन्मुक्त उच्यते ॥ सुखप्रभा हर्षः स कुचंदनसत्कारादिसुखेपि संसा
रिणइवेनोदेति ॥ अस्तमयो दैन्यं ॥ अन्नहानिधिकारादिदुःखे प्राप्तेपि न रि

जीवन॰
११

नोभवति॥ इदानींतनस्यप्रयत्नविशेषमंतरेणप्रारब्धकर्मप्रापितंसर्वंभवाराग
तमिकामादिकंयथाप्राप्तंतस्मिन्स्थितिर्देहरक्षासमाधिदार्ढ्येनस्पंदनादि
प्रतीत्यभावात्कदाचित्तदुत्थानदशायामापातनः॥ प्रतीतावपिविवेकदार्ढ्येन
हेयोपादेयबुद्ध्यभावाद्द्वेषस्त्रिहित्वमुत्पद्यते॥ योजागर्तिसुषुप्तिस्थोयस्यजाग्र
न्नविद्यते॥ यस्यनिर्वासनोबोधःसजीवन्मुक्तउच्यते॥ चक्षुरादीप्रा
णांस्वस्वगोलकेषुवृत्त्याऽनेनोपरतत्वभावाज्जागर्त्तिमनोवृत्तिरहितत्वात्सुषुप्ति
स्थः॥ अथवैंद्रियैरर्थोपलब्धिरित्येतस्यजागरतः॥ लक्षणस्याभावाज्जाग्रन्न
विद्यतेस्वस्यापिबोधेजायमानोब्रह्मविद्याभिमानादिभिर्भोगार्थ्योपादित
कामादिरूपधीदोषोवासना॥ तद्रहितत्वेनतद्दोषाभावान्निर्वासनत्वं॥ राग
द्वेषभयादीनामनुरूपंचरन्नपि॥ योंतर्व्योमवदच्छःसजीवन्मुक्तउच्यते

राम॰
११

त्तार्थजातेषुस्वच्छवदार्यपिशीतलः॥ परार्थेष्विवपूर्णात्मासजीवन्मुक्तउच्यते॥
परस्पदेविवादोक्तवादोस्त्वंयगत्वातपीत्यैतदीयकार्येषुव्यवहरन्नपिलाभा
लाभयोर्हर्षविषादरूपंबुद्धिसंतापंनप्राप्नोति॥ यथा॥ एवमयमुक्तः॥ स्वका
र्येष्वपिशीतलः नकेवलंसंतापाभावाच्छीतलत्वंकिंतुपूर्णस्वरूपानुसंधानादपि
॥जीवन्मुक्तपदंत्यक्त्वास्वदेहेकालसात्कृतेविशत्यदेहमुक्तत्वंपवनोस्पं
दतामिव॥ यथावायुःकदाचिच्चलत्वंत्यक्त्वानिश्चलरूपेण॥ वतिष्ठते॥ तथामु
क्तात्मापिवपुधिकृतेसंसारसाम्यमयोर्हर्षविद्यादौनन्दाम्यतिनचतत्परित्यागी
लिंगदेहस्यात्रैवलीनत्वान्नसदाच्चोजेगद्विधुरविद्यामायोपाधिर्नप्राप्नोते
श्वरः॥ असद्वाच्योनापिभूतभौतिकः॥ नहृदयस्यइत्युक्तप्रमायातीतः॥ नचे
त्युक्तास्थूलसूक्ष्मीपस्यत्वंनिषिध्यते॥ अहंनवेति॥ नसमष्टिश्चेनेतरह

तिष्ठतु। व्यवहारयोग्यो विकल्पः कोपिनास्त्यस्यातः। स्तिमितगंभीरंनतेजो
नतमस्ततः। अनाख्यमनभिव्यक्तंसत्किंचिदवशिष्यते। एवंविधयाविदेहमुक्त
तारूपत्वोक्तेर्जीवन्मुक्तावपियावद्यावन्निर्विकल्पकतातावत्तावदुत्त
मत्वंद्रष्टव्यं। भगवतास्वयंद्वितीयाध्यायेस्थितप्रज्ञःपठ्यते। अर्जुनउवाच
स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव। स्थितधीः। किंप्रभाषेतकिमासीतव्र
जेतकिं। प्रज्ञानतत्वज्ञानंतत्द्विविधंस्थितमस्थितंचेति। यथाजारेनुरक्तायाना
र्याःसर्वेष्वपिव्यवहारेषुबुद्धिर्जारमेवध्यायति। प्रमाणप्रतीतान्यपिक्रिय
माणानिसंघुरावविस्मर्यंते। तथापरवैराग्योपेतस्ययोगाभ्यासपाटवेनात्यं
तवशीकृतचित्तस्यतत्वज्ञानेनतद्बुद्धिर्जारमिवनैरंतर्येणतत्वं
ध्यायति। तदिदंस्थितंज्ञानं। उक्तगुणरहितस्यकेनापिपुण्यविशेषेणाक

॥रागानुरूपंभोजनादिप्रवृत्तिः। द्वेषानुरूपंबौद्धकापालिकादिभ्योविमुखत्वं॥
भयानुरूपंसर्पव्याघ्रादिभ्योपसर्पणं। आदिशब्देनमात्सर्याद्यनुरूपमितरयो
गिभ्यः। आधिक्येनसमाध्याद्यनुष्ठानं। सत्यपिव्युत्थानदशायामीदृशाआ
चरणेपूर्वाभ्यासेनप्रापितेनवाविश्रांतचित्तस्यलेपरहितत्वादंतः। स्वच्छत्वं
यथाव्योम्निधूममेघादिषुक्वेपिनिर्लेपस्वभावत्वात्अत्यच्छत्वंतद्वत्। यस्यना
हंकृतोभावोबुद्धिर्यस्यनालिप्यते। कुर्वतोऽकुर्वतोवापिसजीवन्मुक्तउच्य
ते। पूर्वोक्तद्विविधसन्न्यासप्रशस्तावैयाख्यानं। लोकेबद्धस्यपुरुषस्यत्रास्तीयंक
र्मकुर्वतोऽहंकर्त्तेतिचिदात्माहंकृतोभावादिस्वर्गप्राप्स्यामीतिहर्षेणबुद्धि
र्लिप्यते। अकुर्वतस्तुसकृवानस्मीतिअहंकृतत्वंस्वर्गालाभविषादलेपः। ए
वंप्राप्तिनिषिद्धकर्म्माणिलौकिककर्म्माणिचयथायोग्यंभवेयोजनीयं। जीवन्मुक्तस्य

जीवन० १३

तु तादात्म्याध्यासाभावाद्धर्षाद्यभावाच्च न दोषद्वयं ॥ यस्मान्नोद्विजते लोको लोकान्नो
द्विजते च यः ॥ हर्षामर्षयोर्मुक्तः स जीवन्मुक्त उच्यते ॥ अधिक्षेपताडनादावपकर्तृत्वा
देतस्माद्यो लोको नोद्विजते ॥ अत एवैतस्मिन् लोकस्याधिक्षेपाद्यप्रवृत्तिः कस्माद्व
द्वेष्यतत्प्रवृत्तावपि एतच्चित्ते तादृग्विकल्पानुदयात्स्वयमपि नोद्विजते ॥ शांत
संसारकलनः कलावानपि निःकलः यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते
॥ व्याप्तिमिन्नमानावमानादिविकल्पाः संसारकलनाः ॥ चतुःषष्टिविद्याः कलाः
तज्ज्ञोऽपि तदभिमानव्यवहारयोरभावान्निःकलत्वं ॥ चित्तस्य स्वरूपेणास
त्त्वेऽपि सत्त्वे ॥ तदयान्निश्चित्तत्वं चित्तेति पाकेवासनावत्त्वादात्मध्यानवृत्तिसत्त्वा
वेपि लौकिकवत्तस्याभावान्निश्चित्तत्वं ॥ यः समस्तार्थजातेषु व्यवहार्यपि शीतलः
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते ॥ परस्येव विवाहान्निश्चिंतत्वं ॥ यः सम

राम० १३

दाचिदुत्पन्नेपि तत्त्वज्ञाने गृहकर्म्मवित्तैर्वैतत्त्वविस्मयति ॥ तदिदस्मिन् इति भ्रांति
तदेवाभिप्रेत्य वसिष्ठ आह ॥ परव्यसनिनी नारी व्यग्रापि गृहकर्मणि ॥ तदेवास्वादयत्य
न्तः ॥ परसंगरसायनं एवं तत्त्वे परे शुद्धे धीरो विश्रांतमानसः ॥ तदेवास्वादय
त्यंतर्बहिर्व्यवहरन्नपि तत्रास्थित प्रतः कालभेदात् द्विविधः ॥ सद्यः कर्म प्राप्ति
तश्च ॥ तयोरुभयोर्लक्षणं पूर्वोत्तरावस्थाभेदेन पृच्छति समाधिस्थस्य व्यवहारे तत्र ॥
तस्य का भाषा ॥ कीदृशोऽसौ लक्षणवाचकैः शब्दैरयं भाष्यते ॥ व्युत्थितोऽपि तत्त्वा
तः कीदृग्वा व्यवहारं करोति तस्योपवेशनामतेमंदेभ्यो [illegible] भ्रमणं तत्र निदिष्य
श्रीभगवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् [illegible] ॥ आत्मन्ये
वात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ कामास्त्रिविधाः बाह्या आंतरा वासना
मात्ररूपाश्चेति ॥ उपार्जितमोदयो बाह्याः आगामोदकारयः आंतराः ॥ पश्चि

गततृष्णादिवदाप्राक्तनः प्रतीतावासनारूपाश्चेति । समाहितोन्तेषधीवृत्तिसंक्षया
त्सर्वान्परित्यजति । अपि चास्य सुखप्रसादः स्थिरोऽस्य संतोषः । स च न कामेषु किंतु
त्मन्येव । कामानामप्रकृत्वात् । बुद्धेः परमानंदरूपेणात्मतया भिसुखत्वाच्चा दु
वात्रसंप्रज्ञातसमा । धाविवात्मानंदो मनोवृत्त्याभिव्यज्यते । [illegible]मपि नोल्लिख्यते । स्वात
पेणात्मना । संतोषस्तु न वृत्तिरूपः किंतु तत्संस्काररूपः । एवंविधलक्षण उच्यते
ष्टः समाहितोऽनाष्यते । दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । [illegible]
क्रोधः स्थितधीर्मुनिरुच्यते । दुःखं रोगादिनिमित्तजन्यं रजो[illegible]स्वरूपेण स
संतापात्मिका प्रातिकूल्यात्मिका वृत्तिः तादृशे दुःखे प्राप्ते सति [illegible] पश्चा
हं मृदुरात्मानमित्यनुतापात्मिका तमोगुणवृत्तिर्विकारत्वेन मनो[illegible]तेन
न वृत्तिरुद्वेगः । यद्यप्ययं विवेकदृढानामपि तथापि पूर्वस्मिन्जन्मनि[illegible]त्वं । यः सम

सापवृत्तिप्रतिबंधकत्वात्सप्रयोजनो भवति । इदानीं तु निःप्रयोजन इति भ्रांति
त्वं द्रष्टव्यं । सुखं राज्यपुत्रलाभादिनिमित्तजन्या सात्विकी प्रीतिरूपानुकूलात्मि
का वृत्तिः । तस्मिन्सुखे सत्यागामिनस्तादृशस्य सुखकारणपुण्यमनुष्ठ
यस्येवं तदपेक्षात्मिका तामसी वृत्तिः स्पृहा । तत्र च सुखदुःखयोः प्रारब्धकर्मप्रापि
तत्वाद्धर्मसातत्वविनाश्यवृत्तिसंभवाच्च तदुभयमुपपद्यते । उद्वेगस्पृहादेस्तु
न विवेकिनः संभवतः । तथा रागभयक्रोधास्तु तामसत्वेन कर्मप्रापितत्वा
भावान्नास्य विद्यंते । एवं लक्षणः स्थिरधीः स्वानुभवति भगवानेतन्निष्प
ष्ट्याप्यर्थमनुद्वेगनिःस्पृहत्वादिका वाचो भाषेतेत्यर्थः । यः सर्वत्रानभि
स्नेहस्तत्तत्प्राप्य शुभाशुभं । नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता
यस्मिन्नस्य स्वरीये हानिवृद्धी स्वस्मिन्नारोप्यते तादृशोऽनभिषंगविषयः

तामसवृत्तिविशेषः स्नेहः ॥ सुखहेतुः स्वकलत्रादिषु भवत्सु गुणकथनादिप्र
वृत्तिकाधीवृत्तिरभिनंदः ॥ अत्र गुणकथनस्य परप्ररोचनार्थत्वाभावेन व्यर्थ
त्वान्न हेतुरभिनंदस्तामसः ॥ असूयोत्पादनेन दुःखहेतुः परकीयविद्यादिरेन
प्रत्यक्षभविषयः तन्निंदाप्रवृत्तिकाधीवृत्तिर्द्वेषः ॥ सोपि तामसः निंदानिवार
णपूर्विताभावेन व्यर्थत्वात् एते तामसा धर्माः कथं विवेकिनि संभवेयुः ॥
यदा संहरते चायं कूर्मोंगानीव सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा
प्रतिष्ठिता ॥ श्रुतिस्थितस्य समस्तनामसर्वत्सभावः श्लोकाभ्यामभिहितः स
मादितस्य तु वर्त्मय एव न संति कुतस्तामसत्वशंकेत्यभिप्रायः ॥ विषयाविनि
वर्त्तंते निराहारस्य देहिनः ॥ रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते ॥ प्रारब्धकर्मसु
खदुःखहेतून् कांश्चिद्विषयान् प्रत्यपाद्याधिकारादिरूपान् स्वयमेन ह्यायात्
॥

त्यर्थः ॥ अयं च गर्हेत्वादीन पुरुषो योगद्वारेण तत्तद्वांछोदयात्तद्वदिंद्रियसं
रोधलक्षणेन समाधिनैव वर्त्तते ॥ तस्य यथा ॥ गृहादयस्तु समाधिमंतरेण
वर्त्तंते आहरणमाहारश्च योगः ॥ निरुद्धयोगस्य गृहादिविषया निवर्त्तंते
रसस्तु न निवर्त्तते ॥ रसो मानसी तृष्णा सापि परमानंदरूपस्य ब्रह्मणो
दर्शनं स्वल्पानंदहेतुभ्यो निवर्त्तते ॥ किं प्रजया करिष्यामो येषां नो
यमात्मायं लोक इति श्रुतेः ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥
इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ तानि सर्वाणि संयम्य युक्त
आसीत मत्परः ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ उपायतया
तु संधानं प्रयत्नं कुर्वतोपि कादाचित्कप्रमादपरिहाराय समाधिप्र
वृत्तेरादौ तत्किमासीतेति प्रश्नस्योत्तरं ॥ ध्यायतो विषयान् पुंसः ॥ संग

जीवन०
१५

जायते॥ संगात्संजायते कामः॥ कामात्क्रोधोभिजायते॥ क्रोधाद्भवति सं
मोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥
माध्यम्भासेत्प्रमादप्रकारउपलक्ष्यस्तः॥ संगोध्येयविषयसंनिधिः
विषयाः पराङ्मुखत्वं॥ स्मृतिविभ्रमः तत्त्वानुसंधानाभावः॥ बुद्धि
विपरीतभावनोपचयदोषेण प्रतिबद्धस्य मोक्षप्रदत्वे सामर्थ्याभि
रागद्वेषविमुक्तैस्तु विषयानिंद्रियैश्चरन्॥ आत्मवश्यैर्विधेयात्मा प्रसा
दमधिगच्छति॥ विधेयोत्मत्ववशीकृतमनस्तं॥ प्रसादो नैर्मल्यं बुधरा
तं॥ समाधभ्यासयुक्तस्य वासनाबलात् छुत्थानदशायामिंद्रियैर्वि
षयानपि प्रसादं सम्यक् प्राप्नोति॥ नदेतत्किं व्रजेतेति प्रश्नस्योत्तरं॥ उ
क्तमेनापि कृतनायंघ्येत स्थितप्रज्ञः प्रपंचितः॥ ननु प्रज्ञायाः स्थितस्

राम०
१६

त्वज्ञिभ्यां प्रागपि साधनत्वेन लक्षणत्वेन राद्धित्यमपेक्षितं॥ वाढं॥ तथाप्यस्तिवि
शेषः सर्वश्रेयोमार्गकारैरदर्शिति॥ विद्यास्थितये प्राकृये साधनभूताः प्रय
त्नैस्तिः पाधाः लक्षणभूतास्तु पुनः स्वभावतस्तो स्थिताः स्थितप्रज्ञे॥ जीव
न्मुक्तेमिति मामवस्थावदंति स्थितात्मसंबोधा॥ बाधितनेदमिति भानं
बाधितात्माऽवबोधसामर्थ्यादिति॥ भगवद्भक्तो वाद्दशोध्याये भगवता
वर्णितः॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च॥ निर्ममो निरहंकारः सम
दुःखसुखः क्षमी॥ संतुष्टः संततं योगी यतात्मा दृढनिश्चयः मय्यर्पितम
नोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ दृष्वरार्पितमनस्त्वेन समाहितस्यात्मा
नुसंधानाभावाद्युस्थितस्य सत्यमुदासीनानुसंधाने हर्षविषादाभा
वाच्च सुखदुःखसाम्यं॥ एवं वक्ष्यमाणेपि द्वेषष्वं यस्मान्नोद्विजते ला

जीवन० १९

कोलोकान्नोद्विजते च यः ॥ हर्षमर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ अनपेक्षः शु-
चिर्दक्ष उदासीनो गतव्यथः ॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ यो न
हृष्यति न द्वेष्टि न शोचति न कांक्षति ॥ शुभाशुभपरित्यागी भक्तिमान्यः
स मे प्रियः ॥ समः शत्रौ च मित्रे च तथा मानापमानयोः ॥ शीतोष्णसुखदुः-
खेषु समः संगविवर्जितः ॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केन चित् ॥ अ-
निकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ अत्रापि सर्ववद्वेषो वा-
र्त्तिककारैर्दर्शित ॥ उत्पन्नात्मप्रबोधस्य त्वद्वेष्टृत्वादयो गुणाः ॥ अयत्न-
तो भवंत्यस्य न तु साधनरूपिणः ॥ गुणातीतश्च चतुर्दशाध्याये वर्णितः ॥ अर्जु-
न उवाच ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो ॥ किमाचारः कथं
चैतांस्त्रीन्गुणानतिवर्त्तते ॥ त्रयो गुणाः सत्त्व रजः तमांसि तेषां परिणा-

राम० १९

मविशेषास्सर्वसंसारः प्रवर्त्तते ॥ ततो गुणातीतत्वं अयं साक्षिजीवन्मुक्-
त्वमिति यावत् ॥ लिंगानि परेषामेतदीयगुणातीतत्वबोधकानि ॥ आचार-
स्तदीयमनःसंचारप्रकारः कथमिति साधनप्रश्नः ॥ श्रीभगवानुवाच ॥ प्र-
काशं च प्रवृत्तिं च मोहमेव च पांडव ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्ष-
ति ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्त्तंत इत्येवं योऽवतिष्ठ-
ति नेंगते ॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियो धीरस्-
तुल्यनिंदात्मसंस्तुतिः ॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्ष-
योः ॥ सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥ मां च योऽव्यभिचारेण भ-
क्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ प्रकाश-
प्रवृत्तिमोहाः सत्त्वरजस्तमोगुणाः ते च जाग्रत्स्वप्नयोः प्रवर्त्तंते ॥ ते सु-

षुप्तिसमाधिमूर्च्छाचिंतनावस्थासु निवर्त्तंते॥ प्रवृत्तिस्तु द्विधा॥ अनुकूला प्रति
कूला चेति॥ तत्र मूढो जागरणे प्रतिकूलप्रवृत्तिं द्वेष्टि॥ अनुकूलां प्रवृत्तिं कां
क्षति॥ गुणातीतस्तु अनुकूलप्रतिकूलोऽभ्यासात्साम्यावात् द्वेष्टि न कांक्षति
॥ यथा द्वयोः कलहं कुर्वतोरवलोकिता कश्चित्तटस्थः स्वयं केवल
मुदास्ते न तु जयपराजयपराजयाभ्यामितस्ततश्चाल्यते॥ तथा गुणातीतो
विवेकी स्वयमुदास्ते॥ गुणा गुणेषु वर्त्तंते न त्वहमिति विवेकादौदासीन्यं॥
अहमेव करोमीत्यध्यासोऽविचलनं न चास्य तदस्ति॥ तदिदं किमाचार इ
ति प्रश्नस्योत्तरं॥ समदुःखसुखादिनिलिंगानि अत्यभिचारि न किंसहि
तत्त्वज्ञानध्यानाभ्यासेन परमात्मनो वाग्गुणात्ययसाधनः॥ ब्राह्मणो व्या
सादिभिर्वर्णितेः॥ अनुत्तरीयवसनमनुपस्तीर्णशायिनं॥ बाहूपधानी

यं शांतं तं देवा ब्राह्मणं विदुः॥ ब्राह्मणो ज्ञातो ब्रह्मविदा वाच्योऽथ ब्राह्मण इति श्रु
तिवर्णितः॥ ब्रह्मविदश्चविविदसंन्यासाधिकारात् यथाजातरूपधरो नाच्छा
दनं चरति इति परमहंस इत्यादिपरिग्रहराहित्यस्य मुख्यत्वाभिधानात्
अनुत्तरीयादिकं तस्य युक्तं॥ येन केनचिदाच्छन्नो येन केनचिदाशितः॥
यत्रक्वचनशायी स्यात्तं देवा ब्राह्मणं विदुः॥ देहनिर्वाहायाशनाच्छाद
नशयनस्थानापेक्षायामपि अज्ञानादिगतो गुणदोषोऽनाविष्यते॥ उ
दरपूरणपुष्ट्यादिरूपस्य निर्वाहस्य समत्वात्॥ नियमो जनस्य गुणदोषा
विचारस्य चित्तदोषात्वात्॥ अतएव पद्यते॥ किंवर्णितेन बहुना लक्षणं
गुणदोषयोः गुणदोषदृष्टिर्दोषो गुणस्तूभयवर्जितः॥ कंथा कौपीन
वासास्तु दंडधृग्ध्यानतत्परः एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः॥ ब्र

लोमहर्षणादिनाप्रणयमनुजिघृक्षयाउत्तमलज्जायनेनश्रवणमुत्वा दर्शयितुं दंडकौ
पिनादिलिंगंधारयेत् कौपीनदंडमाच्छादनंचस्वशरीरोपभोगार्थमपिलोकस्यो
पकारार्थमपिचपरिग्रहेदितिश्रुतेः॥ अनुजिघृक्षयापितदीयगृहत्रस्तापि
वार्त्तांनकुर्यात्॥ किंतुध्यानपरोभवेत्॥ तमेवैकंविजानथआत्मानमन्यावा
चोविमुंचथेतिश्रुतेः॥ तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः नानुध्याया
त्बहूञ्छब्दान्वाचोविग्लापनंहितदितिश्रुतेः अनुजिघृक्षयापितदीयगृहस्थ
कृत्यादिवार्त्तांनकुर्यात्॥ किंतुध्यानपरोभवेत्॥ तमेवैकंविजानथआत्म
मानमन्यावाचोविमुंचथेतिश्रुतेः॥ तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्म
णः नानुध्यायात्बहूञ्छब्दान्वाचोविग्लापनंहितदितिश्रुते॥ ब्रह्मोपदे
तिश्रुतेः॥ तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥ नानुध्यायात्बहूञ्छ

ब्दान्वाचोविग्लापनंहितदितिश्रुतेः॥ ब्रह्मोपदेशरूपमावाक्नभवतीतिनध्या
नविरोधी॥ तच्चध्यानमेकाकित्वेनानिर्विघ्नंसंभवति॥ अतएवस्मृत्यंतरेअभि
हितं॥ एकोभिक्षुर्यथोक्तस्तुद्वौचैवमिथुनंस्मृतं त्रयोग्रामःसमाख्यातऊर्ध्वं
तुनगरायते॥ नगरंनहिकर्त्तव्यंग्रामोवामिथुनंतथा॥ राजादिवार्त्तांतेषु
स्याद्भिक्षावार्त्तांपरस्परमिति॥ निराशिषमनारंभंनिर्नमस्कारमस्तुति
॥ अक्षीणंक्षीणकर्माणंतंदेवाब्राह्मणंविदुः॥ विनिष्टैःसंसारिभिःप्रणम
नापुरुषाणमाशीर्वादःप्रयुज्यते॥ यस्यप्रदयेक्षितंतप्रतितदभिवाद्धृत्य
र्थनमाशीः॥ तथाचपुरुषाणांभिन्नरुचित्वात्कस्यचित्वाभिमताभा
षणेव्यग्रचित्तस्यलोकवासनावर्द्धते॥ साचज्ञानविरोधिनी॥ तथास्मृत्यं
तरेचलोकवासनयाजंतोःशास्त्रवासनयापिच॥ देहवासनयाज्ञानंय

यावन्नैव जायते ॥ एतच्चारंभनमस्कारादिषु द्रष्टव्यं आरंभः ॥ स्वार्थपरोपकारार्थं
व्यापारः हन्त्वेतत्संपादनप्रयत्नः ॥ यत्नवता च द्विविधारंभो मुमुक्षुणा त्याज्यो ॥ न च लौकि
कादिभावेण मनां तत्यागखेदः शंकनीयः ॥ लोकवासनाखेदयोरुभयोः परिहा
राय निखिलाशीर्वादप्रतिनिधित्वेन नारायणशब्दप्रयोगात् ॥ आरंभस्कस
र्वोपि दुष्ट एव ॥ तथा च स्मृतिः ॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवावृता इति
॥ नमस्कारोपि विविदिषासंन्यासिनोभिहितः ॥ यो भवेत्पूर्वसंन्यासी तुल्यरूपस्त्व
धर्मतो यदि ॥ तस्मै प्रणामः कर्त्तव्यो नेतराय कदाचनेति ॥ तत्र पूर्वत्वे धर्म
तत्तुल्यत्वविचारे चित्तं विक्षिप्यते ॥ अत एव नमस्कारमात्रेण हवः कलहा
यमानात् उपलभ्यंते तन्निमित्तं वार्त्तिककारैर्दर्शितं ॥ प्रमादिनो बहिःचित्ताः पि
शुनाः कलहोत्सुकाः ॥ संन्यासिनोपि दृश्यंते दैवसंदूषिताशयाः ॥ मुक्तस्य नम

स्काराभावो भगवत्पादैर्दर्शितः नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितो द्वये ॥
प्रणमेत्कं तदात्मज्ञो न कार्यं कर्मणा तदेति ॥ चित्तकालुष्यहेतोर्नमस्कारस्य प्र
तिषेधे सर्वसाम्यबुद्ध्या प्रसादहेतुर्नमस्कारोऽभ्युपेयते ॥ तथा च स्मृतिः ॥ ईश्व
रो जीवकलया प्रविष्टो भगवानिति प्रणमेद्दंडवद्भूमावाश्वचांडालगोखर
मिति स्तुतिर्नमस्तुष्य विषया प्रतिषिध्यते न त्वीश्वरविषयः ॥ आदरेणापथ्या
स्तोति धनवंतं यथेश्वरं ॥ तथा चेद्विश्वकर्तारं को न मुच्येत बंधनात् ॥ अश्री
पत्वमदीनत्वं अत एव स्मृतिः ॥ अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचि
त् ॥ लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितमिति ॥ क्षीणकर्मत्वात् ॥ विधिनिषे
धातीतत्वं ॥ निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेध इति स्मरणात्
॥ एतदेवाभिप्रेत्य भगवताप्युक्तं ॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जु

जीवन. २१

न निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् इति। नारदोऽपि। स्मर्तव्यः सततं
विष्णुर्विस्मर्तव्यो न जातुचित्॥ सर्वे विधिनिषेधाः॥ स्युरेतयोरेव किंकरा इति
॥ अहेरिव गणाद्भीतः॥ सन्मानान्नरकादिव॥ कुणपादिव यः स्त्रीभ्यस्तं दे
वा ब्राह्मणं विदुः॥ राजादिवार्त्तां तेषां स्यादित्युक्त्वा स्त्रीसम्पर्कवद्गुणघ्नीतिरूप
पद्यते। सन्मानस्यासक्तिकारणत्वेन रूपार्थविध्वंसकत्वान्नरकवद्धेयत्वं
॥ अत एव स्मृतिः॥ असन्मानात्तपोवृद्धिः सन्मानात्तु तपःक्षयः॥ अर्चितः पू
जितो विप्रो दुग्धा गौरिव गच्छति॥ एतदेवाभिप्रेत्यावमान आदेयतयास्मर्य
ते॥ तथा चरेत वै योगी सतां धर्ममनुस्मरन्। जना यथावमन्येरन् गच्छेयुर्नैव सं
गतमिति। स्त्रीशुद्धिविधौ दोषः॥ प्रतिषिद्धत्वमनुष्ठितत्वं चेति। तत्र प्रतिषि
द्धत्वमात्रं कदाचित्तु आरब्धवशाद्धोद्यते॥ तदेतदभिप्रेत्याह स्मृतिः॥ मात्रा

॥

स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्॥ बलवानिन्द्रियग्रामो विद्वांसमपि क
र्षति॥ तथा च स्मृतिभ्यः जुगुप्सा वर्णिता॥ स्त्रीणामवाच्यदेशस्य क्लिन्न
नाडीव्रणस्य च॥ अभेदेऽपि मनोभेदाज्जनः प्रायेण वंच्यते॥ चर्मखंडं द्वि
धा भिन्नमपानोद्गारधूपितं॥ ये रमंति नमस्तेभ्यः साहसं किमतः परमि
ति॥ अतः प्रतिषेधानुष्ठानयोर्विविवक्षयाक्रमेणप्रदर्शितौ तोऽस्त्राभिहितः॥ येन पू
र्णमिवाकाशं भवत्येकेन सर्वदा॥ शून्यं यस्य जनाकीर्णं तं देवा ब्राह्मणं वि
दुः॥ संसारिणामेकाकित्वे नावस्थानं भयालस्यादिहेतुत्वाद्दुर्ज्ञेयं। जनसंम
र्दस्तु तथाविधत्वादसुपेय योगिनस्तस्य तु तद्विपरीतत्वो॥ एकाकित्वे समस्तप्र
मध्यानाद्वैतवृत्तौ परिपूर्णत्वपरमानंदात्मना सर्वमाकाशं पूर्णमिव भा
सते॥ अतो भयालस्यशोकमोहादयो न भवंति॥ तत्र को मोहः कः शोक ए

राम. २१

जीव॰
२२

कृत्वमनुपश्यतइतिश्रुतेः॥जनाकीर्णस्थानंराजवाद्यादिष्वानविरोधित्वादा
नंदात्मप्रतीतिरहितंतत्तुन्मामिवचित्रकेतनायुतिः॥जगतोमिथ्यात्वादात्मन
ःपूर्णत्वाच्चेत्यर्थः॥अतिवर्णाश्रमीस्तत्संहितायांमुक्तिखंडेपंचमाध्याये
परमेश्वरेणवर्णितः॥ब्रह्मचारीगृहस्थोवानप्रस्थोयभिक्षुकः॥अतिवर्णा
श्रमीतेपिक्रमाच्छ्रेष्ठाविचक्षणाः॥अतिवर्णाश्रमीप्रोक्तोगुरुः॥सर्वाधिका
रिणांतकस्यापिभवेच्छिष्योयथाहंपुरुषोत्तमअतिवर्णाश्रमीसाक्षाद्गु
रूणांगुरुरुच्यते॥तत्समोनाधिकश्चास्मिँल्लोकेस्त्येवनसंशयः॥यःशारी
रेन्द्रियादिभ्योविभिन्नंसर्वसाक्षिणंपारमार्थिकविज्ञानंसुखात्मानंस्वय
प्रभुं॥परंतत्त्वंविजानातिसोतिवर्णाश्रमीभवेत्॥योवेदांतमहावाक्यश्रवणे
नैवकेशव॥आत्मानमीश्वरंवेदसोतिवर्णाश्रमीभवेत्॥योवस्थात्रयनिर्मुक्ति

राम॰
२२

मवस्थासाक्षिणंसदा॥महादेवंविजानातिसोतिवर्णाश्रमीभवेत्॥वर्णाश्रमादय
योदेहेमाययापरिकल्पिताः॥नात्मनोबोधरूपस्यममतेसंतिसर्वदा॥इतियोवेदवेदां
तैःसोतिवर्णाश्रमीभवेत्॥आदित्यसन्निधौलोकश्चेष्टतेसवमेवतुदयःकल्पिताःमाय
यातद्वत्जन्ममय्येवसर्वदा॥इतियोवेदवेदांतैःसोतिवर्णाश्रमीभवेत्॥सुक्तिकायांयथ
थातरंकल्पितंमाययातथा॥महदादिजगन्मायामयंमय्येवकल्पितं॥इतियोवेदवेदां
तैःसोतिवर्णाश्रमीभवेत्॥चंडालदेहेपश्वादिशरीरेब्रह्मविग्रहे॥अन्येषुतारतम्ये
नस्थितेषुपुरुषोत्तम॥व्योमवत्सर्वदाव्याप्तःसर्वबंधविवर्जितः॥एकरूपोमहा
देवः॥स्थितःसोहंपरामृतः॥इतियोवेदवेदांतैःसोतिवर्णाश्रमीभवेत्॥विनष्टदिग्भ्र
मस्यापियथापूर्ववद्विभातिदिक्॥तथाविज्ञानविध्वस्तंजगन्मेभातितन्नहि॥इतियो
वेदांतैःसोतिवर्णाश्रमीभवेत्॥यथास्वप्नप्रपंचोयंमयिमायाविजृंभितः॥तथा
जाग्रत्प्रपंचोपिममायाविजृंभितः॥इतियोवेदवेदांतैःसोतिवर्णाश्रमीभवेत्॥

मुः॥ स्ववर्णाश्रमाचारो गलितः स्वात्मदर्शनात्॥ सवर्णानाश्रमान्सर्वानतीत्य स्वात्मनि
स्थितः॥ यस्सत्यक्त्वाश्रमान्वर्णानात्मन्येव स्थितः पुमान्॥ सोतिवर्णाश्रमी प्रोक्तः
सर्ववेदार्थविद्भिः॥ न देहो नेंद्रियं प्राणो न मनो बुद्ध्यहंकृती॥ न चित्तं नैव सामाया
न च व्योमादिकं जगत्॥ न कर्त्ता न च भोक्ता च न भोक्तापयिता तथा॥ केवलं चित्सदानंद
ब्रह्मैवाहमायाप्यर्थतः॥ जलस्याचलनादेव चंचलत्वं यथा रवेः॥ तथाहंकारसंसा
रेव संसार आत्मनः॥ तस्मादन्यगता वर्णा आश्रमा अपि केनाव॥ आत्मविज्ञानि
नानिष्ठामीदृशीं मंबुजेक्षण॥ मायया मोहिता मर्त्या नैव जानंति सर्वदा॥ न मांसचक्षु
षा निष्ठा ब्रह्मविज्ञानिनामियं द्रष्टुं शक्या स्वतः सिद्धा विदुषां सैव केशव॥ यत्र सुप्ता
जना नित्यं प्रबुद्धस्तत्र संयमी॥ प्रबुद्धा यत्र ते विद्वान्सुषुप्तत्वं व्रजेत्केशव + आत्मन्यारो
पिता एव भ्रान्त्या ते नात्मवेदिनः॥ न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना॥ आत्मवि
ज्ञानिनां नास्ति तथा चान्यज्जनार्दन॥ + एवमात्मानमद्वंद्वं निराकारं निरंजनं॥ नित्य

शुद्धं निराभासं संविन्मात्रं परामृतं॥ यो विजानाति वेदांतैः॥ स्वानुभूत्या च निश्चितं
सोतिवर्णाश्रमी प्रोक्तः स एव गुरुरुत्तम इति॥ तदेवं विमुक्तस्य विसुअत इत्यादि
क्त योजीवन्मुक्तस्थितप्रज्ञभगवद्भक्तगुणातीतब्राह्मणातिवर्णाश्रमप्रति
पादकस्मृतिवाक्यानि च जीवन्मुक्तिसद्भावे प्रमाणानीति स्थितं॥ इति जीवन्मु
क्तिप्रमाणप्रकरणं॥ अथ जीवन्मुक्तिसाधनं निरूपयामः॥ तत्त्वज्ञानमनो
नाशवासनाक्षयास्तसाधनं॥ अत एव वासिष्ठरामायणे वसने जीवन्मुक्तश
रीराणामेतस्मिन्प्रस्तावे वसिष्ठ आह॥ वासनाक्षयविज्ञानमनोनाशा महा
मते॥ समकालं चिराभ्यस्ता भवंति फलदायिन इति॥ अन्वयमुक्त्वा व्यतिरेक
माह। अय एते समभ्यावन्न स्वभ्यसास्तमुहुर्मुहुः॥ तासुनाश्चयविज्ञानमनो
नाशा महामते॥ समकालं चिराभ्यस्ता भवंति फलदायिन इति॥ अन्वयमु

योगव० २७

स्त्वाव्यतिरेकमाह॥ अयमेते समं यावत्तत्स्वभ्यस्ता मुहुः॥ तावन्न पदसंप्राप्तिर्भव
त्यपि समाहृतैरिति॥ समकालाभ्यासाभावे बाधकमाह॥ एकैकशो निषेव्यंते
यद्येते चिरयत्नतः॥ तन्नसिद्धिं प्रयच्छंति मंत्राः संकीर्तिता इवेति॥ यथा संध्या
वंदनमार्जनेन सहनियुक्तानामापो हि ष्ठेत्यादीनां तिसृणामृचां मध्ये प्रति
दिनमेकैकस्याः कृचः॥ पाठेऽग्न्याधानाद्यनुष्ठानं न सिध्यति॥ यथा वा षडंगमं
त्राणामेकैकमंत्रेण न सिद्धिः॥ यथा च लोके शाकसूपोदनादीनामेकै
केन न भोजनसिद्धिस्तद्वत्॥ चिराभ्यासस्य प्रयोजनमाह॥ त्रिभिरेभिस्त्रिराभ्य
स्तैर्हृदयग्रंथयो दृढाः। निःशंकमेव त्रुट्यंति बिसच्छेदाद्गुणा इवेति॥ तस्यैव व्य
तिरेकमाह॥ जन्मांतरशताभ्यस्ता राम संसारसंस्थितिः। सा चिराभ्यासयो
गेन विना न क्षीयते क्वचिदिति॥ न केवलमेकैकाभ्यासे फलाभावः किंतु त

रामः २७

स्वरूपमपि न सिध्यतीत्याह॥ तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च॥ मि
थः कारणतां गत्वा दुःसाध्यानि स्थितानि हीति॥ त्रयाणामेतेषां मध्ये द्वयो
र्द्वयोः मेलने त्रीण्यपि दृढानि भवंति॥ तत्र मनोनाशवासनाक्षयद्वयस्यान्यो
न्यकारणत्वं व्यतिरेकमुखेनाह॥ यावद्विलीनं न मनो न तावद्वासनाक्षयः
॥ मननात्मकत्वान्मन इत्युच्यते॥ तस्य नाशो नाम वृत्तिरूपपरिणामपरित्या
ज्य निरूढत्वाकारेण परित्यज्य निरुद्धाकारेण परिणामः॥ तथाह॥ पतं
जलियोगशास्त्रे सूत्रयामास॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रा
दुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणाम इति॥ व्युत्थानसंस्कारा अ
भिभूयंते निरोधसंस्काराः॥ प्रादुर्भवंति निरोधयुक्ते॥ क्षणश्चित्तेनान्वीयते
सोऽयं मनोनाश इत्यवगंतव्यम्॥ पूर्वापरपरामर्शमितरेपामसहसोत्यधर्मा

तस्य क्रोधादिवृत्तिविनाशस्य हेतुश्चित्तगतसंस्कारो वासना पूर्वपूर्वाभ्यासेन चि-
त्ते वासमानत्वात्॥ तस्याश्च वासनायाः क्षयो नाम॥ विवेकजन्यायां शांत्यादिवास-
नायां दृढायां सत्यामपि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः॥ तत्र मनोनाशाभावे व-
त्तिरुत्पद्यमाना सुकरा विछिदाबाह्यनिमित्तेन क्रोधाद्युत्पन्ने नास्ति वासनाक्ष-
यः॥ अक्षीणायां तु वासनायां तथैव वृत्त्युत्पादनान्नास्ति मनोनाशः॥ तत्त्वज्ञा-
नमनोनाशयोः परस्परकारणत्वं व्यतिरेकमुखेनाह॥ यावन्न तत्त्वविज्ञानं
तावच्चित्तशमः कुतः॥ यावन्न चित्तोपशमो न तावत्तत्त्ववेदनमिति॥ इदं स-
र्वमात्मैव॥ प्रतीयमानं तु रूपरसादिकं जगन्मायामयम्॥ तत्त्वेन वस्तु नास्ती-
ति निश्चयस्तत्त्वज्ञानं तस्यानुपपन्नौ रूपरसादिविषयाणां सत्त्वावसतित-
ज्ञेन्द्रियाणां चित्तवृत्तयो न निवारयितुं शक्यंते॥ यथा प्रक्षिप्यमाणे घृतेंधनादि

त्युच्छिन्नज्वाला जातनिर्वार्यते तद्वत्सति च चित्तोपशमे वृत्तिभिर्गृह्यमाणो रूपा-
दिः पुनरेतन्नास्ति किंचनेति प्रकृतेर्यत्नमानः॥ प्रत्यरदृष्टादिरिव प्रत्यक्षवि-
रोधशंकया ब्रह्माद्वितीयमित्येतावन्मात्रशास्त्रत्वनिश्चयो नोदियात्॥ वासना-
क्षयतत्त्वज्ञानयोः परस्परकारणत्वं व्यतिरेकमुखेनाह॥ यावन्न वासना-
नाशस्तावत्तत्त्वागमः कुतः॥ यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षय इ-
ति॥ क्रोधादिवासनास्वनष्टासु शमदमादिसाधनाभावान्न तत्त्वज्ञानमु-
देति॥ अज्ञाने बाद्वितीयब्रह्मतत्त्वे क्रोधादिनिमित्तस्य सत्यत्वभ्रमस्यानपा-
यान्न वासना क्षीयते॥ यथोक्तानां त्रयाणां द्वंद्वानामन्योन्यकारणत्वे
अन्वयमुखेन वयमुदाहरामः॥ मनसि नष्टे सति संस्कारोद्बोधकस्य वा-
ह्यनिमित्तस्याप्रतीतेर्वासना क्षीयते क्षीणायां च वासनायां द्वैतभावे

जीवन्० २६

न क्रोधादिवृत्त्यनुदयान्मनो नश्यति ॥ तदिदं मनोनाशवासनाक्षयद्वंद्वं ॥ दृसने
त्वयया बुध्येति स्मृतेरालोकाभिमुखवृत्तेर्दर्शनहेतुत्वादितरकल्पवतीना
नाश्य तत्त्वज्ञानहेतुत्वमवगम्यते ॥ सति च तत्त्वज्ञाने मिथ्याभूते जगति नर
विषाणवद्वा विविधवृत्त्यनुदयादात्मनश्चाद्वदृष्टत्वेन पुनर्वृत्त्यनुपयोगान्नि
रिंधनाग्निवन्मनो नश्यति ॥ तदिदं मनोनाशतत्त्वज्ञानयोर्द्वंद्वं ॥ तत्त्वज्ञा
नस्य क्रोधादिअयहेतुतां वार्त्तिककार आह ॥ रिपौ बंधौ स्वदेहे च समैका
त्म्यं प्रपश्यतः ॥ विवेकिनः कुतः कोपः स्वदेहावयवेष्विवेति ॥ क्रोधादिवा
सनाक्षयरूपस्य शमादेर्ज्ञानहेतुत्वं प्रसिद्धं ॥ वसिष्ठोपि गुणाः शमा
दयो ज्ञानान्नमादिभ्यस्त्वयाज्ञता ॥ परस्परं विवर्धते हे पद्मसरसीव
ति ॥ तदिदं वासनाक्षयतत्त्वज्ञानयोर्द्वंद्वं ॥ तत्त्वज्ञानादीनां त्रयाणां संपा

राम० २६

दने साधनमाह ॥ तस्माद्राघव यत्नेन पौरुषेण विवेकिना ॥ भोगेच्छां दूरत
स्त्यक्त्वा त्रयमेतत्समाश्रयेत् ॥ पौरुषो यत्नः केनाप्युपायेनावश्यं संपादयिष्या
मीत्येवंविधोत्साहरूपो निर्बंधः ॥ विवेको नाम विभज्य निश्चयः तत्त्वज्ञानस्य
श्रवणादिकं साधनं ॥ मनोनाशस्य योगः ॥ वासनाक्षयस्य प्रतिकूलवासनो
त्पादनमिति ॥ भोगेच्छायाः स्वल्पाया अप्युपगमे हविषा कृष्णवर्त्मेव भूय
एवाभिवर्धते इति न्यायेनातिप्रसंगस्य दुर्वारत्वात् दूरत इत्युक्तं ॥ ननु पूर्व
त्र विविदिषासंन्यासस्य तत्त्वज्ञानफलं विद्वत्संन्यासस्य जीवन्मुक्तिः ॥ इति
व्यवस्था वर्णिता ॥ तथा सति प्रथमतः तत्त्वं ज्ञानं संपाद्य विद्वत्संन्यासं
कृत्वा जीवतः स्वस्य बंधरूपयोर्वासनामनोवृत्त्योर्विनाशः संपद ॥ नीय इति
नातिभत्र तु तत्त्वज्ञानादीनां सहैवाभ्यासो नियम्यते ॥ अतः एवोक्तिर्विरो

धइतिचेत्नायंदोषः॥प्रधानोपसर्जनभावेनव्यवस्थोपपत्तेः॥विविदिषासं
न्यासिनःतत्वज्ञानंप्रधानं॥मनोनाशवासनाक्षयौतूपसर्जनभूतौ॥विद्वत्सं
न्यासिनःतद्विपरीतं॥अतःसदाभ्यासत्रयमप्यविरुद्धं॥नचतत्वज्ञानो
त्पत्तिमात्रेणकृतार्थस्यकिमुत्तरकालीनेनाभ्यासप्रयासेनेतिशंकनीयं
।जीवन्मुक्तिप्रयोजननिरूपणेपरिहरिष्यमाणत्वात्॥ननुविद्वत्संन्या
सिनोवेदनसाधनश्रवणाद्यनुष्ठानवैफल्यात्॥वेदनस्यचस्वरूपेणकर्तु
मशक्यत्वात्कर्त्तुमशक्यस्याननुष्ठेयत्वादुपसर्जनत्वेपितदुत्तरकालीनोऽ
भ्यासःक्रियतामितिचेत्॥केनापिद्वारेणपुनः॥पुनस्तत्वानुस्मरणमिति
ब्रूमः॥तादृशाभ्यासोलीलोपाख्यानेदर्शितः॥तच्चिंतनंतत्कथनमन्यो
न्यंतत्प्रबोधनं॥एतदेकपरत्वंज्ञानाभ्यासंविदुर्बुधाः॥सर्गादावेवनोत्प

न्नंदृश्यंनास्त्येवतत्सदाइदंजगदहंचेतिबोधाभ्यासंविदुःपरमिति॥ननुमनो
नाशवासनाक्षयाभ्यासावपितत्रैवदर्शितौ॥अत्यंताभावसंपत्तौज्ञातुर्ज्ञेयपर
स्यवस्तुनः॥युक्त्याशास्त्रैर्यतंतेयेतेप्यत्राभ्यासिनःस्थिताइतिज्ञानज्ञेय
योर्मिथ्यात्वधीरभावसंपत्तिः॥स्वरूपेणाप्यभवतीतिरत्यंताभावसंपत्तिः॥युक्ति
योगैः॥सोयंमनोनाशाभ्यासः॥दृश्यासंभवबोधेनरागद्वेषादितानवे॥रतिर्घ
नोदितायासौब्रह्माभ्यासःसउच्यतइति॥सोयंवासनाक्षयाभ्यासः॥नन्वेतेषुत्रि
ष्वभ्यासेषुसाम्येनप्रतीयमानेषुप्रधानोपसर्जनभावोनविवेक्तुंशक्यत
इतिचेत्॥नैवं॥प्रयोजनानुसारेणविवेक्तुंशक्यत्वात्॥मुमुक्षोः॥पुरुषजी
वन्मुक्तिर्विदेहमुक्तिश्चेतिप्रयोजनद्वयं॥अतएवविमुक्तश्चविमुच्यतइति
श्रूयते॥तत्रजीवतः॥पुरुषस्यदैवसंपदामोक्षः॥आसुरसंपदाबंधः॥तच्च

जीवन्० २९

षोडशाध्याये भगवता नदितं ॥ दैवी संपद्विमोक्षाय निबंधायासुरी मतेति ॥ ते
षां संपदो तत्रैवाभिहिते ॥ अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥ दानं दम
श्च यज्ञश्च स्वाध्यायस्तप आर्जवं ॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशु
नं ॥ दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं ॥ तेजः क्षमा धृतिः शौचंतं चाभि
जातस्य पार्थ संपदमासुरीमिति ॥ पुनरप्यध्याय परिसमाप्तेरासुरसं
पत्प्रपंचिता ॥ तत्राऽशास्त्रीयायाः ॥ स्वभावसिद्धयाः ॥ आसुरसंपदो दुर्वा
सनायाः ॥ शास्त्रीयया पुरुषप्रयत्नसाध्यया दैवसंपदा सह वासनयाऽ
पे सति जीवन्मुक्तिर्भवतीति ॥ वासनाक्षयजीवन्मुक्त्योर्नाशस्यापि जीवन्मुक्ति
हेतुत्वं युज्यते ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ बंधाय विषया
संक्तं मुक्त्यै निर्विषयं स्मृतं ॥ यतो निर्विषयं स्मृतं ॥ यतो निर्विषयस्या

राम० २९

स्य मनसो मुक्तिरिष्यते ॥ अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥ निर
स्तविषयासंगं निरुद्धं च मनो हृदि ॥ यदा यात्युन्मनीभावं तदा तत्परमं पदं
॥ तावदेव निरोद्धव्यं यावद्धृदि गतक्षयं ॥ एतज्ज्ञानं च ध्यानं च शेषोन्यायस्य
विस्तर इति ॥ बंधो द्विविधः तीव्रो मृदुश्च ॥ तत्रासुरसंपत्स्वात्स्वादेव क्लेशहेतुत्वा
त्तीव्रो बंधः ॥ द्वैतमात्रप्रतीतिस्तु स्वयमक्लेशरूपत्वादासुरसंपदनुत्पादक
त्वाच्च मृदुर्बंधः ॥ तत्र वासनाक्षयेण तीव्रबंध एव निवर्त्यते मनोनाशेन तु म
पि ॥ ननु हि मनोनाशेनैवालं वासनाक्षयस्तु निरर्थक इति चेत् ॥ न भोगहेतु
नाम्नबलेन प्रारब्धेन कस्यापि ते मनसि लीनबंधनिवारणासामर्थ्यात् भोग
स्य मृदुबंधत्वेनाप्युपपत्तेः ॥ तामसवृत्तिस्तीव्रबंधः ॥ सात्विकराजसवृत्तिरू
पं मृदुभोगः ॥ एतच्च दुःखेष भोगस्य मृदुबंधत्वेनाप्युपपत्तेः ॥ तामसवृत्तिर

जीवन०
२९

स्तीव्रबंधः॥ सात्त्विकराजसवृत्तिविषयं मृदुभोगः॥ एतच्च दुःखेष्वनुद्विग्नमना इत्य
त्र स्पष्टीकृतं॥ एवं च सति मृदुबंधस्याप्युपेक्षणीयत्वात्तीव्रबंधस्य वासनाक्षयेणैव
निवृत्तेः॥ अनर्थको मनोनाश इति चेत्॥ न दुर्बलप्रारब्धापादितेनाविरुद्धंभावि
भोगानां प्रतीकारार्थत्वान्मृदुभोगः॥ स च प्रतीकारनिवृत्यत्वं अभिप्रेत्ये
दमाहुः॥ अवश्यंभाविभोगानां प्रतिकारो न भवेद्यदि॥ तदा दुःखैर्न लिप्येरन्नल
रामयुधिष्ठिराः॥ तद्वज्जीवन्मुक्तिप्राप्तिर्वासनाक्षयमनोनाशयोः साक्षात्सा
धनत्वात्साधनं तत्त्वज्ञानं तु परंपरया हेतुत्वाद्व्यवहितत्वादुपसर्जनं॥ तत्त्व
ज्ञानस्य वासनाक्षयहेतुत्वं बहुशः श्रूयते श्रुतौ ज्ञात्वा देवं सर्वपाशापहानिः॥
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥ तरति शोकमा
त्मवित्॥ तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ ज्ञात्वा देवं मुच्यते सर्वपा

राम०
२९

शैरिति॥ मनोनाशहेतुत्वं च तत्त्वज्ञानस्य श्रुतिसिद्धं॥ विषयादर्शनमभिप्रेत्ये
दं श्रूयते॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेदित्यादि
गौडपादीया आहुः॥ आत्मसत्यानुबोधेन न संकल्पयते यदा॥ अम
नस्तां तदा याति ग्राह्याभावे तदग्रहं इति॥ जीवन्मुक्तेर्वासनाक्षयमनो
नाशाविव विदेहमुक्तेः साक्षात्साधनत्वाज्ज्ञानं प्रधानं॥ ज्ञानादेव तु कैवल्यं
प्राप्यते येन मुच्यते॥ इति स्मृतेः॥ केवलस्यात्मनो भावः कैवल्यं देहादि
राहित्यं॥ तच्च ज्ञानादेव प्राप्यते॥ सदेहत्वस्याज्ञानकार्यत्वेन तत्त्वज्ञानेन
निवर्त्यत्वात् ज्ञानादेवेत्येवकारेण कर्मव्यावृत्तिः॥ न कर्मणा न प्रजयेति श्रुते
ः॥ यस्तु ज्ञानवाञ्छास्त्रमननपरस्य यथासंभवं वासनाक्षयमनोनाशावभ्यस
स्यतु गुणं ब्रह्मोपास्ते न तस्य कैवल्यमस्ति लिंगदेहस्यानपायात्॥ अत एव

कारणतावच्छेदकेनेति॥ येन मुच्यतेऽस्यायमर्थः॥ येन ज्ञानप्रापितकेव
लत्वेन कृत्स्नबंधादि मुच्यत इति बंधस्त्वनेकविधः॥ अविद्याग्रंथिरब्रह्म
त्वं॥ हृदयग्रंथिः॥ संशयाः॥ कर्माणि॥ असर्वकामत्वं॥ मृत्युः पुनर्जन्मेत्या
दिरूपोऽस्वतंत्रव्यवहारात्॥ एते बंधाः॥ सर्वेऽपि ज्ञाननिवर्त्याः॥ तथा च श्रु
तयः॥ एतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकरतीह सौम्य ब्रह्मै
व भवति॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्मा
णि तस्मिन्दृष्टे परावरे॥ यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते
सर्वान्कामान्सहेति॥ तमेव विदित्वातिमृत्युमेतीति॥ यस्तु विज्ञानवान्
भवति समनस्कः सदा शुचिः॥ स तु तत्पदमाप्नोति यस्माद्भूयो न जायते
॥ य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादीन्यप्यसर्वत्वादिबं

धनिवृत्तिपराणि वाक्यान्यत्रोदाहरणीयानि॥ सेयं विदेहमुक्तिर्ज्ञानोत्प
त्तिसमकालीना ज्ञानेन ब्रह्म एवाविद्यारोपितानामेतेषां बंधनां विद्यया वि
नाशे सति पुनरुत्पत्त्यसंभवादननुभावाच्च॥ तदेतद्विद्यासमकालीन
त्वं भाष्यकाराः॥ समन्वयसूत्रे प्रपंचयामासुः॥ तदधिगम उत्तरपूर्वाघ
योरश्लेषविनाशौ ननु वर्तमानदेहपातानंतरं भाविनी विदेहमुक्तिरि
ति बादरायणो वर्णयति तथा च श्रुतिः॥ तस्य तावदेव चिरं यावन्न विमोक्षेऽथ
संपत्स्य इति॥ वाक्यवृत्तावप्युक्तं प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा
भवेत्॥ कंचित्कालमनारब्धकर्मबंधस्य संक्षये॥ निरस्तातिशयानं
दं वैष्णवं परमं पदं पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यत इति॥ सूत्रका
रोप्याह भोगेन त्वितरे क्षपयित्वा संपद्यत इति॥ इतरे प्रारब्ध[illegible]पुण्यपा

जीवन्मु०
३१

येवमभिप्रेत्याह॥ जीवन्मुक्तपदं तत्त्वज्ञस्य देहे कालमात्रकृते॥ विदेहमु
क्तित्वपदयोस्संकेतामिति॥ तायदेषः विवक्षाविशेषेणानयोरविरोधात्॥ वि
देहमुक्तिरित्यत्र लेनदेहस्यारंभकस्य देहे जातविचक्षिलावकृतिर्वर्णितिं अ
स्माभिस्तु भाविविदेहतावविवक्षयोच्यते॥ तदनारंभायैवत्ता नतुंपादनात्
॥ अयंतु देहः॥ पूर्वमेवारब्धः॥ अतो ज्ञाते नापि नास्यारंभो वारयितुं शक्यते
॥ एतद्देहनिवृत्तिरपि न ज्ञानफलं॥ अज्ञानिनामप्यारब्धकर्मक्षये तन्नि
वृत्तेः॥ इति वर्त्तमानलिंगदेहनिवृत्तिर्ज्ञानफलमस्तु॥ ज्ञानमंतरेणात
दानिवृत्तेरिति चेत्॥ न॥ सत्यपि ज्ञाने जीवन्मुक्ते तन्निवृत्त्यभावात्॥ ननु
ज्ञानस्य कंचित्कालं प्रारब्धेन कर्मणा प्रतिबद्धत्वेन निवर्त्तकत्वेपि
प्रतिबंधक्षये लिंगदेहनिवर्त्तकत्वं न विष्यतीति चेत्॥ न पंचपादिका

राम०
३१

चार्येणापनोज्ञानमज्ञानस्यैव निवर्त्तकमित्युपपादितत्वात्॥ तर्हि लिं
गनिवृत्तेः॥ किंसाधनमिति चेत्सामग्रीनिवृत्तिरिति ब्रूमः॥ द्विविधा हि का
र्यनिवर्त्तकं॥ विरोधिसद्भावः सामग्रीनिवृत्तिश्च॥ तद्यथा विरोधिना वायु
ना॥ तैलवर्त्तिसामग्रीनिवृत्त्या वा दीपो निवर्त्तते॥ लिंगदेहस्य साक्षाद्वि
द्विरोधित्वं न पश्यामः॥ सामग्री द्विविधा॥ प्रारब्धमनारब्धं चेति ताभ्यामुत्पा
द्यमानज्ञानिनां लिंगदेहः सुत्रवावतिष्ठते॥ ज्ञानिनांत्वनारब्धं ज्ञानेन
निवृत्ते॥ प्रारब्धं च भोगेन निवृत्ते॥ तैलवर्त्तिरहितप्रदीपवत्सामग्रीनिव
त्त्यालिंगदेहो निवर्त्तते॥ अतो न तन्निवृत्तिर्ज्ञानफलं॥ तच्च नेन न्यायेन नाविदे
हानारंभोपि न ज्ञानफलं॥ न व्याप्तिः॥ किमनारंभ एव फलं किंवा तत्प्रतिपा
लनं॥ नाद्यः॥ तस्य प्रागभावरूपत्वेनानादित्वात्॥ नाद्वितीयः॥ अनार

ध्यकर्मरूपसामग्र्याऽनिवृत्तेरेव भाविदेहारंभप्रागभावप्रतिपालनसिद्धेः॥ त
त्वज्ञाननिवृत्तिफलं भविष्यानिवृत्तेरेव विद्याफलत्वात्॥ नैष दोषः॥ भाविज
न्मारंभादीनां विद्याफलत्वस्य प्रामाणिकत्वात्॥ भूयो न जायत इत्युदाहृ
ता श्रुतयस्तत्र प्रमाणं॥ न च ज्ञानमज्ञानस्यैव निवर्तकमिति न्यायेन विरो
धः॥ अज्ञानसंबंधाभावनिबंधनानामब्रह्मत्वादीनामज्ञानशब्देन प्रचयारिकाव्यै
विवक्षितत्वात्॥ अन्यथानुभवविरोधः॥ अनुभूयते ह्यज्ञाननिवृत्तेरिव ब्रह्म
त्वादिनिवृत्तिरपि॥ तस्मादज्ञाविदेहराहित्यलक्षणा विदेहमुक्तिर्ज्ञानसमका
लीना तथा च याज्ञवल्क्यवचनं श्रूयते॥ अभयं वै जनक प्राप्तोसीति॥ एता
वदरे खल्वमृतत्वमिति च॥ श्रुत्यंतरेपि॥ तमेवं विद्वानमृत इह भवति॥ य
द्युत्पन्ने ज्ञाने तत्क्षणमेव नाविदेहमुक्तिस्तदानीं न भवेत् कालांतरे च न भवे

त्तदांस्योतिशेषमादाविद्वज्ज्ञानजन्यमपूर्वं वा किंचित्कल्पेत॥ तथा च॥ कर्मणा
स्य एव ज्ञानजन्यस्यामृतत्वं न भवेत्॥ अथोच्यते॥ मंत्रादिप्रतिबद्धाग्निवत् प्रारब्ध
प्रतिबद्धं ज्ञानं कालांतरे विदेहमुक्तिं दास्यतीति॥ मैवं॥ अविरोधात्॥ न ह्य
स्मदभिमतया भाविदेहानुत्पत्तिलक्षणया विदेहमुक्त्या वर्तमानदेहमात्र
स्यापकेन प्रारब्धेन विरुध्यते॥ येन प्रतिबध्यते॥ किंच॥ ज्ञाने कर्त्र्यमका
लांतरे स्वप्रमविद्यमानं ज्ञानं कथममृतं दद्यात्॥ ज्ञानांतरं च समस्ता शा
स्त्रलक्षणमुत्पत्स्यत इति चेत्॥ न॥ साधनाभावात्॥ प्रतिबंधकप्रारब्धनिवृ
त्तौ वस्तुगुरुशास्त्रादेर्देहेंद्रियाद्युपेक्षणात्प्रतिभासानिवृत्तेः कुतः साधनं
स्यात्॥ नहि निरस्य प्रातिभासिकमायानिवृत्तिरित्यस्याः श्रुतेः कोर्थ इति चेत्॥ आ
रब्धांते निमित्ताभावादेहेंद्रियाद्युपाधेर्निमित्तकानिवृत्तिरित्येवार्थः॥ तः

तोनवदभिमतावर्त्तमानदेहाद्यत्यलक्षणा विदेहमुक्तिः पश्चादस्तु अस्म
दभिमता तु ज्ञानकालीनैव ॥ एतदेवाभिप्रेत्य भगवान्वसिष्ठ आह ॥ तीर्थे श्व
पचगृहे वा नष्टस्मृतिरपि परित्यजन्देहं ॥ ज्ञानसमकालमुक्तः कैवल्यं
याति हतशोकः इति ॥ तस्माद्विदेहमुक्तौ साक्षात्साधनस्य तत्वज्ञानस्य प्रधा
नत्वमुपपन्नं ॥ वासनाक्षयमनोनाशयोर्ज्ञानसाधनत्वेन व्यवहितत्वादु
पसर्जनत्वं ॥ आसुरवासनाक्षयोपकारिण्या दैववासनाया ज्ञानसाधनं
त्वं श्रुतिस्मृत्योरुपलभ्यते ॥ शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आ
त्मन्येवात्मानं पश्यति इति श्रुतिः स्मृतिरपि ॥ अमानित्वमदंभित्वमहिं
सा क्षान्तिरार्जवं ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ इंद्रिया
र्थेषु वैराग्यमनहंकार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्श

नं ॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानि
ष्टोपपत्तिषु ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवि
त्वमरतिर्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनं ॥ एतज्ज्ञानमि
ति प्रोक्तमज्ञानं यदतोन्यथेति ॥ अन्यस्मिन्नह बुद्धिराभिष्वंगः ॥ ज्ञायते
तेनेति श्रुत्यन्तरं ज्ञानसाधनमित्यर्थः ॥ मनोनाशस्यापि ज्ञानसाधनत्वं
श्रुतिस्मृतिप्रसिद्धं ॥ ततस्तु तं पश्यते निष्कलं ध्यायमान इति श्रुतिः ॥ अध्या
त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति च ॥ प्रत्यगात्मस
माधिप्रसादादिवं ज्ञात्वेत्यर्थः ॥ यं विनिद्रा जितश्वासाः संतुष्टाः संयतेंद्रि
याः ॥ ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने नमः ॥ इति स्मृतिः ॥ तदेवं तत्व
ज्ञानादीनां त्रयाणां विदेहमुक्तिजीवन्मुक्तिवद्गुणप्रधानभावमस्मा

सिद्धानुवृत्तिर्विविदिषासंन्यासिनासंपादितातामेतेषांकाश्चिद्संन्यासादूर्द्ध्वंअ
नुवृत्तिमात्रंकिंवापुनरपिसंपादनमन्योपेक्षितः॥नद्यःतत्वज्ञानस्यैवान्यपो
रुषःप्रयत्नसिद्धत्वेप्रयुक्तादराभावप्रसंगात्॥नद्वितीयःइतरयोरिवज्ञान
स्यापिप्रयत्नसाप्रियत्नसापेक्षत्वेसत्युपसर्जनप्रयुक्तादासीन्याऽभावप्र
संगात्॥नायंदोषः॥ज्ञानस्यानुवृत्तिमात्रंइतरयोर्यत्नसाध्यत्वमितिसंगीका
रात्॥तथाहि॥विद्याधिकारीद्विविधः॥कृतोपास्तिरकृतोपास्तिश्चेति॥तत्रो
पास्यतत्त्वसाक्षात्कारपर्यंतामुपास्तिंकृत्वायदिज्ञानेप्रवर्त्तते॥तदावासना
क्षयमनोनाशयोर्दृढत्वेनज्ञानादूर्ध्वंविद्वत्संन्यासजीवन्मुक्तीस्वतएव
सिद्ध्यतः॥तादृशाएवशास्त्रेष्वभिमतामुख्याविद्याद्याधिकारी॥तत्संप्रति
शास्त्रेषुसहोपमामात्मस्वरूपेणाविविक्ताविपिविद्वत्संन्यासविविदिषा

सन्न्यासौसंकीर्णाविवप्रतिभाते॥इदानींतनास्तुप्रायेणाऽकृतोपास्त
यएवौत्सुक्यमात्रात्सहसाविद्यायांप्रवर्त्तते॥वासनाक्षयमनोनाशौच
तत्कालिकौसंपादयंति॥तापतयश्रवणमनननिदिध्यासनादीनिनिष्पा
द्यंते॥तैश्चदृढाभ्यस्तैरज्ञानसंशयविपर्ययनिरासात्तत्वज्ञानंसम्यगुदे
ति॥तस्यबाधकप्रमाणाभावान्निवर्त्तयाअविद्यायाःपुनरुत्पत्तिकारणा
भावाच्चनास्तितस्यवैपरीत्यं॥वासनाक्षयमनोनाशौतुदृढाभ्यासाऽभावा
द्भोगप्रदेनप्रारब्धेनतदाबाध्यमानत्वाच्चसवातप्रदेशप्रदीपवत्सद्
सानिवर्त्तेते॥तथाचवशिष्ठः॥एवंभ्यस्तुप्रयत्नेनयोविषमोपंदिसम्भ
त।तुसाध्योवासनात्यागःसुमेरून्मूलनादिति॥अर्जुनोपि॥चंचलंहिम
नःकृष्णप्रमाथिबलवद्दृढं॥तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करं॥इति॥त

स्मादिदानींतनानां विद्वन्न्यासिनां ज्ञानस्य तु वृत्तिमात्रे वासनाक्षयमनोना
शोतु प्रयत्नसाध्याविति सिद्धं॥ ननु केयं वासना यस्याः॥ क्षयाय प्रयतितव्यमि
तिचेत्तत्स्वरूपमाह॥ वसि॥ दृढ॥ भावनयात्यक्तपूर्वापरविचारणं॥ यदादा
नं पदार्थस्य वासना सा प्रकीर्तिता॥ भावितं तीव्रसंवेगादात्मना यत्तदेव स
ः॥ भवत्याशु महाबाहो विगतेतरसंस्मृतिः॥ तादृग्रूपो हि पुरुषो वासनावि
वशीकृतः॥ संपश्यति यदेवैतत्सद्वस्त्विति विमुह्यति॥ वासनावेगवैवश्या
त्स्वरूपं प्रजहाति तद्भ्रान्तं पश्यति दुर्दृष्टिः सर्वं मदवशादिवेति॥ अत्र च स्व
स्वदेशाचारकुलधर्मभाषाभेदगतापशब्दादिषु प्राणिनामभिनिवेशा
ःसामान्यतनुदाहरणं॥ विशेषतस्तु भेदानुक्त्वा पश्चादुदाहरामः॥ यथोक्ता
वासनामभिप्रेत्य बृहदारण्यके श्रूयते॥ स यथाकामो भवति तथाक्रतुर्भ

वति॥ यथाक्रतुर्भवति॥ तत्कर्म कुरुते॥ यत्कर्म कुरुते तदभिसंपद्यत इति॥ वास
नाभेदो वाल्मीकिना दर्शितः॥ वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा॥ म
लिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी॥ अज्ञानसुघनाकारा घनाहंका
रशालिनी॥ पुनर्जन्मकरी प्रोक्ता मलिना वसना बुधैः॥ पुनर्जन्मांकुरं त्यक्त्वा
स्थिता संभृष्टबीजवत्॥ देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते देहादीनां
पांचकोशानां तन्मात्रिणश्चिदात्मनश्च भेदावरकमज्ञानं तेन सुष्ठु घनी
भूत आकारो यस्याः॥ सेयमज्ञानसुघनाकारा यथा क्षीरं तक्रसेचनेन घ
नीभवति॥ यथा वा द्रवीभूतं घृतमत्यंतं शीतलप्रदेशे चिरमवस्थापितं सु
घनीभवति॥ तथा वासनाप्रवृष्ट्या॥ घनीभावस्यावश्यापत्तिरपरा तां चासु
रसंपद्विवरणे भगवानाह॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा॥ न०२

जीव न०
३६

शौचंनापिचाचारोनसत्यंतेषुविद्यते।। असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं।। अप
रस्परसंभूतंकिमन्यत्कामहैतुकं।। एतांदृष्टिमवष्टभ्यनष्टात्मानोऽल्पबुद्धयः।।
प्रभवंत्युग्रकर्माणः।। क्षयायजगतोऽहिताः।। काममाश्रित्यदुःपूरंदंभमानमदा
न्विताः।। मोहाद्गृहीत्वा।। सद्ग्राहान्प्रवर्तंतेऽशुचिव्रताः।। चिंतामामपरिमेयांचप्रलयां
तामुपाश्रिताः।। कामोपभोगपरमाएतावदितिनिश्चिताः।। आशापाशशतैर्बद्धाः
ते बद्धाः।। कामक्रोधपरायणाः।। ईहंतेकामभोगार्थमन्यायेनार्थसंचयानि
ति।। धनाकारस्यतत्रैवोद्दाहतः।। इदमद्यमयालब्धमिदंप्राप्स्येमनोरथं
मिदमस्तीदमपिमेभविष्यातिपुनर्धनं।। असौमयाहतःशत्रुर्हनिष्येचा
परानपि।। ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी।। आढ्योभिजनवा
नस्मिकोन्योमया।। यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः।। अनेक

राम०
३६

चित्तविभ्रांतामोहजालसमावृताः प्रसक्ताःकामभोगेषुपतंतिनरकेषु
चाविति।। एतेनपुनर्जन्मकारकत्वंतदाहतेभवति।। नचत्वत्तुनःस्पृष्टवित
।। आत्मसंभाविताःस्तब्धाधनमानमदान्विताः।। यजंतेनामयज्ञैस्तेदं
भेनाविधिपूर्वकं।। अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः।। मामात्म
परदेहेषुप्रद्विषंतोभ्यसूयकाः।। तानहंद्विषतः।। क्रूरान्संसारेषुनरा
धमान्।। क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु।। आसुरींयोनिमाप
न्नामूढाजन्मनिजन्मनि।। मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं।। इ
ति।। श्रुत्वावासनानुतान्नेत्या।। तेयस्वरूपंत्रयोदशाध्यायेभगवानाह
।। ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते।। अनादिमत्परंब्रह्मनसत्तन्न
सदुच्यते।। सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं।। सर्वतः

जीव०का०
३२

क्तिमल्लोके सर्वमादेमोत्पतिरिति॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जि
तं॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ बहिरन्तश्च भूतानामचरं चरमे
व च॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ अविभक्तं च भूतेषु विभ
क्तमिव च स्थितं॥ भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥ ज्योतिषामपि
तज्ज्योतिस्तमसः परमुच्यत इति॥ अत्र तदस्य लक्षणं स्वरूपलक्षणाभ्यां
मा मगवतुं सोपाधिकनिरुपाधिकस्वरूपद्वयमुपन्यस्तं ननु त्वक्त
पूर्वाधिरपि चारत्ववासनालेशरूपमुक्तं॥ ज्ञेयत्वानं च विचारजन्यं॥ अ
तो न स्तुत्यापातः लक्षणमस्ति मैव॥ लक्षणे दूरभावनृये तु त्वक्तत्वात्॥ यथा
बहुजन्मसु दंभावित्वेनास्मिन् जन्मनि विनैव परोपदेशं मदंकारस्मम
कामेर काम क्रोधादयो मलिनवासना उत्पद्यंते॥ तथा प्राथमिकबोधस्य

राम०
३२

विचारजन्यत्वेपि दीर्घकालनैरंतर्यसत्कारैर्भावितत्वे यस्याबाधकस्य दुष्कृप
रामचरिमिंतरेणैव गुरोर्वसिष्ठादिव ज्ञसातत्वं परिस्फुरति॥ नारदरूपाबोधा
नुवृत्तासहितं इन्द्रियमव्यवहारः॥ शुद्धवासनास्यादेहजीवनमात्रोपयु
ज्यते॥ ननु दंभदर्पाद्यासुरसंपदुत्पादनाय॥ नापि जन्मांतरहेतुधर्मो
त्पादनाय यथा श्रुष्णनि ज्ञी भ्याद्विजानि कुस्त्र ज्ञ रणमात्रायोपयुक्ता
नि॥ न तु कर्तृ विरान्नाय नापि सस्यनिष्पत्त्यै यतन्ते॥ मलिना च वासना त्रि
विधा लोकवासना शास्त्रवासना देहवासना चेति॥ सर्वे जना यथा न निंदंति य
था स्तुवंति तथैव सर्वथाचरिष्यामि इत्यभिनिवेशो लोकवासना तस्याः सं
पादयितुं अशक्यत्वान्मलिनत्वं॥ स यथादि॥ कोन्वस्मिन्साम्प्रतं लोके गुणवान्
कश्च वीर्यवानित्यादिना वाल्मीकिः प्रष्टः॥ इक्ष्वाकुवंशप्रभवो रा

जीवन०
३८

मेः नामनन्नैः॥ श्रुतः॥ इत्यादिना प्रत्युत्तरं नारदो ददौ॥ तादृशस्यापि रामस्य पतिव्रता
शिरोमणिभूतायां जगन्मातुः सीतायामश्रोतुमशक्यो जनापवादः संप्रवृत्तः॥ कि
मुत क्रमन्येषु॥ तथा देशविशेषेषु परस्परं निंदा बाहुल्येनोपलभ्यते॥
दाक्षिणात्ये विप्रे रौद्रारा वेदवेदाविप्रा मांसभक्षणा इति निंदंते॥ दौत्तरेषां पास्
सत्ताउवाहिनो दाक्षिणात्या निंदंते॥ बह्वृचाश्वलायनशाखीयाः प्रवृत्ता
मन्यंते॥ वाजसनेयिनस्तु वैपरीत्येन॥ एवं स्वाकुलगोत्रवर्गेष्वि देवताश्विन्नू
सापरकीयनिंदा च॥ आविद्वदंगनागोपालं सर्वत्र प्रसिद्धा॥ एतदेवाभिप्रेत्यो
क्तं॥ कोलोकमाराधयितुं समर्थ इति॥ विद्यते न खलु कश्चिदुपायस्सर्वलो
कपरितोषकरो यः॥ सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुज
ल्पनः इति॥ अतो लोकवासनाया मलिनत्वमभिप्रेत्य गीश्वरस्य तुल्याविरो

राम०
३८

रस्तु निर्लज्जमोक्षशास्त्रेणुवर्णितं॥ शास्त्रवासना च त्रिविधा पाठव्यसनं बहुशास्त्रव्य
सनं अनुष्ठानव्यसनं चेति॥ पाठस्य व्यसनं भरद्वाजे दृश्यते॥ स हि पुरुषायुषत्रये
एव कृत्वेदानधीत्येन्द्रं चतुर्थायुषा प्रलोभितः॥ तत्रापि परिशिष्टवेदाध्ययनाये
षं च कार॥ तस्यापि पाठस्यानर्थकत्वात्मलिनवासनात्वं॥ तां चावासनां भिक्षुः प्रतिबो
ध्यपावान्निवर्त्य ततोऽप्यधिक पुरुषार्थसगुण ब्रह्मविद्यामुपादिदेश॥ तदेतत्स
र्वं तैत्तिरीयब्राह्मणे द्रष्टव्यं॥ तथैवात्यंतिकपुरुषार्थाभावाद्बहुशास्त्रव्यसनस्य म
लिनत्वं॥ कावषेयगीतायामुपलभ्यते॥ दुर्वासा मुनिर्बहुविधशास्त्रपुस्तकभारैः॥
सह महादेवं नमस्कर्तुमागतः॥ तत्सभायां नारदेन मुनिना भारवाही गर्दभसाम्य
मादिनः॥ कोपात्पुस्तकानि सर्वाण्यर्णवे प्रक्षिप्य महादेवेनात्मविद्यायां प्रवर्तित
इति॥ आत्मविद्यां चानंतसुखस्य गुरुकारणपरहितस्येन वेदशास्त्रमात्रेणेत्यपे

ते॥ तथा च श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेनेति॥ अ
न्यत्राप्युक्तं॥ बहुशास्त्रकथाकंथारोमंथेन वृथैव किं॥ अन्वेष्टव्यं प्रयत्नेन तत्वज्ञैर्ज्यो
तिरंतरमिति॥ अधीत्य चतुरो वेदान्॥ धर्मशास्त्राण्यनेकशः॥ ब्रह्मतत्वं न जानाति दर्वी
पाकरसं यथेति च॥ नारदश्चतुःषष्टिकलाविद्याकुशलोप्यनात्मविद्यत्वेनानुतप्तः
सनत्कुमारमुपससादेति छांदोग्ये आख्यायते॥ अनुष्ठानव्यसनेन विष्णुपुराणे निदा
घस्याप्युपलभ्यते॥ वसिष्ठरामायणे दाशूरस्य निदाघोदिक्षु नुणोपुनः पुनः प्रबोध्यमा
नोपि कर्मश्रद्धाजाड्यं चिरं न जहौ॥ दाशूरस्यात्यंतश्रद्धाजाड्येनानानुष्ठानायप्युक्तमद
र्शं न मोनकाप्युपेक्षते॥ तस्माद्बहुकर्मवासनायाः पुनर्जन्महेतुत्वान्निंदितत्वं॥ तथा
चाथर्वणिका अधीयंते॥ प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म
॥ एतच्छ्रेयो येऽभिनंदंति मूढा जरामृत्युं ते पुनरेवापियंति॥ अविद्यायामंतरे वर्तमा
नाः स्वयं धीराः पंडितंमन्यमानाः स्वयं॥ धीराः पंडितंमन्यमानाः जंघन्यमानाः परियं

ति मूढा अंधेनेव नीयमाना यथांधाः॥ अविद्यायां बहुधा वर्तमाना वयं कृतार्था इति अभि
मन्यंति बालाः॥ यत्कर्मिणो न प्रवेदयंति रागात्तेनातुराः क्षीणलोकाश्च्यवंते॥ इष्टापू
र्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयंते प्रमूढाः॥ नाकस्य पृष्ठे ते सुकृतेनानुभूत्वेमं
लोकं हीनतरं वा विशंतीति॥ भगवताप्युक्तं यामिमां पुष्पितां वाचं प्रवदंत्यविप
श्चितः॥ वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ कामात्मानः स्वर्गपरा जन्मकर्म
फलप्रदां॥ क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ भोगैश्वर्यप्रसक्तानां तयाप
हृतचेतसां॥ व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ त्रैगुण्यविषया वेदा निस्त्रै
गुण्यो भवार्जुन॥ निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्॥ यावानर्थ उदपा
ने सर्वतः संप्लुतोदके॥ तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानत इति॥ दर्प्यदृष्टत्वाद्रा
गीयवासनायामलिनत्वं॥ श्रोतकुतूहलेनैव कालेन सर्वांश्चेदानधीत्य दर्पेण

जीवन्० ५०

पितुरप्यसुरतोविनयंश्चकारेतिछांदोग्याःपठंति॥ बालाकिःकानिचिदुपास्त
नात्स्वगर्वदृप्तस्तुज्ञानस्पर्द्धिषुबहुदेशेषुदिग्विजयेनबहून्विप्रानवज्ञायकाशीमाजगा
तत्रातुब्रह्मविद्भिरोमगामनुशासितुंधार्ष्ट्यंचकारेतिकौषीतकिनोवाजसनेयिनः
श्चाधीयते॥ देहवासनाऽप्यात्मगुणाधानदोषापनयनभ्रांतिस्त्रिधा॥ तत्रात्मत्वंनाम
कारउदाहृतःसोऽयंदेहमात्रवैनन्त्रवसिष्ठआत्मेतिप्राकृतजनालोकायतिकाश्चप्र
तिसवाएषपुरुषोऽन्नरसमयइत्यारभ्यतस्मादन्नंतदुच्यतेइत्यनेनग्रंथेनतामेव
प्राकृतप्रतिपत्तिंतैत्तिरीयाःस्पष्टीकुर्वंति॥ विरोचनः॥ प्रजापतिनानुशिष्टोपिस्वचि
त्तदोषेणदेहेआत्मबुद्धिंदृढीकृत्यासुरान्॥ सर्वाननुशासेति॥ छांदोग्येऽष्टमेऽध्या
येसमामनंति॥ गुणाधानंद्विविधंलौकिकंशास्त्रीयंच॥ समीचीनशब्दादिसंपादनंलौ
किकंकोमलध्वनिनागातुंमधुरमेतुंचतैलपानमरीचभक्षणादिनागायकाःप्रय
तंते॥ मृदुस्पर्शायपुष्टिकरावौषधाहारावुपयुंजेतिलावण्यायाभ्यंगोद्वर्त्त

राम० ५०

नदुकूलालंकारानुपसेवंतेसौगंध्यायस्रगालेपनेधारयंति॥ शास्त्रीयंतुगुणाधानंगंगास्ना
नशालग्रामतीर्थादिकंसंपादयंति॥ दोषापनयनंचचिकित्सकोक्तैरौषधैर्मुखादिमलक्षाल
नेनचलौकिकं॥ शौचाचमनाद्यैरिकमित्युभयविधं॥ अस्याश्चदेहवासनायामालिन्यं
चस्यते॥ देहस्यात्मत्वंतावदप्रामाणिकत्वाद्द्वेषदुःखहेतुत्वाच्च॥ मलिनत्वं॥ अस्मिन्न
र्थेश्ववार्तिकाचार्य्यैःसर्वैरपिपराक्रांतंगुणाधानंचभाष्येणनयपन्नासमः॥ प्रसिद्धाएवगायका
अध्यापकाश्च॥ प्रयतमानानामपिबहवोधर्मिसौष्ठवंनलभंते॥ मृउस्यरोगिणःपुष्टिश्चन
नेयत्ता॥ लावण्यसौगंध्येअपिउकलेनसत्तागादिनिष्टेनलुतेहनिष्टे॥ अतएवविष्णुपुराणे
भिहितं॥ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ॥ देहेचेत्प्रीतिमान्मूढोभ
वितानरकेपिसः॥ स्वदेहाशुचिगंधेननविरज्येतयःपुमान्॥ वैराग्यकारणंतस्य
किमन्मूढोभवितानरकेपिसः॥ स्वदेहाशुचिगंधेननविरज्येतयःपुमान्॥ वैराग्यका
रणंतस्यकिमन्यदुपदिश्यते॥ शास्त्रीयगुणःप्रबलेनशास्त्रान्तरेणापोद्यते॥ यथान

जीवन० ४१

हिंस्यात्सर्वा भूतानीत्यस्याः ॥ अग्नीषोमीयं पशुमालभेतेत्यनेनापवादः ॥ न च तत्प्रबलं शा-
स्त्रमेतत् ॥ यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यस्तीर्थ-
बुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ अत्यंतमलिनो देहो देही चात्यं-
तनिर्मलः ॥ उभयोरंतरं ज्ञात्वा कस्य शौचं विधीयते इति च ॥ यद्यप्यनेन शास्त्रेणादोषा-
पनयनाय स्नानं प्रतिषिध्यते ॥ न तु गुणाधानं ॥ तथापि सति विरोधिनि प्रबलदोषे गुणाधा-
नमनर्थकमित्यर्थाद्गुणाधानस्य प्रतिषेधः ॥ अत्यंतमालिन्यं चात्र मैत्रायणीशा-
खायां श्रूयते भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिते विण्-
मूत्रकफपित्तसंघाते दुर्गंधे निःसारेऽस्मिन् शरीरे किं कामोपभोगैरिति ॥ शरीरमिदं मै-
थुनादेवोद्भूतं संविदपेतं निरय एव ॥ मूत्रद्वारेण निष्क्रांतमस्थिभिश्चितं मांसेनालि-
प्तं चर्मणावनद्धं ॥ विण्मूत्रकफमज्जामेदवसाभिरन्यैश्च मलैर्बहुभिः ■ परिपूर्णं को-
शइव वसुनेति ॥ चिकित्स्यायां च रोगत्वं तावन्नेनियता ॥ स्नानं तोपि रोगः कदाचित्पुन

राम० ४१

रुदेति न वर्द्धिं देहि निरंतरं स्रवत्सु मलेषु रोमकूपैरसंख्यातैः स्विन्नैर्गात्रैः को नाम खेदेन म-
त्वापि स्नातुं शक्नुयात् ॥ तदुक्तं शंकराचार्यैः न वर्द्धिष्णु पतादेहात्कलवंति घटिकाद्व ॥
वाघनोचेन्नस्मृतं इत्येकोऽस्मि यो रामबधायास बिल्लोकनात् ॥ साकाजस्तत्रपर-
वीसा मरावीचिवारुणः ॥ सास्नपत्रवनखेणीयादेहमितिस्थितिः सात्माज्यास्सर्वयेर्
न्निनर्वनान्नेप्सुपस्थिते ॥ स्पृष्ट्वा स्नानं भवेत्सम्यङ्मांसे वपुकसी ॥ तदेतदुक्तं लोक-
शास्त्रदेहवासनात्रयमविवेकिनामुपादेयत्वेन प्रतिभासनमपि विविदिषोर्वे-
दनोत्पत्तिविरोधित्वाद्विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयं ॥ अत
एवत्स्मर्यते लोकवासनया जंतोः शास्त्रवासनयापि च देहवासनया ज्ञानं
यथावन्नैव जायते ॥ इति यास्तु दंभदर्पाद्यासुरसंपद्रूपा मानसवासना तस्या नर-
कहेतुत्वान्मालिन्यं स्फुटमिति प्रसिद्धं ॥ ततः केनाप्युपायेन वासनाचतुष्टयस्य क्षयः

संपादनीयः यथा सा मनसाप्यसंपादनीयः तथा मनसोपि ॥ नच तार्किकवन्नित्यत्वमम
णुपरिमाणं मनो वैदिका अभ्युपगच्छंतियेन मनो नात्मोऽसंपाद्यः स्यात्किंतर्हि सावय
वमनित्यं सर्वदानुवृत्तवर्णादिवद्बहुविधपरिणामार्हत्वं मनसः तस्य च लक्षणप्रमार
त्वात् ॥ ज्ञानवस्तुर्वमन एवेत्येतच्चक्षुरणा कामादिवृत्तयेः क्रमेणोत्पं माश्चाक्षुषप्रत्यक्ष
षदत्वाक्षिणातिस्पष्टं भासते ॥ तदुपादानं मन इति ॥ अन्यत्रमना अभूवन्नादर्शमर
न्यत्रमना अभूवन्नाश्रौषमिति ॥ मनसाह्येव पश्यति मनसा शृणोतीत्येतत्प्रमाणंच
क्षुः सन्निकृष्टस्फीतावलोकमध्यवर्तिघटः श्रोत्रसंनिकृष्टो वेदः पठितवेदघोषस्या
नवधाने सति न प्रतीयते ॥ अवधाने तु प्रतीयते तादृशसर्वविषयोपलब्धिसाधा
रणकारणमन्वयव्यतिरेकाभ्यां प्रतीयत इत्यर्थः ॥ तस्मादपि दृष्टत्वउपस्पष्टोम
नसा विजानाति ॥ एतदुदाहरणं ॥ यस्माच्च तद्दृष्टप्रमाणाभ्यां सिद्धं मनस्तस्मा

त्तदेवमुदाहरणीयं ॥ दृष्टश्चोगेप्यन्येनोपस्पृष्टो देवदत्तो विशेषेण जानाति ॥ हस्तस्प
र्शमयमंगुलिस्पर्शोयमिति ॥ न हि तत्र चक्षुः प्रसरति ॥ त्वगिंद्रियं तु मादवकिंचि
न्मात्रोपक्षीणं ॥ तस्मान्मन एव विशेषज्ञानकारणं परिशिष्यते ॥ तच्च मननात्म
न इति ॥ चेतनाहित्वमिति ॥ वाभिधीयते तच्चित्तं सत्वरजस्तमोगुणात्मकं प्रकृ
त्यंशप्रकाशिचं मोहमेव च पांडव ॥ इत्यभिधानात् संख्यशास्त्रेपि प्रकाशप्रवृ
त्तिनियमार्था इत्युक्तं ॥ प्रकाशो नाम मनसि तत्तत्स्वरूपकं किंतु ज्ञानं ॥ सत्वा
संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतो ज्ञानमेव चेत्यु
क्तत्वात् ज्ञानवदव सुखमपि सत्वकार्यं तदुक्तं ॥ सत्वं सुखे संजयति रजः ॥ कर्म
णि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युतेति ॥ समुन्नतरंगवन्निरंतरं परिण
मानेषु गुणेषु कदाचित्कश्चिद्गुद्भवति इतरावभिभूयते ॥ तदुक्तं ॥ रजस्तमश्चाभि

भूयस्त्वं भवति भारत । रजः सत्वं तमश्चैव तमः सत्वं रजस्तथेति । बाध्यबाधकतां यांति
कल्लोला इव सागरे इति । तत्र तमस उद्भवे सत्यासुरसंपदुदेति रजस उद्भवे सति स
लोकादिवासनाविर्भवंति । सत्वस्योद्भवे सति दैवीसंपदुपजायते । एतदेवाभि
प्रेत्योक्तं । सर्वद्वारेषु देहेस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्यु
तेति । एवमंतःकरणं त्रिगुणात्मकं भासते । तथापि सत्वमेवास्य मुख्यमुपादान
कारणं । रजस्तमसी तूपष्टंभके । अत एव ज्ञानिनो योगाभ्यासेन रजस्तमसोरप
नीतयोः सत्वमेव स्वरूपं परिशिष्यते । तदेवाभिप्रेत्योक्तं । तस्य चित्तमचित्तं स्या
त्क्षिप्तं सत्वमुच्यते । इति । ननु सत्वं चांचल्यहेतु रजोगुणशून्यत्वादेकाग्रं भ्रां
तिकल्पितानात्मस्वरूपस्थूलपदार्थाकारहेतुतमोगुणशून्यत्वात्सूक्ष्मं । ततआ
त्मदर्शनयोग्यं । अत एव श्रुतिः । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति । न

खलु वायुनाऽऽदोल्यमानेन मंदीपेन मणिमुक्तादिलक्षणानि निर्द्धारयितुं शक्यते । नापि
स्थूलेन खनित्रेण सूच्येव वस्त्रस्य परस्यूतिः संभवति । तदेवं तदीदृशं सत्वमेव योगिषु
तमोगुणगर्भितेन रजोगुणेनोपष्टब्धं बहुविधं द्वैतसंकल्पं चेतयमानं चित्तं भवति
। तच्चित्तं तमोगुणाधिक्ये सति क्रूरासुरीसंपदनुपातिवृत्तिर्नैव भवति यदाह वसिष्ठ
ः । अनात्मन्यात्मतात्यात्मभावेन तदेहभावनया तथा । पुत्रदारकुटुंबैश्च चेतो गच्छति पी
नतां । आधिव्याधिविलासेन समाश्वासेन संस्मृतौ । हेयादेयविभागेन चेतो गच्छति
पीनतां । अहंकारविकारेण ममतामललीलया । इदं ममेति भावेन चेतो गच्छति पीनतां ।
स्नेहेन धनलोभेन लाभेन मणियोषितां । आपातरमणीयेन चेतो गच्छति पीनतां
। दुराशाक्षीरपानेन भोगानिलबलेन च । आस्वादनेन चारेण चेतो गच्छति पीन
तां इति । तदेवं किमर्दनायर्योर्वासनामनसोः स्वरूपं निरूपितं । अथ वासनाक्षय

मनोनाशोऽपि सिध्येत्॥ तत्र वासनाक्षयस्य कारणमाह वसिष्ठः॥ बंधोहि॥ वासनाबंधो मोक्षः स्याद्वासनाक्षयः। वासनास्त्वं परित्यज्य मोक्षार्थित्वमपि त्यज॥ मानसीर्वासनाः पूर्वंत्यक्त्वा विषयवासनाः॥ मैत्र्यादिभावनानाम्नीर्गृहाणामलवासनाः॥ ता अप्येताः परित्यज्य ताभिर्व्यवहरन्नपि॥ अंतःशांतसमस्नेहो भव चिन्मात्रवासनः॥ तामप्यंतः परित्यज्य मनोबुद्धिसमन्वितां॥ शेषे स्थिरसमाधानो येन त्यजसि तत्त्यजेति॥ अत्र मानसवासनाशब्देन पूर्वोक्ता लोकशास्त्रदेहवासना विवक्षिताः॥ विषयवासनाशब्देन शब्दस्पर्शादयो रसगंधादिवक्षिताः॥ मृदुतीव्रत्वेन द्विविधा भेदकारणं॥ एवं शब्दस्पर्शरूपरसगंधा विषयाः॥ तेषां काम्यमानत्वदशायां जन्यः संस्कारो मानसवासना॥ भुज्यमानत्वदशायां जन्यः संस्कारो विषयवासना॥ अस्मिन्नपि पूर्वोक्तानां च तयोर्मनयोरेवं तद्भावः॥ अंतर्बहिश्च व्यतिरेकेण वासनांतराऽ

संभवात्॥ ननु वासनायाः परित्यागः कथं घटते॥ न हि तासां मूर्तिरस्ति येन संमार्जनीयसमुद्धृतधूलिवत्त्यज्येत बहिस्त्यज्यमानं मैव॥ उपवासजागरणवत्तपपत्ते भवनाभावप्राप्तयोर्भुंजिक्रियायां निद्रयोरमूर्तत्वेपि तत्परित्यागरूप उपवासजागरणे सर्वैरनुष्ठीयेते। तद्वदत्राप्यस्तु॥ अथ स्वपित्वा निरा इति मंत्रेण संकल्पं संकल्प्य कृत्वा सावधानेनैवावस्थानेन गतइति॥ यद्यत्रापि न तद्वंडवारिनप्रैषमंत्रेण संकल्पः अप्रमत्तत्वेनावस्थानं शास्त्रत्वाद्वैदिकमंत्राऽनधिकारिणां भाषया संकल्पोस्तु॥ यदि तत्र शास्त्रकस्पोदनादिसन्निधित्यागस्तर्हि अत्रापि स्रक्चंदनवनितादिसन्निधिपरित्यागोस्तु॥ अथ तत्र बुभुत्सानिद्रालस्यादिनिवर्तकैः पुराणश्रवणादेवदर्शनान्त्यगीतवाद्यादिभिश्चित्तमुपलालयेत्तर्ह्यत्रापि मैत्र्यादिभिस्तदुपलालयेत॥ ता मैत्र्यादयस्तु पतंजलिना सूत्रिता॥ मैत्रीकरुणामुदितोपेक्षाणांसुख

जीवन० ७५

दुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति ॥ चित्तं हि रागद्वेषपुण्यपापै
ः कलुषीक्रियते रागद्वेषौ च पतंजलिः सूत्रयत् ॥ सुखानुशयी रागः दुःखानुशयी द्वेष
इति ॥ स्नेहादनुभूयमानं सुखमनुशेते ॥ कश्चिद्वृत्तिविशेषः सुखजातीयं मे सर्वदा भू
यादिति ॥ नेदृक् दृष्टसामग्र्यभावान्न संपादयितुं शक्यं अतः स रागश्चित्तं कलुषी
करोति ॥ यदा त्वयं सुखिषु मैत्रीं भावयेत् ॥ सर्वेऽप्येते सुखिनो मदीया इति ॥ तदा तत्सु
खं स्वकीयमेव संपन्नमिति भावयतस्तत्र रागो निवर्तते ॥ यथा स्वस्य राज्याभावेऽपि पु
त्रादिराज्यमेव स्वकीयं राज्यं तद्वत् ॥ निवृत्ते रागे वर्षास्वतीतासु शरत्स्विव चित्तं
प्रसीदति ॥ तथा दुःखमनुशेते कश्चित्कलुषः ॥ इदं सर्वं दुःखं सदा मे मा भूदिति
॥ तच्च तत्र शत्रुव्याघ्रादिषु सत्सु न निवारयितुं शक्यं न च सर्वं दुःखं हन्तुं श
क्यं ते ॥ अतः स द्वेषः सदा हृदयं दहति ॥ यदा स्वस्येव परेषां सर्वेषां प्रतिकूले दुःखे

राम० ७५

सं मा भूदिति ॥ अनेन प्रकारेण करुणां दुःखिषु भावयेत् ॥ तदा वैर्यादिद्वेषनिवृत्तौ चित्तं
प्रसीदति ॥ अत एव स्मर्यते ॥ प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ॥ आत्मौपम्ये
न भूतानां दयां कुर्वीत मानव इति ॥ तं प्रकारं महात्मनो दर्शयति ॥ सर्वेऽपि सुखिनः संतु नि
रामयाः ॥ सर्वे भद्राणि पश्यंतु मा कश्चिद्दुःखमाप्नुयादिति ॥ तथा हि प्राणिनः स्वभावत
एव पुण्यं नानुतिष्ठंति पापं त्वनुतिष्ठंति तदाहुः पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मा
नवाः ॥ न पापफलमिच्छंति पापं कुर्वंति यत्नत इति ॥ ते च पुण्यपापे पश्चात्तापं जनयतः
॥ स च तापः श्रुत्यानूद्यते ॥ किमहं साधु नाकरवं किमहं पापमकरवमिति ॥ यदा सो
पुण्यपुरुषेषु मुदितां भावयेत्तदा ॥ तद्वासनया तत्स्वयमतंद्रितः पुण्ये प्रवर्तते ॥ तथा पा
पिपुरुषेषूपेक्षां भावयन् स्वयमपि पापान्निवर्तते ॥ अतः पश्चात्तापस्याभावेन चित्तं प्र
सीदति सुखिषु मैत्रीं भावयतो न केवलं रागनिवृत्तिः किंतु मात्सर्येर्ष्यादयो निवर्तं
ते ॥ गुणेषु दोषाविष्करणमसूया परगुणानामसहनमीर्ष्या ॥ यदा मैत्रीवशात्परसु

जीवनं०
४६

रसुखं स्वकीयमेव संपद्यते ॥ तदा सुखेषु कथमसूयादिकं संभवेत् ॥ एवं द्वेषोत्तरानिवृत्ति
रपि यथायोग्यमनुमेया ॥ दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यथा निवर्तते
तदा दुःखित्वप्रतियोगिकस्वसुखित्वप्रयुक्तो दर्पोऽपि निवर्तते ॥ स च दर्प आसुरसंपदंत
र्गतः सर्वस्य दारुणता ॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखीत्यादि ॥ ननु पुण्यात्म
सु मुदितां भावयतः पुण्यप्रवृत्तिः फलत्वेनोक्ता सा च योगिनो युक्ता ॥ मलिनोयाद्वा
त्मवासनायां पुण्यमत भविष्यद्दर्वस्य दारुणत्वात् ॥ मैवं पुनर्जन्मकरस्य काम्यपुण्यस्य स्त्री
देरत्र मलिनत्वेनोदाहरणात् ॥ इह तु योगाभ्यासजन्यमस्य शुक्लकृष्णत्वेन ज्ञानापादकं
कर्म विवक्षितं ॥ अशुक्लाकृष्णत्वं पतंजलिः सूत्रयामास कर्माशुक्लाकृष्णं योगिनस्त्रि
विधमितरेषामिति ॥ काम्यं कर्म विहितत्वात् ॥ शुक्लं निषिद्धं कृष्णं मिश्रं शुक्लकृष्ण
॥ तदेतत्त्रयमितरेषामयोगिनां संपद्यते ॥ तच्च त्रिविधं जन्म प्रयच्छति ॥ तदाहुर्विश्वरू
पाचार्याः शुभैराप्नोति देवत्वं निषिद्धैर्नारकिं गतिं ॥ उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभते

रामं०
४६

ऽवशः ॥ ननु योगस्यानिषिद्धत्वादकाम्यत्वेऽपि विहितत्वाच्छुक्लत्वमिति चेत् ॥ मैवं ॥ अका
म्यत्वाभिप्रायेणाशुक्लत्वाभिधानात् ॥ अतोऽशुक्लाकृष्णमेव पुण्यं पुण्यप्रवृत्तिर्योगि
नोपेक्ष्यते ॥ ननु योगिनां मध्ये मैत्र्यादिभिश्चित्तं प्रसादयन्ति ॥ तेषामेव योगित्वान्मैत्र्या
दिचतुष्टयस्योपलक्षणं ॥ तेनाभयं सत्त्वसंशुद्धिरित्यादिदैवसंपदमानित्वमित्यादि
ज्ञानसाधनानि जीवन्मुक्तिस्थितप्रज्ञादिवचनोक्तधर्माश्चोपलक्ष्यन्ते ॥ सर्वेषामे
तेषां शुभवासनारूपत्वेन मलिनवासनानिवसनानिवर्तकत्वात् ॥ ननु संत्यनेका
शुभवासनाः न च ताः एकेन सर्वा अभ्यसितुं शक्यन्ते ॥ निरर्थकश्च तदभ्यासप्रयासः
तन्निवर्त्यानामनन्तानां मलिनवासनानामेकस्य मनस्यसंभवात् ॥ न ह्यायुर्वेदो
क्तानि सर्वाण्यौषधानि एकेन सेवितुं शक्यन्ते ॥ नापि तन्निवर्त्याः सर्वे रोगा एकस्य
देहे संभवन्ति ॥ एवं तर्हि स्वचित्तं प्रथमतः परीक्ष्य यत्र यदा यावत्सा मलिनवासना

भिः॥ पीड्यमानस्तद्विरोधिनं विवेकमभ्यसेत्॥ स च विवेको जनकेन दर्शितः॥ अथ
येन हतां मूर्ध्नि ते दिनैः क्षिपतं तत्पधः॥ हन्त चित्रमहत्त्वायाः केषा विघ्नस्ततावते क्व ध
नानि महीपालानां ब्रह्मणः॥ क्व जगन्ति वा॥ प्राक्तनानि प्रयातानि केयं विश्रम्भस्तता
व॥ कोटयो ब्रह्मणां याता गताः सर्गपरंपराः॥ प्रयाताः पांसुवद्भूपाः का धृतिर्मम जीवि
ते॥ येषां निमिषणोन्मेषौ जगतः प्रलयोदयौ॥ तादृशाः पुरुषाः नष्टा मादृशां गणनैव
का॥ नन्वयं विवेकस्तत्त्वज्ञानोदयात्प्राचीनः॥ नित्यादिवस्तुविवेकादिसाधनव्यति
रेकेण ब्रह्मज्ञानासंभवात्॥ इह तूत्पन्नब्रह्मसाक्षात्कारस्य जीवन्मुक्तये वासना
क्षयादिसाधनं कक्रमुपक्रांतम् अतः किमिदमकांडे तांडवमिति चेन्नायं दोषः॥ साध
नचतुष्टयसंपन्नस्य पश्चाद्ब्रह्मज्ञानमित्येष सर्वपुरुषसाधारणः क्रमः॥ प्रौढो राज
मार्गः॥ जनकस्य तु पुण्यपुंजपरिपाके नाकाशात्फलपातवदकस्मात्सिद्धगीतश्रव

णतत्त्वज्ञानमुत्पन्नं॥ ततस्तच्चित्तविश्रांतये विवेकोयं क्रियत इति॥ कांड एवेदमुचितं तां
डवं॥ नन्वेवमप्यस्य विवेकस्य ज्ञानसमनंतरभावित्वेन मलिनवासनानुवृत्त्यभावा
त्तद्धद्वासनाभ्यासो नापेक्षित इति चेन्न॥ जनकस्य तदनुवृत्त्यभावेपि याज्ञवल्क्यभ
गीरथादेस्तदनुवृत्तिदर्शनात्॥ अस्ति हि याज्ञवल्क्यस्य तत्त्वज्ञत्वे वादिनामुषस्तक
होलादीनां च भूयान्विद्यामदः॥ तैः सर्वैरपि विजिगीषुकथायां प्रवृत्तत्वात्॥ ननु तेषां
विद्यांतरमेवास्ति न ब्रह्मविद्येति चेत्तन्न॥ कृष्यागतयोः प्रश्नोत्तरयोः ब्रह्मविषयत्वात्
॥ ननु ब्रह्मविषयत्वेपि तेषामापातज्ञानमेव न तु सम्यग्वेदनमिति चेत्त॥ तथा सत्य
स्माकमपि तदीयवाक्यैरुत्पन्नायां विद्यायामविद्यायामसम्यक्त्वप्रसंगात्॥ ननु
सम्यक्त्वेपि परोक्षमेवेति चेन्न यत्साक्षादपरोक्षाद्ब्रह्मेति मुख्यापरोक्षविषयत
यैव विशेषतः प्रश्नोपलंभात्॥ न चात्मज्ञानिनो विद्यामदः आचार्यैर्नाभ्युपगम्य

ते ॥ तथाचोपदेशसहस्र्यामभिहितं ॥ ब्रह्मवित्वं तथा मुक्त्वा स आत्मज्ञो न चेतर इति ॥ नै
ष्कर्म्यसिद्धावपि ॥ न चाध्यात्माऽभिमानोपि विदुषोस्त्यासुरत्वतः ॥ विदुषोप्यासुरश्चे
न्मुमुक्षोः फलं ब्रह्मदर्शनमिति चेन्नायं दोषः ॥ जीवन्मुक्तिपर्यंतस्य तत्र विवक्षित
त्वात् ॥ न खलु वयमपि जीवन्मुक्तानां विद्यामदमभ्युपगच्छामः ॥ ननु विजिगीषारा
त्मबोध एव नास्ति ॥ रागो लिंगमबोधस्य चित्तव्यायामभूमिषु ॥ कुतः शाड्वलता त
स्य यस्याग्निः कोटरे तरोरित्याचार्यैरभ्युपगमात् ॥ न रागादयः संतु कामं नैतावता बो
ऽपराध्यति ॥ उत्खातदंष्ट्रोरगवद्विद्या किं करिष्यति ॥ अत्र तैरेव रागाद्यभ्युपग
म्यते ॥ न चात्र परस्परव्याहतिः ॥ स्थितप्रज्ञे ज्ञानिमात्रे च न द्वयस्य व्यवस्थापनीयत्वा
त् ॥ ननु ज्ञानिनो रागाद्यभ्युपगमे धर्माधर्मद्वारेण जन्मांतरप्रसंग इति चेन्नैवं ॥ दग्
धबीजवद्विद्याहूर्वकारणमेव सुख्य रागादिवत्वेन पुनर्जन्महेतुत्वात् ॥ तानि

न तु दग्धबीजवदाभासा एव रागादयः एतदेवाभिप्रेत्योक्तं ॥ उत्पद्यमाना रागाद्या विवेक
ज्ञानवह्निना ॥ तदा तदैव दह्यंते कुतस्तेषां प्ररोहणमिति ॥ तर्हि स्थितप्रज्ञस्यापि ते संति
ति चेन्न ॥ तत्काले मुख्यवदवभासमानानामबाधकत्वात् ॥ रज्जुसर्पेपि मुख्यसर्पवदे
व तदानीं भीषयन्नुपलभ्यते तद्वदेतदाभासत्वानुसंधानात् पश्चान्न कोपि बाध इति चे
त ॥ चिरंजीवतु भवान्नयमेवास्मदभिमता जीवन्मुक्तिः ॥ याज्ञवल्क्यस्तु विजिगीषुदनगया
नहीदृशः चित्तविश्रांत्यै तेविद्वत्संन्यासस्य तेन करिष्यमाणत्वात् ॥ न केवलमस्य विजि
गीषा किं तु धनतृष्णापि महती जाता ॥ बहुतां ब्रह्मविद्यां ॥ पुरःस्थापितं सालंकार
गोसहस्रमयत्नत्परस्वयमेवेदमाह ॥ नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म
इति ॥ इतरान् ब्रह्मविदोऽवज्ञाय तु अयं काश्चिद्वचो नगीतिवेत् ॥ अयमपि तस्यापि रोदो
षः इतरे ब्रह्मविदस्त्वकीयं धनमनेनापहृतमिति मत्वा च क्रुद्धुः स्वयं च क्रोधे परवशा

श्रीकल्पंशायेनमारयामास॥ न चास्य ब्रह्मघ्नो मोक्षाभावः शंकनीयः॥ कौषीतकिनः समाम
नंति॥ नास्य केनचन कर्मणा लोको मीयते॥ न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्य
येति॥ शेषापि वैरकृतायामाप्यपंचाग्निन्यामिदमाह॥ यदि मेध्यवातसहस्राणि पयं कुरुते
॥ ब्रह्मघातलक्षाणि परमात्मवित्तम पुण्यैर्न च पापैः स्पृश्यते विमलः इति॥ किंबहुना॥ ब्रह्म
विदां याज्ञवल्क्यादीनामस्येव मलिनवासनानुवृत्तिः॥ भगीरथस्तु तत्त्वं विदित्वापि राज्यप
रिपालयन्मलिनवासनाभिभूतत्वविश्रांत्यभावेन सर्वं परित्यज्य पश्चाद्विश्राधिश्रांतवा
निति॥ वसिष्ठेनोपाख्यायते॥ अतः स्वकीयं वर्तमानमलिनवासनादोषं परकीयदोष
वत्तस्यास्तुत्वेन तत्प्रतीकारमभ्यसेत्॥ कृतेनैव तुल्यो लस्मर्यते यथा स्तुतिपुण्यपुरुषः कु
त्सितरदोषस्तु नरतः॥ तथा चैव निपुणः॥ स्वेषु कोनमुच्येत बंधनादिति॥ तत्त्वादोताव
द्विद्यामदस्यकः॥ प्रतीकार इति चेत्॥ किं स्वनिष्ठमदस्य परिविषयस्य किं वास्तव विष
यस्य परनिष्ठस्य॥ आद्ये भंगो वरुपंफकविज्ञविष्यतीति तिरंतरं भावयेत्॥ तद्यथा॥ श्वे

तकेतुर्विद्यायामदः प्रवाहणस्य राज्ञः सभां गत्वानेन पंचाग्निविद्यायां पृष्टोपि स्वयमजाना
नो निरुत्तरो राज्ञावकृविधं भर्त्सितः पितुः समीपमागत्य स्वं निर्वेदमुदाजहार पिता तु भि
मंदस्तमेव राजानमनुसृत्य तां विद्यां लेभे॥ दृप्तबालाकिश्वाजातशत्रुणा राज्ञाभिभूतो
दृप्यंसिंत्यजराजानमुपससाद॥ उषस्तकहोलादयश्व मदेन कथायां कृतापराजिताः॥ य
दास्यविषयः परनिष्ठोमदः प्रवर्तेत तदा मनः सयरोमांतिदत्वा एवमस्तुतां वासर्वथापिन
हानिरिति भावयेत्॥ यथाह॥ आत्मानयदि निंदंति स्वात्मानं स्वयमेव वदि॥ शरीरंय
निंदति सहायास्ते जनाम मेति॥ उत्कात्वादत आह॥ निंदावमानावत्यंतं भूषणं यस्य यो
गिनः॥ धीविक्षेपः कथं तस्य वाचाटैः क्रियतां मिदेति॥ नैः कर्मसिद्धौ वर्द्धस्के सपरिक
रे दोषतस्याविधारिते॥ यदि क्षेपं वदेत्तस्मै किं तत्त्वोद्धरि कुर्भवेत्॥ त छत्स्स्वलेत थास्व
स्मे देहे स्य केवेवेकतः॥ यदि दोषं वदेत्ताभ्यां किं तत्र विदुषो भवेत्॥ शोककर्षभियको

जीवन० ५०

धलो भमोदस्पृहादमः ॥ अहंकारस्पदनूपंतेजन्ममस्तूचनात्मनः ॥ निंदायाम्भूषणत्वंज्ञानं
कुर्वोद क्षितिं ॥ मन्निंदयायदिजनः ॥ परितोषमेति नन्वप्रयत्नसुलभोयमनुग्रहोमे ॥ श्रे
यार्थिनो हि पुरुषाः परतुष्टिहेतोर्दुःखार्जितान्यपि धनानि परित्यजंति ॥ सततसुजन
दैन्येनिःसुखेजीवलोके यदिममपरिवादात्प्रीतिमाप्नोति कश्चित् ॥ परिवदतु यथेष्टं
मत्समक्षं तिरोवा जगति हि बहुदुःखे दुर्लभः प्रीतियोग इति ॥ अवमानस्य भूषणत्वं
स्मर्यते ॥ तथा चरेत वै योगी सतां धर्ममदूषयन् ॥ जना यथावमन्येरन् गच्छेयुर्नैव संग
तमिति ॥ याज्ञवल्क्यवसिष्ठादीनां योस्वति श्वरनि श्चविधामदोत यो यथा ॥ विवेकेनप्र
तीकारस्तथाधनाभिलाषक्रोधयोरप्यवगंतव्यः ॥ अर्थानामर्जने क्लेशस्तथैव परि
रक्षणे ॥ नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः इति धनविषयो विवेकः ॥ क्रो
पि द्विविधः स्वनिष्ठः परविषयः परनिष्ठः स्वविषयश्चेति ॥ तत्र स्वनिष्ठं प्रत्येवमुक्तं अ

राम० ५०

पकारिणि चेत्कोपः कोपे कोपः कथं न ते ॥ धर्मार्थकाममोक्षाणां प्रसह्यपरिपंथिनि फलान्द्विलो
धर्मयत्नोर्थनाशनः स्वचेद पार्थस्वशरीरतापनः ॥ नन्वेहनामुत्रहिताय यः सतां समंतात्सिरो
षः समममाश्रयेत्कथमिति ॥ स्वविषयं प्रत्येवमीरितं ॥ नमेपराधः किमपदेवायस्वाश्रयजन्वा
लिने मन्नं ॥ कोपस्य मम वैराग्यदायिने दोषबोधिने इति ॥ धनाभिलाषक्रोधवधोपि तत्रा
भिलाषावपि द्विविके नाभिवर्तनीयौ ॥ तत्र योषिद्विवेको वसिष्ठेन दर्शितः ॥ मांसपांचालि
कायास्तु यंत्रलोलेयं जरे ॥ स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियाः किमिव शोभनं ॥ त्वङ्मांसर
क्तवाष्पांबु पृथक्कृत्वा विलोचने ॥ समालोकय रम्यं चेत्किं मुधा परिमुह्यसे ॥ मेरुशृंगत
टोल्लासिगंगाजललवयोयमा ॥ दृष्टा यस्मिन्स्तने मुक्ताहारस्योल्लासशालिता ॥ श्मशानेषु
दिगंतेषु स एव ललनास्तनः ॥ श्वभिरास्वाद्यते काले लघुपिंड इवांधसः ॥ केशकज्जल
धारिण्यो दुःस्पर्शा लोचनप्रियाः ॥ दुःकृताग्निशिखा नार्यो दहंति तृणवन्नरान् ॥ ज्वलंता
मति दूरेपि सरसा अपि नीरसाः ॥ स्त्रियो हि नरकाग्नीनामिंधनं चारु दारुणं ॥ कामर

नाम्ना किराते न विकीर्णा मुग्धचेतसां ॥ योगिनं रविहंगाणामंगबंधनवागुरा ॥ जन्मप
ल्वलमत्स्यानां चित्तकर्दमचारिणां ॥ पुंसां दुर्वासनारज्जुर्नारी बडिशपिंडिका ॥ सर्वेषां दोष
रत्नानां सुसमुद्गिकयाऽनया ॥ दुःखशृंखलया नित्यमलमस्तु मम स्त्रिया ॥ इतो मांसमि
तो रक्तमि ॥ तोऽस्थीनीति वासरैः ॥ ब्रह्मन्कतिपयैरेव याति स्त्री विशरारुता ॥ यस्य स्त्री
तस्य भोगेच्छा निःस्त्रीकस्य क्व भोगभूः ॥ स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेदि
ति ॥ पुत्रविवेकोऽप्यानंदे दर्शितः ॥ अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरं ॥ लब्धोऽपि
गर्भपातेन प्रसवेन च बाधते ॥ जातस्य ग्रहरोगादिः कुमारस्य च वर्त्तते ॥ उपनीतेऽप्यविद्या
धनक्रोधयोः पितृपुत्रविषयाणां मलिनवासनानां किं विवेके न प्रतीकारः ॥ तथा न्यासाम
पि पूर्वयोगं दोषैः स्वयुक्तान्दोषान्विविच्य प्रतिकारं कुर्यात् ॥ कृते च प्रतीकारे जीवन्
मुक्तिलक्षणं परमं पदं लभ्यते ॥ तदाह वसिष्ठः ॥ वासनानां परित्यागे यदि यत्नं करोषि

त्वं ॥ तत्ते शिथिलतां यांति सर्वाधिव्याधयः क्षणात् ॥ पौरुषेण प्रयत्नेन बलात्संत्यज्य वास
नाः ॥ स्थितिं बध्नासि चेत्तर्हि पदमासादयस्यलमिति ॥ ननु तत्र पौरुषः प्रयत्नो नाम स्वी
कृतविषयदोषविवेकः स च पुनः पुनः क्रियमाणोऽपि प्रबलेंद्रियव्यवहारेणाभिभूयते
॥ तदुक्तं भगवता ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इंद्रियाणि प्रमाथीनि हरं
ति प्रसभं मनः ॥ इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ॥ तदस्य हरति प्रज्ञां वायु
र्नावमिवांभसि ॥ एवं तर्ह्यत्र विवेकरक्षार्थमिंद्रियाणि निरोधव्यानि ॥ तदपि तत्रैवो
क्तं श्लोकाभ्यां दर्शितं ॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥ वशे हि यस्येंद्रि
याणि तस्य प्रज्ञा प्रतिष्ठिता ॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ॥ इंद्रियाणीं
द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठितेति स्मृत्यंतरेऽपि ॥ न पाणिपादचपलो न नेत्रचपलो
यतिः ॥ न च वाक्चपलश्चैवमिति शिष्टस्य लक्षणं ॥ एतदेवात्र संग्रहविवरणाभ्यां ॥

स्पर्शीकृतं ॥ अविज्ञः पंडकः ॥ पंगुरंधो बधिर एव च । मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न सं-
शयः ॥ इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते ॥ हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्ष-
ते । अद्य जातां यथा नारीं तथा षोडशवार्षिकीं ॥ शतवर्षां च यो दृष्ट्वा निर्विकारः स पंडक
ः । भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च । योजनान्न परं याति सर्वथा पंगुरेव सः ॥ ति-
ष्ठतो व्रजतो वा । श्रुत्वा यो न शृणोतीव बधिरः स प्रकीर्तितः । सांनिध्ये विषयाणां यः सम-
र्थोऽविकलेंद्रियः । सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते । परनिंदां न स्तुतिं कुर्यान्न किं-
चिन्मर्माणि स्पृशेत् । नातिवादी भवेत्क्वचित्सर्वत्रैव समो भवेत् ॥ न संभाषेत्स्त्रियं कांचि-
त्पूर्वदृष्टां च न स्मरेत् ॥ कथां च वर्जयेत्तासां न पश्येल्लिखितामपीति ॥ यथा कश्चि-
द्व्रती नैकैकनक्तोपवासमौनादिव्रतं संकल्प्य ॥ सावधानोऽप्रमाद कृत्वा सम्यक्पा-
लयति । नयमेवाति कृत्वा हि व्रते स्थितः सावधानो विवेकं पालयेत् । तदेव विवेकं

न्द्रियनिरोधस्यां दीर्घकालनैरंतर्यसत्कारसेवितं ॥ तास्यां मैत्र्यादि भावनानुमतिवि-
तासु भ्रानुरयं पङ्क्तिपामलिनवासनाः क्षीयंते ततो निर्वासोच्छूप वल्लिमेत्सैव
चेष्टुरूप प्रयत्नमंतरेण प्रवर्तमानाभिर्मैत्र्यादिवासनाभिर्लोके व्यवहरंतोऽपि
तदीयसाकल्यवैकल्यानुसंधानं विज्ञेन परित्यज्यतिरा तं ज्ञामनोराज्यादि रू-
पाः समस्तचेष्टाः प्रयत्नेन क्रांताः कृत्वा चिन्मात्रवासनामभ्यसेन्नस्वतस्तावदिदं
जगत् चिज्जडोभयात्मकं भासते ॥ यद्यपि काष्ठस्य शर्षादिजडवस्तु भासयेवैंद्रियाणि
स्पृशंति ॥ परांचि खानि व्यतृणत्स्वयंभूरिति श्रुतेः ॥ तथापि चैतन्यस्योपादानपरत्वा-
च्चैतन्यपूर्वकमेव जडं भासते ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभा-
तीति श्रुतेः । तथा सति घटपटादि समानस्य जडस्य प्रथमतो भासमानत्वे चैतन्यमेव वास्त-
वं रूपमिति निश्चित्य जडमुपेक्ष्य चिन्मात्रं चिन्मात्रं चिंतयन् वासयेत् ॥ एतच्च बलिमुक्त-

जीवन० ५२

योऽयमस्योत्तराभ्यां विस्तरेणावगम्यते॥ किमिदं सर्वं किंमात्रमिदं किंमयमेव च॥ क
स्त्वं कोऽहं क एते वा लोका इति वदाशु मे॥ चिदिदं सर्वमिति चिन्मात्रमिदं चिन्मयमेव च॥ चि
त्त्वं चिदहमेते च लोकाश्चिदिति संग्रहः इति॥ यथा सुवर्णाकारः कटकं विक्रीणन्न
पि वलयाकारस्य गुणदोषानुपेक्ष्य गुरुत्ववर्णयोरेव मनः प्रणिधत्ते तथा चि
न्मात्रे मनः प्रणिधातव्यं॥ यावता कालेन उं सर्वथैवोपेक्षा चिन्मात्रे मनसः प्रवृ
त्तिर्निःश्वासादिवत्स्वाभाविकी संपद्यते॥ तावंतं कालं चिन्मात्रवासनायां प्रयतेत
॥ तस्मादादावेव चिन्मात्रवासनास्तु॥ नन्वेवमपि लिंगवासनाति व्रत्तेः किमनेनांतर्ग
डुना मैत्र्याद्यभ्यासेनेति चेन्न॥ चिद्वासनाया अप्रतिष्ठितत्वप्रसंगात्॥ यथा कुट
मदार्ढ्यव्यतिरेकेण क्रियमाणमपि स्तंभकुड्यात्मकं गृहं न प्रतितिष्ठति॥ यथा चावि
रेचनेन प्रबलदोषमनिःसार्य सेवितमप्यौषधं नारोग्यकरं॥ तद्वत्॥ ननु ताम

राम० ५२

प्यपरित्यजेन्नेति चिन्मात्रवासनायाश्चापि परित्याज्यत्वमवगम्यते॥ तद्युक्तं चिन्मा
त्रं परित्यज्य क्वास्यस्य कस्यचिदुपादेयत्वाभावात्॥ नायं दोषः द्विविधा चिन्मात्रवास
ना॥ मनोबुद्धिसमन्विता तद्रहिता चेति॥ करणं मनः॥ कर्तृत्वोपाधिर्बुद्धिः॥ तत्राभ्यस
त्यमन्तोद्दमेकाग्रेण मनसा चिन्मात्रं भावयिष्यामीति॥ एतादृशेन कर्तृकरणानुसं
धानेन समन्विता प्राथमिकी या चिन्मात्रवासना ध्यानशब्दाभिधेया॥ तां परित्य
जेत॥ या त्वभ्यासपाटवेन कर्तृत्वाद्यनुसंधानसंधानरहिता समाधिशब्दाभिधे
या॥ तामुपाददीत॥ ध्यानसमाध्योरुक्तलक्षणं पतंजलिः सूत्रयामास॥ तत्र प्रत्ययैक
तानता ध्यानं॥ तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति॥ तादृशे समा
धौ दीर्घकालनैरंतर्यसत्कारैः सेविते स्थैर्ये तदृढ्या पश्चात्कर्तृकरणानुसंधानपरि
त्यागायेच्छिः प्रयत्नः॥ तमपि परित्यजेत॥ नन्वेवं सति तत्त्यागप्रयत्नोऽपि परित्याज्य

इत्यनवस्थाप्रसंगात्॥ नैवं॥ कृतकरणोत्पाद्येतस्य परत्वे कर्तृकत्वात्॥ यथाकुसुमितेऽजले पुष्पि
तं करजइतरद्रजसा सहस्वात्मानमपि निर्विशेषयति॥ तथात्मागार्यमयत्नः॥ कर्तृकर
णानुसंधानं निवर्तयन्स्वात्मानमपि निर्वृतिं पिप्याति॥ निवृत्ते तस्मिंत्कलिनवासः
नानां कस्तुरवासनानामपि ग्लानिः तान्निर्वासनं मनो वतिष्ठते एतदेवाभिप्रेत्य वसि
ष्ठ आह॥ तस्माद्वासनया बद्धं मुक्तं निर्वासनं मनः॥ एवमपि निर्वासनाभावमारूढस्तु वि
वेकतः॥ सम्यगालोचनात्सम्यग्वासना प्रविलीयते॥ वासनाविलये चेतः शममाया
ति दीपवदिति च॥ यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते यस्य निर्वासनो बोध
ः स जीवन्मुक्त उच्यते इति च॥ सुषुप्तवत्स्वनिरामितभावृत्तिर्नास्थितः सदा जाग्रति ये
न चेतसा॥ कालोन्वितो विधुरिवयः सदा बुधैर्निषेव्यते मुक्तः इतीरुसंमत इति च॥
हृदयात्संपरित्यज्य सर्वमेव महामतिः॥ यस्तिष्ठति गतव्यग्रः स मुक्तः परमेश्व

रः॥ समाधिमथ कर्माणि मा करोतु करोतु वा॥ हृदयेनात्तसर्वास्थो मुक्त एवोत्तमाशयः॥ नै
ष्कर्म्येण न तस्यार्थस्तस्यार्थोस्ति न कर्मभिः॥ न समाधानजप्याभ्यां यस्य निर्वासनं म
नः॥ विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः॥ संत्यक्तवासनान्मौनादृते नास्त्युत्तमं
पदमिति च॥ न च निर्वासनमनस्कस्य जीवनहेतुव्यवहारो लुप्येतेति शंकनीयं॥ यं
किंच क्षुरादिव्यवहारस्य लोपः किं वा समानमनस्कस्य जीवनहेतुव्यवहारो लुप्येते
ति शंकनीयं॥ यं किंच क्षुरादिव्यव॥ तत्राद्यमुद्दालकोऽनिरुध्वष्टवासनाहीनमप्येतच्च
क्षुरादीन्द्रियं स्वतः॥ प्रवर्तते बहिः स्वार्थे वासना नात्र कारणमिति द्वितीयं वसिष्ठो
निराचष्टे॥ अयत्नोपनतेष्वक्षिदृग्द्रव्येषु यथा पुनः॥ नीरागमेव पततितद्वत्का
र्येषु धीरधीरिति॥ तादृग्विधियाच्चार ध्यानोगं स एवोपपादयति॥ परिज्ञायोपभु
क्तो हि भोगो भवति तुष्टये॥ विज्ञाय सेवितश्चोरो मैत्रीमेति न चौरतां॥ अज्ञांकितोप

जीव०
५५

संसारमायामययात्रायां पृथ्याद्युगैः प्रेक्ष्यते न हृदेवं तैर्भोगश्रीरवलोक्यते ॥ इति ॥ भोगकाले
ऽपि सवासने भोगनिर्वासनानां विशेषो दर्शितः ॥ नापदि ग्लानिमायाति हिमपद्मं यथा निशि
॥ नेहते प्रकृतादन्यद्रमते शिष्टवर्त्मनि ॥ नित्यमापूर्णतामंतरक्षुब्धाब्धिंदुसुंदरी ॥ आ
पद्यपि न संकुचंति राज्ञीः शीतनामिव ॥ अब्धिवदृतमर्यादा भवंति नियताशयाः ॥ नि
यतिं न विमुंचंति महांतो भास्करा इवेति ॥ जनकस्यापि समाधिव्युत्थितस्येदमेव चा
रणं पठ्यते ॥ तस्मिन्नेव चिरं स्थित्वा जनको जनजीवितं ॥ व्युत्थितश्चिंतयामास मनसा
समनुत्तालितात्मना ॥ किमुपादेयमस्तीह यत्नात्संसाधयामि किं ॥ स्वतः स्थितविशुद्धस्य चित
ः का मेऽस्ति कल्पना ॥ नाभिवांछाम्यसंप्राप्तं संप्राप्तं न त्यजाम्यहं ॥ स्वस्थ आत्मनि तिष्ठा
मि यन्ममास्ति तदस्तु मे इति संचिंत्य जनको यथाप्राप्तक्रियामसौ ॥ असक्तः कर्तु
मुत्तस्थौ दिनं दिनपतिर्यथा ॥ भविष्यं नानुसंधत्ते नातीतं चिंतयत्यसौ ॥ वर्तमाननि

राम०
५५

मेषं तु हसन्नेवानुवर्तत इति ॥ तदेवं यथोक्तेन वासनाक्षयेण यथोक्ता जीवन्मुक्तिर्भ
विष्यतीति स्थितं ॥ इति जीवन्मुक्तिविवेके वासनाक्षयनिरूपणं ॥ अथ जीवन्मुक्ति
साधनं मनोनाशं निरूपयामः ॥ यद्यप्युक्ते वासनाक्षये सति अर्थान्मनो नश्यत्येव
॥ तथापि स्वातंत्र्येण मनोनाशेऽभ्यस्यमाने सति वासनाक्षयो रक्षितो भवति ॥ नवा
जिकल्पपुंडकल्पोऽभ्यासेनैव तत् ॥ इक्षामिति वाच्यं ॥ नष्टे मनसि अभिकल्पादीनामप्र
सिद्धत्वेनाभ्यासप्रयासाभावात् ॥ ननु मनोनाशाभ्यासस्तत्राप्यस्तीति चेत् ॥ अ
स्तु नाम तस्यावश्यकत्वात् तरेण मनोनाशोऽभ्यस्तोऽप्यजिकल्पादयो न स्थिरा भ
वंति ॥ अत एव मनसो नाशनीयत्वं जनक आह सहस्त्रांकुरसाखाग्रफलपल्लव
शालिनः ॥ अस्य संसारवृक्षस्य मनोमूलमिदं स्थितं ॥ संकल्प एव तन्मन्ये संकल्पो
पशमेन तत् ॥ शोषयामि यथा शोषमेति संसारपादपः ॥ प्रबुद्धोस्मि प्रबुद्धोस्मि दु

श्रीरामयत्नतः ॥ मनो नाम महाभित्तस्मिन्नंतर्मनसास्मि चिरं हताऽऽ वसिष्ठोप्याह ॥ अस्य संसारवृक्षस्य सर्वेष्विनः ॥ उपाय एक एवास्ति मनसः स्वस्य निग्रहः ॥ मनसोभ्युदयो नाशो मनोनाशो महोदयः ॥ ज्ञमनो नाशमभ्येति मनोऽज्ञस्य हि शृंखला ॥ तावन्निशीव वेताली वसंति हृदि वासनाः ॥ एकतत्वदृढाभ्यासाद्यावन्न विजितं मनः ॥ प्रक्षीणचित्तदर्पस्य निगृहीतेंद्रियद्विषः ॥ पद्मिन्य इव हेमंते क्षीयंते भोगवासनाः ॥ हस्तं हस्तेन संपीड्य दंतैर्दंतान्विचूर्ण्य च ॥ अंगान्यंगैः समाक्रम्य जयेदादौ स्वकं मनः ॥ एतावति धरणितले सुभगास्ते साधुचेतनाः पुरुषाः ॥ पुरुषकथासु च गण्या न जिता ये चेतसा स्वेन ॥ हृदयबिलेकृतकुंडल एककलनाविषो मनोभुजंगः ॥ यस्योपशांतिमगमत्तं दितं तमव्ययं वंदइति ॥ भिंत्वा नाभिः किलास्य दंतमालाश्च कस्य मर्दितः ॥ स्थीयते तन्न दाक्रम्य तन्न किंचिन्न बाधत इति । गौडपादाचार्यैरप्युक्तं । मनसो निग्रहायत्तमभयं

सर्वयोगिनां ॥ दुःखक्षयः प्रबोधश्चाप्यक्षया शांतिरेव च ॥ अर्जुनेनोक्तं ॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करमिति ॥ एवंदृच नेदृवयोगविषयं ॥ अत एव वसिष्ठ आह ॥ उपविश्योपविश्यैकचित्तकेन मुहुर्मुहुः ॥ न शक्यते मनो जेतुं विना युक्तिमनिंदितां ॥ अंकुशेन विना मत्तो यथा दुष्टमतंगजः ॥ विजेतुं शक्यते नैव तथा युक्त्या विना मनः ॥ मनोविलयहेतूनां युक्तीनां सम्यगीरणं ॥ वसिष्ठेन कृतं तावत्तत्तिष्ठस्व च मनः ॥ द्वे तु युक्ती तत्रापि द्विविधो निग्रहो मतः ॥ निग्रहो धीविक्रियाणां हठयोगोल्कनिग्रहात् ॥ कदाचिज्जायते कश्चिन्मनस्तेन विलीयते ॥ अध्यात्मविद्याधिगमः साधुसंगम एव च ॥ वासनासंपरित्यागः प्राणस्पंदनिरोधनं ॥ एतास्ता युक्तयः पुष्टाः संति चित्तजये किल ॥ सतीषु युक्तिष्वेतासु हठान्नियमयंति ये । चेतस्ते दीपमुत्सृज्य विनिघ्नंति तमोंऽजनैः ॥ विमूढाः कर्तुमुद्युक्ता

येद्रागाकृष्य सोजयं॥ ते निबध्नंति नागेंद्रमुन्मत्तं बिसतंतुभिः॥ निग्रहो द्विविधः हठनिग्रहः
क्रमनिग्रहश्चेति॥ तत्र चक्षुःश्रोत्रादि ज्ञानेंद्रियाणि वाक्पाण्यादिकर्मेंद्रियाणि च॥ तत्र
गोलकोपरोधमात्रेण हठान्निगृह्यंते तद्दृष्टांतेन मनोपि तथा निग्रहीष्यामीति मूढ
स्य भ्रांतिर्भवति॥ न तु तन्निगृह्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात्॥
अतः क्रमनिग्रह एवाभ्युपेयः॥ क्रमनिग्रहे चाध्यात्मविद्याप्राप्त्यादय उपायाः॥ सा च
विद्या दृश्यमिथ्यात्वं दृग्वस्तुनः स्वप्रकाशत्वं च बोधयति॥ तथा च सति तन्मनः स्वगो
चरेषु दृश्येषु प्रयोजनाभावं प्रयोजनवति दृग्वस्तुन्यगोचरत्वं च बुध्वा निरिंधनाग्नि
वल्लयमेवाप्स्यति॥ तथा चाश्रूयते॥ यथा निरिंधनो वह्निः स्वयोनावुपशा
म्यति॥ तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति॥ इति॥ यस्तु बोधित
मपि तत्त्वं न सम्यग्बुध्यते यश्च विस्मरति तयोरुभयोः साधुसंगम एवोपायः॥ सा

धवो हि पुनः पुनर्बोधयंति स्मारयंति च॥ यस्तु विद्यामदादिदुर्वासनया पीड्यमा
नो नानुवर्तितुमुत्सहते॥ तस्य पूर्वोक्तविवेकेन वासनापरित्याग उपायः॥ वासनानां
प्राबल्येन तु सकृन्मनाक्त्वे प्राणस्पंदनिरोधनमुपायः॥ प्राणस्पंदवासनयोश्चि
त्तप्रेरकत्वात्॥ तयोर्निरोधे चित्तशांतिरुपपद्यते॥ प्रेरकत्वं वसिष्ठ आह॥ द्वे बी
जे चित्तवृक्षस्य वृत्तिव्रततिधारिणः॥ एकं प्राणपरिस्पंदो द्वितीयं दृढवासना॥
सर्वगता संवित्प्राणस्पंदेन बोध्यते॥ संवेदनादनंतानि तथा दुःखानि चेतसः
॥ यथा नभस्थलमपि लोहकारादतिस्पंदधमंति तत्र वदसु धतवायुना सोग्नि
र्ज्वलति॥ तथा चित्तोपाशानेन कायस्थानीयेनान्तेनावतासंवित प्राणस्पंदे
न बोध्यमानाच्चित्तवह्निरूपेण प्रज्वलति तस्माच्चित्तवह्निना मका संवेदनात
दुःखानुत्पद्यते॥ सर्वं प्राणस्पंदे नष्टे नष्टे रिता चित्तोत्पत्तिः॥ स्मन्यं च रमण्व

जीवन०
५८

आदृ॥ यावत्संविद्विकलितामनुभूतां च राघव॥ चित्तस्योत्पत्तिमपरां वासनाजनि
तां शृणु॥ दृगास्तपदार्थैकभावना दृतिचंचलं॥ चित्तं संजायते जन्मजरामर
णकारणमिति॥ नकेवलं प्राणवासनयोः चित्तप्रेरकत्वं॥ किंतु परस्परप्रेरक
त्वमप्यस्ति॥ तदाह वसिष्ठः॥ वासनावशगतः॥ प्राणस्पंदस्तेन च वासना॥ जाय
ते चित्तबीजस्य तेन बीजांकुरक्रमइति॥ अतएवान्यतरनाशेनोभयनाशमपि
स्माह॥ द्वे बीजे चित्तवृक्षस्य प्राणस्पंदनवासने॥ एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि
नश्यतः इति॥ तयोर्नाशोपायं नानाफलं चाह॥ प्राणायामदृढाभ्यासैर्युक्त्या च गु
रुदत्तया॥ आसनाशनयोगेन प्राणस्पंदो निरुध्यते॥ असंगव्यवहारित्वात् भवा
भावर्जनात्॥ शरीरनाशदर्शित्वाद्वासना न प्रवर्तते॥ वासनासंपरित्यागाच्चित्तं
गच्छत्यचित्ततां॥ प्राणस्पंदनिरोधाच्च यथेच्छसि तथा कुरु॥ एतावन्मात्रकं मन्ये

राम०
५८

रूपं चित्तस्य राघव॥ यद्भावनं वस्तुनोंऽतर्वस्तुत्वेन रसेन च॥ यदा न भाव्यते किं
चिद्धेयोपादेयरूपि यत्॥ स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते॥ अवासनं
तोऽस्ततं यदा न मनुते मनः॥ अमनस्ता तदोदेति परमोपशमप्रदेति॥ अमनस्तानुप
येन्नां समनावमाह॥ चित्तपक्षदृढाक्रांतं न मित्राणि न बांधवाः॥ शक्नुवंति परित्रातुं
गुरवो न च मानवा इति॥ आसनाशनयोगेनेति यदुक्तं॥ तत्रासनस्य लक्षणं उपायं
फलं च त्रिभिः सूत्रैः पतंजलिः सूत्रयामास॥ स्थिरसुखमासनं प्रयत्नशैथिल्यानंत
समापत्तिभ्यां॥ ततो द्वंद्वानभिघात इति पद्मकस्वस्तिकादिना पादशोनदेरूपस्य न
रूपेण यस्य पुरुषस्यावस्थानं व्यथानुत्पत्तिलक्षणं सुखं॥ देहचलनराहित्यलक्ष
णं स्थैर्यं च संपद्यते तस्य तदेव मुख्यमासनं॥ तस्य च प्रयत्नशैथिल्यं लौकिकरू
उपायः॥ अलौकिकश्चागमनगरुकृत्यतीर्थयात्रास्नानयागहोमादिविषयो॥

यः सत्त्वो मानसप्रसादः तस्य शोधोपि स्पष्टं कर्तव्यं ॥ अन्यथा अप्रसादो दोषबाह्यादिदृष्टमुत्थाप्य यत्र
क्वापि प्रेरयति ॥ कर्णस्य दृष्टेरणौ धारणे धारयित्वा स्थैर्येणावस्थितो योयमनंतःसाए
वास्मीति ध्यानं चित्तस्यानंते समापत्तिः तथा यथोक्तासनसंपादकं महत्त्वं निष्पद्य
ते ॥ यत्तिद्वा सत्त्वी तो स्म सुखदुःखमानापमानादिद्वंद्वैर्यथा सर्वथा नाभिहन्यते ॥ तथा
विधस्य चासनस्य योग्यो देशः प्रदृश्यते ॥ विविक्तदेशो च सुखासनस्थः शुचिः समग्री
वशिरःशरीर इति समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः ॥
मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत ॥ सोयमासनयोग
ः ॥ अश्नानयोगस्तु मिताहारत्वं ॥ अत्याहारमनाहारं नित्यं योगी विवर्जयेत ॥
इति श्रुतिः ॥ भगवताप्युक्तं नात्यश्नतस्तु योगोस्ति न चैकांतमनश्नतः ॥ न चाति स्वप्न
शीलस्य जाग्रतो नैव चार्जुन ॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबो

धस्य योगो भवति दुःखहेति ॥ जितासनस्य प्राणायामेन मनोनाशः ॥ श्वेताश्वतरै
राम्नायते ॥ त्रिरुन्नतं स्थाप्य समं शरीरं हृदींद्रियाणि मनसा संनिवेश्य ॥ ब्रह्मोडु
पेनैव प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥ प्राणान्प्रपीड्येह संयुक्तचे
ष्टः ॥ क्षीणे प्राणे नासिकयोच्छ्वसीत ॥ दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो
धारयेताप्रमत्त इति ॥ योगाद्विविधः ॥ विद्यामदाद्या सुरीसंपद्हिहस्येति ॥ पयोरा
घस्य ब्रह्मध्यानेन मनसि निरुद्धे सति तन्नांतरायकतया प्राणो निरुध्यते ॥ तं प्र
ति त्रिरुन्नतमिति मंत्रः पठितः द्वितीयस्याभ्यासेन प्राणे निरुद्धे तत्त्वांतरायकतया
मनो निरुध्यते ॥ तं प्रति प्राणान्प्रपीड्येति मंत्रः प्रकृतः प्राणपीडनप्रकारोवस्य
ते ॥ तेन च पीडनेन युक्तचेष्टो भवति ॥ मनश्चेष्टाविमर्घदादवो निरुध्यंते ॥ प्राण
निरोधेन चित्तदोषनिरोधे दृष्टांतोन्यत्र श्रूयते ॥ यथा पर्वतधातूनां दह्यंते धमता

जी०वृ०म०
६०

मत्वाः ॥ तच्चेंद्रियकृतादोषाद्दह्यते प्राणस्य निग्रहादिति ॥ अत्रोपपत्तिर्वसिष्ठेन दर्शि-
ता ॥ मनः प्राणपवनस्पंदः चित्तस्पंदः स एव हि ॥ प्राणस्पंदक्षये यत्नः कर्तव्यो धीमतो
बुद्धैरिति मनोवाक्चक्षुरादीन्द्रियदेवताः स्वस्वव्यापारं निरंकुशं व्यामः इति व्रतं दध्र-
स्ताः श्रमरूपेण मृत्युना ग्रस्ताः स च मृत्युः प्राणेनाभासक्तो निरंतरमुच्छ्वासनिश्वासौ
कुर्वन्नपि प्राणो न श्राम्यति ॥ तदा विचार्य देवताः प्राणरूपं प्राविशन् ॥ सोयमर्थो
वाजसनेयिभिराम्नायते ॥ अयं वै नः श्रेष्ठो यः संचरंश्चासंचरंश्च न व्यथते ॥ अथो
न रिष्यति हंतास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एते-
नाख्यायंते प्राणा इति ॥ अत इंद्रियाणां प्राणरूपत्वं नाम प्राणाधीनचेष्टावत्वं
तथोत्तर्यामिब्राह्मणे सूत्रात्मप्रस्तावे श्रूयते वायुर्वै गौतम तत्सूत्रं वायुना वै गौ-
तम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंति ॥ तस्मा-

राम०
६०

द्वै गौतम पुरुषं प्रेतमाहुः व्यस्रंसिषतास्यांगानीति वायुना हि गौतम सूत्रेण संदृब्धा-
नि भवंतीति ॥ अतः प्राणमनःस्पंदनयोः सहभावित्वात् ॥ प्राणनिरोधे मनो निग-
ह्यते ॥ ननु सहस्पंदो न युक्तः सुषुप्तौ चेष्टमानेऽपि प्राणे मनसोऽचेष्टमानत्वात् तन्-
॥ विलीनत्वेन तदानीं मनस एवाभावात् ॥ ननु क्षीणे प्राणे नासिकयोः श्वसितेति-
वं व्याहतं ॥ न हि क्षीणस्य मनसस्तज्जीवितं संभवतः ॥ नापि श्वसतो जीवतः प्राणाप-
र्वतमारोहता ॥ शीघ्रं धावता वा श्वासवेगो यावान् भवति ॥ न तावान् स्थितस्या-
सीनस्य श्वासो विद्यते ॥ तथा प्राणायामपाटवोपेतस्येतरस्मादल्पश्वासो भवति
॥ एतदेवाभिप्रेत्य स्मर्यते भूत्वा तत्रायतप्राणः शनैरेव समुत्सृजेदिति यथा दुष्टै-
रश्वैरुपेतो रथो मार्गे त्यक्त्वा यत्र कुत्रापि नियते ॥ स एव सारथिना रुद्धः अश्वैरकृशा-
कृष्टस्तु स्वमार्गे प्रवर्तते धीयते ॥ तथैवाहृदयेनासनादिभिरितस्ततो नीयमानं चित्तं प्राण-

जो॰ब॰
४१

रजोहरं दधीरितायां धारयेत॥ प्राणस्य पीडेति शिष्टमुक्तं॥ तत्र प्राणपीडने प्रकारोऽन्यत्र
प्युक्तः॥ सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥ त्रिः पठेदायतप्राणः प्राणायामः स
उच्यते॥ प्राणायामास्त्रयः प्रोक्ता रेचककुंभकपूरकाः॥ उत्क्षिप्य वायुमाकाशं शून्यं कृ
त्वा निरात्मकं॥ शून्यभावेन युंजीत रेचकस्येति लक्षणं॥ वक्त्रेणोत्पलनालेन तोय
माकर्षयेन्नरः॥ एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणं॥ नोच्छ्वसेन्नैव निःश्वसे
न्नैव गात्राणि चालयेत॥ एवं तावन्नियुंजीत कुंभकस्येति लक्षणं॥ अत्र शरीरांतर्ग
तं वायुं बहिर्निःसार्य निःशरीरमाकाशं शून्यं निरात्मकं वायुरहितं कृत्वा॥ स्वल्प
मपि वायुमप्रवेश्य शून्यभावेन वर्तियमेतद्रेचकं भवति॥ कुंभको द्विविधः आं
तरो बाह्यश्च॥ तदुभयं वसिष्ठ आह॥ अपाने स्तंगतः प्राणो यावन्नाभ्युदितो हृदि ता
वत्सा कुंभकावस्था योगिभिर्यानुभूयते॥ बहिरस्तंगते प्राणे यावन्नापान उद्गतः॥

राम॰
६१

तावत्पूर्णसमावस्था बहिष्ठं कुंभकं विदुः॥ इति॥ तत्राभ्यंतरकुंभकविरोधिनि
ःश्वासो बाह्यकुंभकविरोधी गात्रचालनमुभयविरोधि तन्निषेधति निःश्वासोच्छ्वास
योरन्यतरस्यावश्यंभावित्वात॥ एतेन निरुच्छ्वासनानंतरभाविनं प्राणाया
मं स्तंतत्रयापास्त॥ तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥ ननु कुं
भके गत्यभावेऽपि रेचकपूरकयोर्हि श्वासप्रश्वासगतो विद्यते इति चेन्नाधिक
मात्राभ्यासेन स्वभावमात्रसिद्धयोः श्वासप्रश्वासगतेर्विच्छेदात॥ तमेवाभ्यासं सूत्र
यति॥ बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्म इति॥ रेच
को बाह्यवृत्तिः पूरकोऽभ्यंतरवृत्तिः॥ कुंभकस्तंभवृत्तिः॥ तत्रैते देशादिभिः परिक्ष
णोक्षय॥ तद्यथा स्वभावसिद्धे रेचके हृदयान्निर्गत्य नासाग्रसंमुखे द्वादशांगुल
पर्यंते वायुः समाप्ते॥ अभ्यासरेचके नवपंचाशतिनाभ्यादिमदेशात्क्षोभेणांतर्धि

श्वासः समाप्यते ॥ अभ्यासे तु क्रमेण नासारंध्राद्वायुर्निर्गच्छति ॥ चतुर्विंशत्यंगु-
लपर्यंतं षट्त्रिंशदंगुलपर्यंतं वा समाप्तौ ॥ अत्र रेचके प्रयत्नातिशयेन सति नासा-
दिप्रदेशात्सीमेणां तदनिष्ठे तु शाकाबहिःस्थस्तस्मिन् संधत्वात्तच्चालनेन निश्चेतव्यः
॥ अयं देशोऽपरिक्षा ॥ रेचककाले प्रणवजपावृत्तयो दशविंशतित्रिंशदित्यादिका-
लं परिक्ष्यम् अस्मिन् मासे प्रतिदिनं दशरेचकाः ॥ आगामिमासे विंशतिः ॥ तत्र-
र मासे त्रिंशदित्यादिकालपरिक्षाभिः ॥ संख्यापरीक्षा यथोक्तदेशकाले विशिष्ट-
॥ प्राणायामा एकस्मिन् दिने दश विंशति त्रिंशदित्यादि तिः संख्यापरिक्षा ॥ पूरकेऽप्ये-
वं योजनीयं ॥ यद्यपि कुंभके देशविशेषो नावगम्यते ॥ तथापि कालसंख्याव्या-
प्तिरवगम्यत एव ॥ यथावती भूततूलपिंडः प्रसार्यमाणो विरलः सूक्ष्म एव
भवति ॥ तथा प्राणोऽपि देशकालसंख्याधिक्येनाभ्यस्यमानो दीर्घोऽतिसूक्ष्मश्च यात

क्ष्मश्च संपद्यते ॥ रेचकादिभ्यस्त्रिभ्यो भिन्नं प्रकारं सूत्रयति । बाह्याभ्यंतरविषयाक्षेपी
चतुर्थ इति ॥ यथा नासिका सर्वं वायुं विरेच्यानंतरं क्रियमाणो बहिः ॥ कुंभको यथा वा-
न्तर्वायुमापूर्यानंतरं क्रियमाणोंतरं कुंभक इति ॥ रेचकपूरकावनादृत्य केवलकुं-
भकोऽभ्यस्यमानः पूर्वत्रयापेक्षया चतुर्थो भवति ॥ नितांतमादिम बलदोषप्रयुक्ता-
नां रेचकादित्रयं ॥ दोषरहितानां चतुर्थ इति विवेकः ॥ प्राणायामफलं सूत्रयति ॥
ततः क्षीयते प्रकाशावरणमिति ॥ प्रकाशस्य सत्त्वस्यावरणं तमो निद्रालस्यादि
हेतुः ॥ तत्क्षयो भवति ॥ फलांतरं सूत्रयति ॥ धारणासु योग्यता मनस इति ॥ आधा-
रनाभिचक्रहृदयभ्रूमध्यब्रह्मरंध्रादि देशविशेषे चित्तस्थापनं धारणा देश-
बंधश्चित्तस्य धारणेति सूत्रेण उक्ता ॥ श्रुतिश्च ॥ मनःसंकल्पकं ध्यात्वा वा संक्षिप्यात्म-
नि बुद्धिमान् ॥ धारयित्वा तथात्मानं धारणा परिकीर्तितेति ॥ प्राणायामेन रजोगुण-

कारिणा चित्तचलनात्समो गुणकारिता तादृशस्यादेशस्य निवारितं मनः॥ तस्यां धारणायां योगं
भवति। सा एषा धारणास्या सौयत्ना च गुरूपदेशतया॥ इत्यत्र सेनापुक्तिन्नामेन योगिजनस्य
सिद्धं शिरोरूपमेरुवालसंज्ञिकाग्रे नाभिकाभ्रमणं नासिकाग्र हृदये ज्योतिर्ध्यानं विस्म
ति प्रदीपधसेवाविसेवमादिकांगरहाते। पदेष्वं आयाल्लभविषा साधुसंग मवासना
क्षयपर्यणनिरो॥ धारणास्थितना न्निदर्शिताः॥ अथ तदुपायभूतं समाधिं वक्ष्यामः॥
पंचभूमस्तु पेतस्य चित्तस्य भूमित्र यथा सागेनाचहिष्टं भूमिष्ठ्यं समाधिः॥ भूमय
श्च योगभाष्यकृता दर्शिताः॥ क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूम
य इति॥ आसुरसंपद्वीका ज्ञानान्देहवासनामनुवर्तमानं चित्तं क्षिप्तं॥ निद्रात
न्द्राद्यग्रस्तं मूढं॥ काश्चित्कदाचिद्ध्यानयुक्तं क्षिप्तात् सिद्धिशिष्टतया विक्षिप्तं॥ तत्र क्षिप्तमूढ
योः समाधिशंकैव नास्ति॥ विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्यो

गपक्षेन वर्तते। विक्षेपांतर्गततया दहनांतर्गत तंयाद दहनांतर्गत वीतवीजवस्सरा
एव विनश्यति यस्तु एकाग्रे चेतसि भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कु
र्मबंधनानि श्लथयति निरोधमभिमुखी करोति स संप्रज्ञातयोग इत्याख्यायते॥
सर्ववृत्तिनिरोधे तु असंप्रज्ञातसमाधिः तत्र संप्रज्ञातसमाधिः तत्र संप्रज्ञातस
माधिभूमिमेकाग्रतां सूत्रयति॥ शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणा
म इति शांतो नीतोदितौ वर्तमानः प्रत्ययः चित्तवृत्तिः॥ अतीतप्रत्ययोपपर्यंग
च्छति तमेव चेपुदितो गच्छति यावन्नदानाद्यु भौ तुल्यौ भवतः तदास्य चित्तस्य परिणा
म एकाग्रतेत्युच्यते॥ एकाग्रताभिवृद्धिलक्षणं समाधिं सूत्रयति॥ सर्वार्थतैका
ग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणाम इति॥ रजोगुणेन चालयमानं चित्तं
क्रमेण सर्वार्थपदार्थान्गृह्णाति॥ तस्य रजोगुणस्य निरोधाय प्रतिक्षणमाणेन यो

गिनाप्रयत्नविशेषेणादिने दिने मनोवृत्तिनाक्षीयते॥ एकाग्रता चोदेति॥ तादृशचित्त-
स्यपरिपाकः समाधिरुच्यते॥ तस्य समाधेरष्टांगेषु यमनियमासनप्राणा-
यामप्रत्याहाराः पंच बहिरंगाणि तत्र यमान् सूत्रयति॥ अहिंसासत्यास्तेयब्रह्म-
चर्यापरिग्रहा यमा इति॥ हिंसादिभ्यो निषिद्धधर्मेभ्यो निवर्तयंतीति यमाः॥
नियमान् सूत्रयतीति॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इ-
ति॥ जन्महेतोः काम्यधर्मान्निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयंतीति॥ अत एवं त-
ति नियमाः यमनियमयोरनुष्ठानवैलक्षण्यं स्मर्यते यमान् सेवेत सततं न
कुर्यान्नियमान्॥ बुधः॥ यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन्॥ पत-
तीति यमयान् यमेष्वसक्तो नतु यमवान्नियमालस्योवसीदति॥ इमे यमनियम-
मौ समीक्ष्य बुद्धस्य मवकृतेष्वस्तनु सनु संदधीत बुद्धिं॥ यमनियमफलानि

सूत्रयति॥ तस्मान्निर्वैरत्यागः॥ क्रियाफलाश्रयत्वं॥ रत्नोपस्थानं॥ वीर्यलाभं
जन्मकथंतासंबोधः॥ शौचात्स्वांगजुगुप्सा परैरसंगः॥ सत्वशुद्धिःसौमनस्यैकाग्र्येंद्रि-
यजयात्मदर्शनयोग्यत्वानि भवंति॥ संतोषादनुत्तमः सुखलाभः॥ कायेंद्रियबुद्धिसो-
शुद्धिपापक्षयस्तपसः॥ स्वाध्यायादिष्टदेवतासंप्रयोगः॥ समाधिसिद्धिरीश्वरप्रणि-
धानादिति॥ आसनप्राणायामौ व्याख्यातौ प्रत्याहारं सूत्रयति॥ स्वविषयासंप्र-
योगे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहार इति॥ शब्दस्पर्शरसरूपगं-
धादिविषयेभ्यो निवर्तिताः श्रोत्रादयः चित्तस्वरूपमनुकुर्वंती वश्यवर्तिष्यंते॥
कुति श्रमवति॥ शब्दादिविषयान्पंचमनसश्चापि चंचलं॥ चिंतयेदात्मनो रश्मीन्
प्रत्याहारः स उच्यते इति॥ शब्दादयो विषयास्तेषां श्रोत्रादिनाते श्रोत्रादयः पंचम-
नः षष्ठं नामेषामेषाम नात्मरूपेभ्यः श्रोत्रादिभ्यो निवर्त्तमानमात्मरश्मित्वेनचिं-

जीवन० ६५

नंनेत्रस्रोतसा हृदयः स्वस्वार्थः प्रत्याहारफलं सूत्रयति। ततः परमवक्ष्यमाणं त्रियाणामि
ति। धारणाध्यानसमाधीनां त्रिभिः सूत्रयति॥ देशबंधश्चित्तस्य धारणा॥ तत्र प्रत्य
यैकतानता ध्यानं। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः॥ आधारादिदेशा
:हृदयपुंडरीकाः देशांतरस्त्रयते॥ मनः संकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान्। धा
रयित्वा तथात्मानं धारणा परिकीर्तितेति॥ यच्च सर्ववस्तु संकल्पकं मनः॥ तदात्मा
नमेव संकल्पयतु न त्वन्यदित्येवं धिषि विधः प्रयत्नः आत्मनि क्षेपणः॥ प्रत्ययस्ये
कतानता तात्त्विकविषयः प्रवाहः स्वबद्धिविधः। विच्छिद्य विच्छिद्य जायमानः॥ संत
तश्चेति॥ स्वाबुभौ क्रमेण ध्यानसमाधी भवतः तदुभयं स्वर्वानुभवयोगिनां द
र्शितं विवेकाग्र्याद्यतो ज्ञानं बुभौ सुकं सम्पद्यते॥ तत्र ध्यानमता ध्यानं यथा
वदुपदिश्यते। विलोप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्॥ परिशिष्टं तु सन्मा

राम० ६५

त्रं चिदानंदं विचिंतयेदिति॥ ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना संप्रज्ञातसमा
धिः स्याद्ध्यानाभ्यासप्रकर्षत इति॥ ननु संप्रज्ञातसमाधिरंगिनकथं ध्यानानंत
रभाविनो हठयोगस्य समाधेः स्थाने उदाहृयते॥ नायं दोषः॥ आत्मभेदाभावात्॥ य
थ वेदमधीवेदमधीयानो माणवकः पदे पदे स्खलन् पुनः॥ समादधातीति॥ अधी
तवेदस्सम्यवधानो न स्खलति॥ अध्यापकोऽपि रवधानस्तं कुर्वन्नपि न स्खल
ति। तथाविधप्येकस्यापि परिपाकतारम्येन ध्यानसमाधिसंप्रज्ञातानां वान्तरभेदो
ऽवगंतव्यः धारणात्रयं मनोविषयत्वात्॥ संप्रज्ञाते ऽतरंगं यमादिपंचकं तु ब
हिरंगं तदेतत्सूत्रयति॥ त्रयमंतरंगं पूर्वेभ्य इति ततः केनाप्युपायेनांतरंगं प्रय
मलब्धे बहिरंगं लाभायनापि प्रयासः कर्तव्यः॥ यद्यपि यतं न लिना भौतिकमूर्त
तन्मात्रैन्द्रियाहंकारादिविषयाः॥ संप्रज्ञातसविकल्पसमाधयो वृत्तिध्यानं पंचि

जीवन०
६६

नाद्यापि तेषामंतस्थानादि सिद्धिहेतुतया समाधिविरोधिता न्यं स्माभिस्तत्रादरः
क्रियते॥ न याचस्तत्रितं तेन समाधावुपसर्गासुखास्येति सिद्धय इति॥ स्थान्युपमंत्रणे संग
स्मयाऽकरणं पुनरनिष्टप्रसंगादिति च॥ स्थानिते देवाः॥ उद्दालकोदेवै रामंत्रितोप्य
वज्ञाय देवान्निर्विकल्पसमाधिमेव चकारेति ज्ञापाख्यायते॥ प्रश्नोत्तराभ्यामप्येवा
गम्यते॥ श्रीरामः॥ जीवन्मुक्तशरीराणां कथमात्मविदांवर॥ शक्तयो नेह दृश्यंते त्वा
काशगमनादिकाः॥ वसिष्ठः॥ अनात्मविदमुक्तोपि सिद्धिजालानि वांछति॥ द्रव्य
मंत्रक्रियाकालयुक्त्याप्नोत्येव राघव॥ नात्मनस्यैष विषयः आत्मज्ञो ह्यात्म
मात्रदृक्। आत्मनात्मनि संतृप्तो नाऽविद्यामनुधावति॥ ये केचन जगद्भावास्ता
नऽविद्यामयान्विदुः॥ कथं तेषु किलात्मज्ञस्त्यक्ताऽविद्यो निमज्जति॥ द्रव्यमंत्रक्रि
याकालयुक्तयः साधुसिद्धिदाः॥ परमात्मपदप्राप्तौ नोपकुर्वंति काश्चन॥ सर्वेच्छा

राम०
६६

जालसंशांतावात्मलाभोदयो द्विजः॥ स कथं सिद्धिवांछायामग्नचित्तेन लभ्यते
इति॥ न केचन जगद्भावास्तत्त्वज्ञं रंजयंत्यमी॥ नागरं नागरीकांतं कुग्रामललना
इव॥ अपि शीतरुचावर्के सुतीक्ष्णेंदुमंडले॥ अप्यधःप्रसरत्यग्नौ जीवन्मुक्तो
न विस्मयी॥ चिदात्मन इमा इत्थं प्रस्फुरंतीह शक्तयः॥ इत्यतः॥ तस्मात्तत्रादरः कृ
तः अथ पंचमभूमिरूपो निरोधसमाधिर्निरूप्यते॥ तं च निरोधं सूत्रयति॥ व्युत्था
ननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणा
म इति॥ व्युत्थानसंस्काराः समाधिविरोधिनस्ते चोद्दालकस्य समाधौ उदाहृताः॥
कदा हं सुक्रमनने पदे परमपावने। चिरं विश्रांतिमेष्यामि मेरुशृंगे इवांबुदः॥ इ
ति चिंतापरवशो बालादुद्दालको द्विजः पुनः पुनः स्वपविन्द्रूपनाभ्यासं चकारह
॥ विषयैर्नीयमानेन तु चित्तमर्कटचंचलं। न पश्ये मे समाधानेप्रतिष्ठां प्रीतिदायिनीं॥

योगवृ० ६७

कस्यचिद्ब्राह्मणस्य गृहपरित्यागादनंतरं ॥ तस्माद्गच्छन्त्रितकपिरांतरस्य र्सिंच याम
॥ कदाचिदितरस्य ग्रामे ग्रंथो विक्रयद्मादादे ॥ तस्योऽपि यमनो याति कदाचित् अस्तयाः
क्षिवत ॥ कदाचिदुदिताकर्मिं तेजः पश्यति विस्तृतं ॥ कदाचित्केवलं व्योमकं कारा
द्वितित्केवलं व्योम कदाचिल्लिंगिडं तमः ॥ आगच्छतो यथा रूपम् पश्यति भासा वपुः
नः आच्छिदनमन साक्षरः खड्गे सिवरयोरि पूरन ॥ विकल्पाभ्यास मात्रेण सोपरस्य
तद्ददयांबरो ॥ तमस्तु त्रिविवेकार्कं लोलकुसलमेचकं ॥ तमस्तु त्सादयासम्यकूना
नविवस्थता ॥ तमस्तु यतैतेरत्वांतैतेजःपुंजं ददर्शि सः ॥ तत्खलु वालावस्थलाज्ञानां
वनंबालस्व वह्निपा तेजस्तु परस्ये तस्य दूर्णमानं मनो मुने ॥ निद्रा प्रवदगाल्लिंगं
ता मप्याशु लुलावसः ॥ निद्रात्तु पगमे तस्य व्योमसंवित्मघ्ययो ॥ व्योमसंवि
दितष्टायां मूढं तस्याभवन्मनः ॥ सोऽहमप्येष मनः सत्तमसाक्षीमहाशयः ॥ तत

राम० ६७

स्तेजस्तमो निद्रामोहादिपरिवर्जितं ॥ कामप्यवस्थामासाद्य विद्राक्षाम मनः क्ष
णमिति ॥ तएते व्युत्थानसंस्कारा निरोधहेतुना योगिप्रयत्नेन प्रतिक्षणं चाभिभू
यंते ॥ तद्विरोधतश्च निरोधसंस्काराः प्रादुर्भवंति ॥ तथा सति निरोध एकैकस्मि
न्क्षणे चित्तमनुगच्छति ॥ सोयमीदृशश्चित्तस्य निरोधपरिणामो भवति ॥ ननु
प्रतिक्षणपरिणामिनो हि भावाः ॥ ऋते चितिशक्तेरिति न्यायेन चित्तस्य
सर्वदा परिणामसद्भावादेतत्कथं ॥ वाढं तत्र व्युत्थितचित्तस्य वृत्तिप्रवाहः स्फु
टः ॥ निरुद्धचित्तस्य तु कथमित्याशंक्योत्तरं सूत्रयति ॥ तस्य प्रशांतवाहिता संस्का
रादिति यथाप्रसमिद्धाज्याहुतिप्रक्षेपे वह्निरुत्तरवृद्ध्या प्रज्वलति ॥ यसमिदादिक्षये
प्रथमक्षणे किंचिच्छाम्यति ॥ उत्तरोत्तरक्षणेषु शांतिर्वर्द्धते ॥ तथा निरुद्धचित्त
स्योत्तरोत्तरनिरोधिकः प्रविवृक्षये प्रथमक्षणे किंचिच्छाम्यति ॥ उत्तरोत्तरे सष्ठा रक्ष

गी०भ०
६८

त्रामः प्रवर्द्धते तत्र हर्षप्रसाममजनितः संस्कार एवोत्तरत्रत्रामस्य कारणं ॥ तामेतां प्र
शांतवाहितां भगवाञ्छिष्यस्य स्पष्टमुदाजहार ॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ यथा दीपो निवातस्थो नेंगते सोपमा
स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥ यत्रोपरमते चित्तं निरुद्धं यो
गसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ सुखमात्यंतिकं यत्तद्बुद्धिग्रा
ह्यमतींद्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ यं लब्ध्वा चापरं लाभं मन्यते
नाधिकं ततः ॥ यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ तं विद्याद्दुःखसंयो
गवियोगं योगसंज्ञितं ॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसेति ॥ निरोधसमा
धेः साधनं सूचयति ॥ विरामप्रत्ययाभ्यासपूर्वकः संस्कारशेषोऽन्य इति ॥ विरामो वृत्त्यु
परमस्तस्य प्रत्ययः कारणं वृत्त्युपरमार्थः पुरुषप्रयत्नः तस्याभ्यासः पौनःपुन्येन

राम०
६८

संपादनं तत्पूर्वकः सजातीयः संस्कारः अनंतरातीतस्त्रसंप्रज्ञातसमाधेरुक्तत्वात् ॥ तदं
पेक्षोयोऽन्यो ऽसंप्रज्ञातसमाधिः। तत्र वृत्तिरहितत्वात् दुर्लक्ष्यत्वात्संस्काररूपेणावि
त्तेद्विश्यते ॥ विरामप्रत्ययजन्मत्वं भगवानविस्पष्टमाह ॥ संकल्पप्रभवान्कामां
स्त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं विनियम्य समंततः। शनैः शनैरुपरमेद्बुद्ध्या
धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ यतो यतो निश्चरति
मनश्चंचलमस्थिरं ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति ॥ काम्यमाना
ः स्रक्चंदनवनितापुत्रमित्रगृहक्षेत्रादयो मोक्षशास्त्रकुशलविवेकिजनस
म्यग्दृष्टिभिर्दोषैरुपेताः कामास्तद्विषयास्तान्दोषानाच्छाद्य तेषु सम्यक्संक
ल्पयंति ॥ तस्माद्व्रतकल्पादिदं मे स्यादित्येवंरूपाः कामाः प्रभवंति ॥ तथा च स्म
र्यते ॥ संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः ॥ काम जानामि ते मूलं संक

नीवनं
६९

ल्पात्किलजायसे॥नत्वांसंकल्पयिष्यामिसमूलस्त्वंविनंक्ष्यसि॥तत्रविवेकेनविवेकेन
विषयेषुसाक्षात्कृतेषुतुनानृतंतपायसइवकामास्पदत्वे॥स्रक्चंदनवनितादिवि
षयेष्विवब्रह्मलोकादिष्वणिमाद्यैश्वर्येषुचकामास्पदत्वमित्यभिप्रेत्यसर्वाणितु
क्तं॥मासोपवासवृत्तिनातस्मिन्मासेअन्येष्वपिकामःपुनःपुनःरुदेतितदस्म
न्नृदित्यशेषतइत्युक्तं॥कामत्यागोमनःपूर्वकस्यवस्तुमात्रेपिचक्षुरादीनांरूपा
दिषुस्वभावात्लिप्सायाप्रवृत्तिःसापिप्रयत्नयुक्तेनमनसैवनियंतव्या॥स्वे
तादर्शनादिष्वपिअननुसरणायसमंततइत्युक्तं॥भूमिकाजयक्रमेणोपरम
विवक्षितत्वाच्छनैःशनैरित्युक्तं॥ताश्चभूमिकाश्चतस्रःकठवल्लीषुश्रूयंते॥य
च्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि॥ज्ञानमात्मनिमहतितद्यच्छेच्छांतआ
त्मनिमहतितद्यच्छेच्छांतआत्मनीति॥वाग्व्यापारोद्विविधःसोलौकिकोवैदिकश्च॥तत्र

लौकिकस्यबहुविक्षेपकत्वात्॥व्युत्थानकालेपियोगीतंपरित्यजेत्॥अतएव
स्मर्यते॥मौनंयोगासनंयोगस्तितिक्षैकांतशीलता।निःस्पृहत्वंसमत्वंचसप्तैतान्येक
दंडिनइति॥जपादिकंचनिरोधसमाधौपरित्यजेत्॥सेयंवाग्वृत्तिःप्रथमातांभू
मिंप्रयत्नमात्रेणारूढिपर्यंतंदिनेष्वापिवर्जनैरेवदिवंदिनंजित्वापश्चात्द्वितीयायांम
नोभूमौयतेत॥अत्रयथाबहुभूमीःप्रयासस्तथाभूमिकायातेनैवोपरितनयो
र्भूम्योर्विनश्येयुः॥यद्यपिचक्षुरादयोनिरोधमासनयापितेषांवाग्भूमेमनो
वांतर्भावोद्रष्टव्यः॥ननुवाचंमनसिनियच्छेदित्यनुपपन्नंतदेंद्रियस्येंद्रियां
तरेप्रवेशोक्तिर्नैवं॥प्रवेशस्याविवक्षितत्वात्नानाविक्षेपकारिणोवाङ्मनस
योर्मध्येप्रथमतोवाग्व्यापारत्यजनेनमनोव्यापारमात्रपरिशेषइहविवक्षित
॥गोमहिषाश्वादीनामिववाङ्मयमेस्वाभाविकेसंयत्रेततोज्ञानात्मनिमतोसि

राम०
६९

यच्छेत्॥ आत्मा त्रिविधः ज्ञानात्मा महदात्मा शान्तात्मा चेति॥ ज्ञानात्मन्यवस्थित आत्मेति ज्ञा
तृत्वोपाधिरहंकारो ज्ञानशब्देन विवक्षितः॥ करणस्य मनसो नियम्यत्वेन एवमु
पात्तत्वात्॥ अहंकारो द्विविधा॥ विशेषरूपः सामान्यरूपश्चेति॥ अयमहमस्यैतस्य पु
त्र इत्येवं व्यक्तमभिमन्यमानो विशेषरूपः॥ अस्मीत्येतावन्मात्रमभिमन्यमानः सा
मान्यरूपः॥ स च सर्वव्यक्तिषु व्याप्तत्वान्महानित्युच्यते॥ ताभ्यामहंकाराभ्यां द्वा
भ्यामुपहितौ द्वावात्मानौ॥ निरुपाधिकः शान्तात्मा यदेतत्सर्वमन्तर्बहिर्भावेन व
र्तते शान्त आत्मा सर्वान्तरः स्थिदेकरसस्तस्मिन्नवस्थितं जडशक्तिरूपमव्यक्तं प्र
जप्रकृतिः॥ सा च प्रथमं सामान्याहंकाररूपा महत्तत्त्वं नाम धृत्वा व्यक्ता भव
ति॥ ततो बहिर्विशेषाहंकाररूपेण ततो बहिर्मनोरूपेण ततो बहिर्वागादि
न्द्रियरूपेण॥ तदेतदभिप्रेत्योक्तमन्यत्र शान्तमित्येवं विविनक्ति॥ इन्द्रियाणि परा

ण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्य
क्तमव्यक्तात्पुरुषः परः इति॥ एवं मनस्तत्त्वं नानाविधसंकल्पविकल्पसाधन
करणरूपं मनोऽहंकर्त्तरि इति यच्छेत्॥ मनोव्यापारान्परित्यज्याहंकारमात्रे शो
षयेत्॥ ननु चैतदशक्यमिति वाच्यं॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरमिति
॥ एतदुक्तमर्जुनेन इति भगवतोऽभिधानात्॥ असंशयं महाबाहो मनो दुर्नि
ग्रहं चलं॥ अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ असंयतात्मनो योगो दुःप्रा
प इति मे मतिः॥ वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः इति॥ अभ्यासवैरा
ग्येन यत्नं गलितस्त्वोदाहरणेन व्याख्यायते॥ एवं एवं भूमिदार्ढ्यरहितोऽसंय
तात्मा तस्य हितो वशात्मा तु उपायतः आहुः श्रीगौडपादाचार्याः॥ सदृष्टान्तमाहुः॥ उ
त्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना॥ मनसो निग्रहस्तद्वद्भवेदपरिखेदतः इति

अत्र संप्रदायविद आख्यायिकामाचक्षते ॥ कस्यचित्किल लवणसिंधोरभितीरस्थाम्बु
दधिमध्ये केनापि नरेण ॥ स च समुद्रं शोषयामीति प्रवृत्तः स च पक्षी स्वमुखाग्रे पोके
कं जलबिंदुं बहिः प्रतिक्षिपति ॥ तदा बहुभिः पक्षिभिर्बंधुवर्गैर्वार्यमाणोप्यनुर
तः प्रवृत्तस्तानपि सहकारिणो वव्रे तांश्च पततो लब्ध्वा कादिवत्रिर्मवस्वस्वाभावि वे
सतितनो विरोधाहंकाररूपं विसृष्टं ज्ञानात्मान्यस्य सामान्याहंकारे महत्तत्वे लि
यछेत् ॥ यथाग्निस्तप्तां तंतुं साम्यवतो विरोधाहंकारः स्वत एव संकुचति ॥ वैनैव तं ज्ञा
त्वा विस्मरणे प्रयतमानस्याहंकारसंकोचो भवति ॥ सेयं लोकप्रसिद्धयातंद्रा
तार्किकाभिमतभ्रमैर्विकल्प्य ज्ञानेन च समानाम महत्तत्वमात्रपरिशेषाऽवस्थात्तो
याद्भूमी ॥ अस्यां चास्यामस्वपादवेनव रोम्हत्वा यांतमेतं सामान्याहंकाररूपं महत्त
तमात्मानं रूपाधितयातीं तां ते विरेकरसस्वज्ञावेतियछेत ॥ महत्तत्वं तिरस्कृ

त्य चिन्मात्रं परिशेषयेत् ॥ अत्रापि पूर्वोक्तविस्मृतिस्तं यत्न एवं ततोऽभ्यसितो येनोपाय
तामापद्यते ॥ यथाग्नावास्त्रीभ्यासे प्रवर्तमानस्य मुत्पत्तेः प्राक् भ्रमति य प्रमारम्भानोपेक्षा
यामपि मुत्पन्नस्यते स्वं एवोत्तरग्रंथार्थः प्रतिभाति ॥ तथा सम्यग्वरूणीकृतपूर्वभू
मेर्योगिन उत्तरभूम्युपायः स्वत एव प्रतिभाति ॥ तदाह योगमार्गप्रकारः ॥ योगे
न योगो ज्ञातव्यो योगोऽभिवर्तते योऽप्रमत्तस्तु योगेन सयोगी रमते चिरमिति ॥ ननु
महत्तत्वरूपतात्मनो मध्ये महत्तत्वोपादानमव्यक्ताख्यं तत्वं श्रुत्योदाहृतं तत्कु
तो नियमनं नाभिधीयते इति चेन्न ॥ लयप्रसंगादिति क्रमः ॥ यथा घटोऽनुपादाने
जलेरूपमानो न लीयते ॥ उपादानभूतायां तु मृदि लीयते ॥ तथा महत्तत्वमाल
निन लीयते अव्यक्ते लीयते ॥ न च स्वरूपलयः पुरुषार्थः ॥ आत्मदर्शनानुपयो
ग्यत्वतरस्यपतेत्वग्रयोबुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति पूर्ववाक्ये अभिधायस

लक्षणसिद्धये निरोधस्याभिधानात्॥ न च प्रतिदिनं सुषुप्तौ स्वतः सिद्धत्वेन प्रयत्नवै
यर्थ्यमिति न तु धारणाध्यानसमाधिसाध्यस्य ज्ञातस्यैकाग्रवृत्तिरूपत्वेन दर्शनेऽद्भुतत्वमि
ति चेन्न स्वतः सिद्धस्य दर्शनस्य निवारयितुमशक्यत्वात्॥ अत एवोपायमार्गेऽभिहितं॥
आत्मानात्माकारं स्वभावतोऽवस्थितं॥ सदा चित्तमात्मैकाकारस्कृता नानात्मदृष्टिं
विदधीत॥ यथाघटटत्सतनाम्नां बहुधा क्लिश्यतः सर्वान्नरलोकपकृपालुर्नारदो
गरुडं समीपे प्रेषयामास॥ ततो गरुडपक्षवातेन शुष्यन्समुद्रो भीतस्तान्यंडानि आ
नीय पक्षिणे ददौ॥ एवमस्वेदेन मनोनिरोधे परमधर्मे वर्तमानं योगिनमीश्व
रोऽनुगृह्णातीति॥ अखेदश्च मध्यमेन ध्येन तदनुकूलव्यापारविश्रामेण संपद्यते॥ यथो
दनं भुंजानस्य ग्रासांतरे बोपभोग्यलेह्यादिनास्वादयति तद्वदिमं द्रष्टव्यमिति प्रेत्य वसि
ष्ठश्चाह॥ चित्तस्य भोगैर्द्वौ भागौ शास्त्रेणैकं प्रपूरयेत्॥ गुरुशुश्रूषया भागमव्युत्पन्न

राम० ७२

तस्य मध्यमः॥ किंचिद्व्युत्पत्तियुक्तस्य भागं भोगेन पूरयेत्॥ गुरुशुश्रूषया भागं शास्त्रार्था
चिंतया व्युत्पत्तिमनुयातस्य पूरयेद्ध्येवं तस्योत्तमः॥ द्वौ भोगौ शास्त्रवैराग्येर्द्वौ ध्यानगुरुपूज
येति॥ भोगशब्देनात्र जीवनहेतुर्भिक्षाव्यापारो वर्णाश्रमोचितया परस्त्रीव्यते॥ पारि
कामात्रं मुहूर्तमात्रं वा यथाशक्ति योगमभ्यस्य ततो मुहूर्तं शास्त्रश्रवणं तथा श्रद्धया पावा
गुरुस्तु पगम्य मुहूर्तेऽस्व देहमनुसत्यमुहूर्तं योगशास्त्रं पर्यालोच्य पुनर्मुहूर्तं योग
मभ्यसेत्॥ एवं योगमाधाय नव्यापारांतराणि॥ भोगे मेलयंतस्तानि [illegible] योगाभ्यास्त्रायन
काले [illegible] दिनगतान्यो योगमुहूर्तानि गणयेत्॥ तत्र ततः परेद्युर्वा पक्षे वा परमासे
वा योगमुहूर्तान्विवर्द्धयेत्॥ तथा चैकस्मिन्मुहूर्ते एकैकक्षणयो योगेऽपि संवत्सरमात्रेण
भूयान्योगाभ्यासो च भवति॥ न चैवं योगेर्धारणे व्यापारांतराणि लुप्येरन्॥ लुप्ते
तरकृतव्यापारस्यैव योगाधिकारात्॥ अत एव वसिष्ठसंज्ञा सोऽपेक्षते॥ तस्मात्दे

कनिष्ठः मुमानःऽधीनत्वणिगादिवत्क्रमेण योगारूढो भवति। यथाधीता माणवकः पा
ठांश्च मर्दयन्मध्यपवर्गक्रमेण क्षपतिः कोटिपतिर्भवति॥ यथा च वणिग्धनैस्मांस दैवो
पक्रम्य। भक्तोरयस्तद्वद्युंजानस्तावता कालेन क्रतो न योगमारोढुं॥ तस्मात्तु न स्तुन
:प्राप्यमाणान्संकल्पविकल्पान्उद्दालकवत्तपोरूपप्रयत्नेन परिसज्यार्द्दं कर्त्तुं
रिज्ञानात्मनि मनोनियेच्छेत्॥ तामेतां द्वितीयभूमिकां विजित्य बात्यघमानः स्वतो विप
त्॥ सर्वा एवेत्यघतो। जलनं ऽङ्लादिष्वरणं तत्त्वत्रेघटेपश्चात्सुरूपप्रयत्नेन भवतिय
घातत्रजनादौनि:स्वारितेपिन विद्यन्तिः स्वारयितुं शक्यते मुखपिधानेप्यं तर्वियद्
वतिष्ठत एव॥ तथा चित्तमुत्पद्यमानमानन्दैतन्यस्फुर्त्योवोत्पद्यते॥ उत्पन्नेपेयम
न्यूषा नितिषिक्रकृतताम्रवत्॥ घटपटरूपसत्सुखदुःखादिरूपत्वं भोगहेतुधर्मादिव
शात् भवति॥ तत्रेरूपरस्याघुऽनात्माकारेनिवारितेपिनिनीमिन्नम्धिद्यकारो नन्निवा

रयितुं शक्यते। ततो निरोधसमाधिना वृत्तिकेनसंस्कारमात्रशेषतया सूक्ष्मत्वेन चिह्नात्म
मात्राभिमुखत्वादेकाग्रेण चित्तेन निर्विघ्नमानुभूयते अनेनैवाभिप्रायेण वार्तिककार
सर्वानुभवयोगिनां वा रहतुः सुखदुःखादिरूपत्वं धियो धर्मादिहेतुतःनिर्हेतुत्वात्मसं
बोधरूपत्वं वस्तुवृत्तितः प्रशांतवृत्तिकं चित्तं परमानंददीपकं॥ असंप्रज्ञाततमायंस
माधियोगिनां प्रियः॥ आत्मदर्शनस्य स्वतः सिद्धत्वेप्यनात्मवारणाय निरोधाभ्यासः॥
अत एवोक्तं॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेदिति॥ योगशास्त्रस्य चित्तवि
किस्सकसमाधिमात्रेप्रवृत्तत्वान्निरोधेसमाधावात्मदर्शनं॥ तस्मात्सूत्रं कं भगवं त
रेण स्वस्वरूपगम्यते॥ योगश्चित्तवृत्तिनिरोध इति सूत्रयित्वा॥ तदा द्रष्टुःस्वरूपेवास्था
नमिति लक्षणात्॥ यद्यपि निर्विकारो द्रष्टासदा स्वरूप गम्यते॥ योगश्चित्तवृत्ति इत्य
घमानाम्सुत्राचिंतिछाया यां प्रतिबिंतानां तदविवेकांदस्वस्य इव दृष्टाभवति॥ तदनंतर

जीवन॰
७५

सूत्रे योगोक्तं वृत्तिसारूप्यमितरत्रेति ॥ अत्रापि सत्त्वचित्तं सत्त्वपुरुषयोरत्यन्तासंकीर्ण
योः प्रत्ययाविशेषो भोगः परार्थत्वादिति ॥ चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्व
बुद्धिसंवेदनमिति ॥ चित्तनिरोधसमाधिना तत्त्वंपदार्थे ॥ साक्षात्कृतेपि तस्य ब्रह्मत्वे गोच
यितुं महावाक्येन ब्रह्मविद्यानामकं वृत्त्यंतरमुत्पाद्यते ॥ न च शुद्धत्वंपदार्थसाक्षा
त्कारे निर्विकल्पसमाधिरेक एवोपायः ॥ किंतु चित्रकूटविवेकेनापि प्रकारेण तेन तत्साक्षात्का
रे निरोधिसमाधिरेकवोपायः किंतु चित्रकूटविवेकेनापि प्रकारेण तेन तत्साक्षात्का
रसंभवः ॥ अत एव वसिष्ठ आह ॥ द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ॥ यो
गस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणमिति ॥ असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञा
ननिश्चयः ॥ प्रकारौ द्वौ ततो देवो जगाद परमेश्वर इति ॥ ननु विवेकोपि योगपर्यव
सानि ॥ दर्शनवेलायामात्मतत्त्वगोचराया एकाग्रवृत्तेः क्षणिकसंप्रज्ञातरूप

राम॰
७५

त्वात् ॥ बाढं तथापि सति संप्रज्ञातासंप्रज्ञातयोः स्वरूपतः साधनतश्चास्त्येव महद्वैलक्ष
ण्यं ॥ वृत्तसद्भावासद्भावाभ्यां स्फुटः ॥ स्वरूपभेदः साधनतस्त्वास्त्येव महद्वैलक्षण्यं ॥ साधनं तु सं
प्रज्ञातस्य सजातीयत्वाद्धारणादित्रयमंतरंगं ॥ असंप्रज्ञातस्य अवृत्तिकस्य वि
जातीयत्वाद्धारणादित्रयमंतरंगं ॥ असंप्रज्ञातस्य अवृत्तिकस्य विजातीयत्वाद्धा
रणादित्रयमंतरंगं ॥ असंप्रज्ञातस्य अवृत्तिकस्य विजातीयत्वाद्बहिरंगं ॥ तथा च
सूत्रं ॥ तदपि बहिरंगं निर्बीजस्येति ॥ विजातीयत्वेपि बहुविधानात्मवृत्तिनिवार
णेनोपकारित्वात्मबहिरंगत्वं ॥ तदेवोपकारित्वं विशदयितुं सूत्रयति ॥ श्रद्धावी
र्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषामिति केषांचिद्विदेहादीनां पूर्वसूत्रेण जन्मनैव स
माधिसिद्धावुक्तायामन्येषामुत्पद्यते ॥ प्रमायां योग एव परमपुरुषार्थसाधनमिति
प्रत्ययः श्रद्धा ॥ सर्वोत्कर्षश्रवणेनोत्पद्यते ॥ तदुत्कर्षश्च सम्यते ॥ तपस्विभ्यो

जीवन्० ७५

धिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुनेति॥ उ
त्तमलोकसाधनत्वात्॥ कृच्छ्रचांद्रायणादितपसः ज्योतिष्टोमादिकर्मणश्च योगो
धिकः॥ ज्ञानं प्रत्यंतरंगत्वाच्चित्तविश्रांतिहेतुतया ज्ञानादप्यधिकत्वं॥ एवं ज्ञानतो यो
गस्य प्राधान्यात्तेयोगांगानि स्मर्यंते॥ तथा च सम्यक्त्वस्य सम्यगुपपत्तिः समाधेरध्यात्म-प्रसा
दे सति ऋतंभराख्यं ज्ञानोदेति॥ तस्य तारकः॥ तस्य तत्कारणको ऽसंप्रज्ञातसमाधि
रितरेषां देवादीनां स्मोऽर्वाचीनानां मनुष्याणां सिध्यति॥ तां च पतंजलिः सूत्रयति॥ ऋतंभ
रा तत्र प्रज्ञेति॥ ऋतं सत्यं वस्तु याथात्म्यं बिभर्ति प्रकाशयतीति ऋतंभरा॥ तत्र तस्मिन्
समाधावुत्कर्षे जन्मनोऽध्यात्मप्रसादे सतीत्यर्थः॥ ऋतंभरत्वोपपत्तिं सूत्रयति॥ श्रुतानु
मानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति॥ सत्स्वप्यवस्तु तद्विशेषतत्त्वविश
कृष्टवस्तुषु योगिप्रत्यक्षं प्रवर्तते॥ आगमानुमानाभ्यां तानि वस्तूनि ज्ञायो

गि [illegible] यंते॥ ते च वस्तुस्वानुमानजन्ये प्रज्ञे वस्तुसामान्यगोचरयते॥ इदं तु योगि
प्रत्यक्षं विशेषवस्तुगोचरत्वादृतंभरत्वं॥ तस्य च योगिप्रत्यक्षस्यासंप्रज्ञातसमाधौ ब
हिरंगत्वसिद्ध्यर्थमुपकारित्वं सूत्रयति॥ तज्जः संस्कारोऽन्यसंस्कारप्रतिबं
धीति॥ असंप्रज्ञातसमाधेर्बहिरंगसाधनमुक्त्वा तन्निरोधे प्रयत्नस्यांतरंगसाध
नतां सूत्रयति॥ तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिरिति सोऽयं समाधि
सुषुप्तसमानः साक्षिचैतन्येनानुभवितुं शक्यः॥ तदा सौ सर्वधीवृत्तिराहित्या स
सुषुप्तिरिवेति॥ तच्छंकनीयं मनःस्वरूपसद्भावात्मांविशेषात्॥ तदुक्तं गौ
डपादाचार्यैः॥ निगृहीतस्य मनसो निर्विकल्पस्य धीमतः। प्रचारः स तु विज्ञेय
सुषुप्तेऽन्यो न तत्समः॥ लीयते हि सुषुप्तौ तन्निगृहीतं न लीयते॥ तदेव निर्भ
यं ब्रह्म ज्ञानालोकं समंततमिति॥ मांडूक्यकारिकायामभिधीयते॥ द्वैतस्य ग्रह

राम० ७५

णं तुल्यमुभयोः प्राज्ञतुर्ययोः ॥ बीजनिद्रायुतः प्राज्ञः सा तु तुर्ये न विद्यते ॥ स्वप्ननिद्रायु-
तावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ॥ न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ अन्यथा गृह्णत-
ः स्वप्नो निद्रा तत्त्वमजानतः ॥ विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुत इति ॥ आद्यौ विश्वतै-
जसौ ॥ अद्वैतवस्तुनोऽन्यथाग्रहणात् नाम द्वैतरूपेण प्रतिभासः ॥ स च विश्वतैजस-
योर्विद्यमानः स्वप्न उच्यते ॥ तत्त्वस्याज्ञानं निद्रा ॥ सा च विश्वतैजसप्राज्ञेषु त्रिषु ॥ नन्वयो-
स्त्वितम संप्रज्ञातासमाधिपुरुषयोर्महान्भेदः ॥ तत्र तत्त्वविदि दक्षोर्द्वयोः समाधानत्वे तस्य समा-
ध्यपेक्षेयापि दृष्टत्वस्याजीवन्मुक्तमेनास्मिन्नपेक्षा रागद्वेषादिक्लेशानुबन्धस्य पुरुषस्य
विविच्यते ॥ मैवं ॥ किं प्रतिदिनं स्वतः प्रमत्तकदाचित्क पुंसि निर्विकल्पिका किं रात्र्यासेन
स्मिरंतरवर्त्तिनी आहो किंतु पुंसि कालीनस्य क्लेशानुबन्धस्य निवर्त्तिका ॥ किं वा कालान्तरवर्त्तिन
ःनाघप्रमत्तके रहितस्मृतानामपि पुंसि क्लेशानुबन्धः ॥ अन्यथा प्रमत्तस्येन न द्वियो

ऽसंभवात् । न द्वितीयः कालान्तरयापि तु पुंसः कालान्तरवर्त्तिनः क्लेशस्य क्षयसंभवति । अ-
समाधिस्थानामपि जागरणस्वप्नयोः क्लेशक्षयः प्रसज्येत ॥ नापि तु पुंसो नैरंतर्ये ॥ अस्-
मिंस्तु शंका ॥ तस्याः कर्मक्षयनिमित्तत्वात् । तस्मात्तत्त्वविदोऽपि क्लेशक्षयाय योगाभ्यासेनासंप्र-
ज्ञातसमाध्यपेक्षा । तस्य च समाधेर्योगादि चित्तवृत्तिनिरोधः प्रथमा भूमिः । बालमुग्धा-
दिवन्निर्मनस्त्वं द्वितीया । तंद्रामिवाहंकाररहितत्वं तृतीया सुषुप्त्या विवेकमहत्तत्त्वरा-
हित्यं च तुर्या तदेव तरूणामिव तु सुषुप्तिसमस्थितिरेवाज्ञाने ॥ ज्ञानैरूपपरमेदितुकं ॥ अत्रैवो-
परमवृत्तिगद्गदतावृद्धिः समाधानं । महदहंकारमनोबुद्ध्यादीनां स्वस्वरूपलीनत्वं तीव्रवेगे-
न वहिः प्रवर्त्तनाकलंककथाया ॥ एवं घातिरोधैर्यतेंबुद्धिर्विवेकः ॥ एवंभूमिर्जितान-
वेक्षितपरिक्षाज्ञाना यामु तत्र रम्यमुपक्रम ॥ अजितायां सेवयुनरभ्यसमीनीयेति तदावि-
विच्यात् ॥ आत्मसंस्थमित्यादिना सार्द्धश्लोकेन च तुर्यभूम्यभ्यासोऽपि स्मृतः ॥ गोऽरु वा

यीकुः उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः॥ सुप्रसन्नं लये चैव यथा कामो लय
स्तथा॥ दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत्। अजं सर्वमनुस्मृत्य। जातं नैव तु पश्यति
॥ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः॥ सकषायं विजानीयात्समप्राप्तं न चालये
त्॥ नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेत्॥ निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्न
तः॥ यदा न लीयते चित्तं न च विक्षिप्यते पुनः॥ अनिंगनमनाभासं निष्पन्नं ब्रह्म तत्तदे
ति॥ लयविक्षेपकषायसमप्राप्तमवस्थाचतुष्टयं चित्तस्यावस्था तत्र निरुध्यमानं विषयेभ्यो
व्यावर्त्यमानं तत्स्वाभ्यासवशाद्विलयाभिमुखं भवेत्तदानीमुत्थानप्रयत्नेन लय
कारणनिवारणेन वा तत्त्वोपलब्धेश्चित्तं सम्यक्प्रबोधयेत्॥ लये हेतवोऽपि निद्राशेषा
जीर्णबहुशनश्रमाः॥ अत एव हि समसमाध्यर्थिनां मुनीनां योगशास्त्रे बाधे
विविक्ते प्रदेशे॥ सदा मीतादि सूत्रात्पथ्यप्रयत्नो युक्ताहारविहारो विहितो मासानमागोरि

निद्रया दुष्टमपि चित्तं विविक्ते देहे न प्रबोधाभ्यासवशं गतं हृदि कामभोगयोर्विक्षिप्येत॥
तदा विवेकिजनप्रसिद्धभोग्यवस्तुगतसर्वदुःखानुस्मरणेन शास्त्रप्रसिद्धजन्मा
दिरहिताद्वितीयब्रह्मतत्त्वानुस्मरणपूर्वकेन भोग्यवस्तुदर्शनेन च पुनः पुनर्वि
क्षेपाच्चित्तं शमयेत्॥ कषायस्तु चित्तदोषस्तु रागद्वेषादिवासनातया ग्रस्तं वि
त्तं कदाचित्समाहितमिव लयविक्षेपरहितं दुःखैकाग्रमवतिष्ठते॥ तादृशं तच्चित्तं वि
जानीयात्समाहितं चित्तं विवेके नावगच्छेत्॥ असमाहितमेतदिति सर्वागम्य लयवि
क्षेपवत्कषायस्य प्रतीकारं कुर्यात्॥ समप्राप्तेन ब्रह्माभिधीयते॥ समं सर्वेषु भूते
षु तिष्ठन्तं परमेश्वरमिति स्मृतेः॥ लयविक्षेपकषायेषु कृतेषु परिहारेण चित्तेन सम
मं ब्रह्म प्राप्यते॥ तच्च समप्राप्तं कषायलयाभ्यासाच्चालयेत्॥ तत्स्मृत्वा बुद्ध्या उपक
षायप्राप्ती विविच्य तस्मात्समप्राप्ता वलिमयत्नेन चित्तं स्थापयेत्॥ स्थापिते स्मि

तत्र स्वस्वरूपभूतः परमानंदः सम्यगाविर्भवति तथा चोक्तं सुखमात्यंतिकं यत्त
द्बुद्धिग्राह्यमतींद्रियमिति ॥ श्रुतिश्च भवति ॥ समाधिनिर्धूतमलस्य चेतसो निवेशितस्या
त्मनि यत्सुखं भवेत् ॥ न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतः ॥ करणेन गृह्यत इति
॥ ननु समाधावपि मनसा ब्रह्मानंदस्य बुद्धिग्राह्यत्वं श्रुतिस्मृतिभ्यामभिहितं भाष्याचार्यैस्तु
नास्वादयेत्सुखं तत्रेति बुद्धिग्राह्यत्वं प्रतिषिध्यत इति चेत् ॥ नायं दोषः ॥ समाधिवि
रोधिनो सुखाकाररूपस्य परामर्शस्यैव प्रतिषेधात् ॥ यदा तु तदा घटादिवत्सुखमप्याकारितानानु
बोधदशायामिवानुभूयमानमपि निर्दुःखसुखं तदा वक्तुमशक्यं ॥ पश्चात्तु स्मर्यमाणमभिधी
यते ॥ यथा वा सुषुप्तावविद्यावृत्तिभिरतिसूक्ष्माभिरनुभूयमानमपि स्वरूपसु
खं तदानीमविकल्पेनानतः ॥ करणवृत्त्यभावेन गृहीतं सम्यक् प्रबोधकाले तु स्मरा
चित्तस्थं परामृश्यते ॥ तथा समाधौ वृत्तिरहिते तु संस्कारमात्रेणैव तथा परामृश्यते

चित्तेन सुखानुभवः ॥ श्रुतिस्मृतिभ्यां विक्षिप्ततः महदिदं समाधिसुखमनुभवमिति से
तारको पिप्रपुष्टितं सविकल्पः ॥ परामर्शो अस्वादनं तदेवाचार्यैः ॥ प्रतिषिध्यते ॥ तमे
वस्वाभिप्रायं स्पष्टयितुं निःसंगः प्रज्ञया भवेदित्युक्तं ॥ प्रकृष्टविकल्पकं ज्ञानं प्र
ज्ञा तया संदसंगं भवेदित्यर्थः ॥ यद्वा सर्वेषां कायाद्यलिंगरहिता बुद्धिः प्रज्ञा तया लब्धेन सुखा
स्वादनेन तदर्शनादिरूपमपि संकल्पं वर्जयेत ॥ समाधौ ब्रह्मानंदे निमग्नं चित्तं यदि
कदाचित्सुखास्वादनाय बहिर्निर्गच्छेत् तदा तत्प्रज्ञाकौशलेनैव बालेश्वरं करादिव्युत्थितं चित्तं पु
नर्ब्रह्मण्येव निवेशयेत्तदा परब्रह्मणः साक्षात्कारं कुर्यात् ॥ तत्र निरोधप्रयत्न एव साधनं
॥ एकीभाव एव पराकाष्ठा लीयते चित्तं निभ्रमीति न स्पृशो के लक्ष्यीक्रियते ॥ अलिंगनम
नामासमितस्याप्यपराभावकषायसुखास्वादरोधो विषिष्यते लयविक्षेपकषा
यसुखास्वादेभ्यो दोषेभ्यो रहितं चित्तं निर्विघ्नं तद्ब्रह्मस्वरूपेण तिष्ठितं भवति ॥ एतदेवाभिप्रेत्य

जीवन॰
१९

कं दवदन्नीभवन्ति । यदायं चाबलिष्टं तेनांतर्मिलसामरद । बुद्धिचलितवेशिनामाऽ
:परमार्थतः ॥ नो योगस्थितिमस्यं तेऽक्लिष्टार्थानि विधारणां अममत्तस्तदा मवतिवोगो हि
प्रमाणवाप्यया वृत्तिः । तद्वृक्षिनो योगाङ्गिय वृत्तिनां प्रभवं करोति ॥ अनुष्ठितस्य कृता
सांलयहेतुरत एव योगस्य स्वरूपलक्षणं सूत्रयति । योगश्चित्तवृत्तिनिरोध इति वृत्ति
नामात्मनां मात्तनिरोधो ऽत्राभ्यासादिति क्ताकांकावारयितुमिय तान्सूत्रयति ॥ वृत्तयः पंचतय्यः
:क्लिष्टा अक्लिष्टा इति रागद्वेषादि क्लेशरूपाः व्यामुरवलयः क्लिष्टाः ॥ रागादिरहि
तास्तेव वृत्तयो ऽक्लिष्टाः ॥ यद्यपि पंचत्वं सैव क्लिष्टा नाम अक्लिष्टा मंतर्भाव ॥ तथापि क्लिष्टा
एवनिरोधव्या इति मंदबुद्धिं वारयितुं मातापि यत्नताक्लिष्टा उदाहृता ॥ तामनामधेयल
क्षणाभ्यां वृत्तीर्विवृत्तांदयितुं सूत्रयन्नाह । प्रमाणविपर्ययविकल्पनिद्रास्मृ
तयः ॥ प्रत्यक्षानुमानागमाः ॥ प्रमाणानि विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं

राम॰
१९

॥३॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥४॥ अभावप्रत्ययालंबना वृत्तिर्निद्रा ॥५॥
अनुभूतविषयासंप्रमोषः स्मृतिरिति ॥६॥ तेषां भावाः प्रतीयते यस्मिंस्तन्मस्यावकरे
स्ततिन तमोभावप्रत्ययस्तमोगुणो विषयं कुर्वती वृत्तिर्निद्रेति अनुभूतेषु विषयस्या
संप्रमोषस्तदनुभवतस्य मतुसंधानं ॥ एवंविधवृत्तिनिरोधनं सूत्रयति ॥ अभ्यास
वैराग्याभ्यां तन्निरोध इति ॥ यथा नीचवेगोपेतं नरोप्रवाहं सेतुबंधनेन निवार्यतेऽ
स्मान्नयनेन वृक्षेत्राभिमुखवतीर्यकुल्याप्रवाहं तरसुत्पाद्यते ॥ तथा वैराग्येणापि कृतघाति
विषयाप्रवाहतिवार्यसमाधिप्राप्त्याभ्यासेन प्रवृत्तां नरो प्रवाहः संपाद्यते मं प्रत्यपदेवताध्याना
हेतो ॥ क्लिष्टेति वृत्तिस्त्वेतावृत्तिं लक्षणोऽभ्यासः संभवतेमर्वधाध्यारोः परमरूपस्य सम
धेसाधकोऽकोतामान्यास इति सैकोवारयितुं सूत्रयति ॥ तत्र स्थितौ यत्नोऽभ्यास इति ॥
स्थितिर्नैश्चल्यं वृत्तिनिरोधः यत्नो भावना प्रसवत्साहः सतत एवंविधं प्रवाहतं तोलेऽधिसमर्व

यानिरोधस्मामीत्येवंविधस्तस्माद् ५ ॥ आवर्त्यमानोऽभ्यास इत्युच्यते अथ सम्यासइदानीं
प्रवृत्तः स्वयमदृढः सन्ननादिप्रवृत्तव्युत्थानवासनाः कथंमभिभवेदित्याशंकाम्प
वदितुं सूत्रयति ॥ स तु दीर्घकालनैरंतर्यसत्कारसेवितो दृढभूमिरिति ॥ लोकेऽहिमृदु
स्ववचनमुदाहरंति ॥ विद्यमानाभ्यासारप्य वेदास्तानशेषेतुं गतमोऽनवकाश्यपं चदि
वसा अतीता अथाप्यसौ नागत इति ॥ तादृशमेव वायं योगीनदादिवसेर्वा योगसिद्धिं
वांछेत्तस्मात्संवत्सरैर्जन्मभिर्वा दीर्घकालं योगाभ्यासे विनवः तथा च स्मर्यते ॥ अ
नेकजन्मसंसिद्धस्ततो याति परां गतिमिति ॥ चिरमासेममानोऽपि विच्छिद्य विच्छिद्य
दासेव्येत तर्हि उत्पद्यमानानां योगसंस्काराणां समनंतरभाविभिर्विच्छेदकाला
तैः संस्कारैरभिभवे सति खंडनकारीकन्यायवत्सापतेत् ॥ अश्वेधायवसस्यास्वीय
मानेदिवसरव्यास्त्रीलस्रुतवत्किमालं वेनेतितस्मान्निरंतरमासेवितव्यः ॥ सत्क

रआदरः स नादरेणासेव्यमानो वसिष्ठोक्तन्यायः ॥ आपतेत ॥ अकर्तृ कुर्वदप्येतच्चेत
स्तत्तु शीणवासनं ॥ दूरंगतं मनो जंतुः ॥ कथासंश्रवलोचनयोरिति ॥ अनादरे स युविक्षेप
कषायसुखास्वादानामपरिहारस्तस्मादादरेणासेवितव्यं ॥ दीर्घकालादिभिस्त्रिविशे
षणैः सेवितस्तु समाधिदृढभूमिस्तं नाम विषयसुखवासनया ऽरवधासनया वाशायितुं
मशक्यः ॥ तच्च भगवतादर्शितं ॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न
दुःखेन गुरुणापि विचाल्यते इति ॥ अपरलाभस्यानाधिक्यं च वर्णितं तेन संवसिष्ठ
दानसार ॥ कचः कदाचिद्व्युत्थाय समाधेः प्रीतमानसः एकांते समुवाचेदं गद्गद
या गिरा ॥ किं करोमि क गच्छामि किं गृह्णामि त्यजामि किं ॥ आत्मना पूरितं सर्वं महाकल्पां
बुना यथा ॥ सबाह्याभ्यंतरे देहे ह्यधऊर्द्ध्वं च दिक्षु च इत आत्मा ततोऽप्यात्मा नास्त्यनात्मम
यं जगत् ॥ न तदस्ति न यत्राहं न तदस्ति न यन्मयि ॥ किमन्यदभिवां

छामिसर्वसंचिन्तयंततः स्फारब्रह्मामलाम्भोधिफेनाः सर्वेकुलाचलाः ॥ चिदादित्यमह
तेजोमृगतृष्णाजगत्स्थियः ॥ इतिगुरूणानुरवेणावविचाल्यतंक्षितिवधूजस्यसंचलस्यरव
यसमाधिस्त्वांतेनेवदानवदार ॥ निर्विकल्पसमाधिस्थंतत्रापत्रपमादीपतिं ॥ राजानंजं
वदेतस्माद्बोधयामिपरामदात ॥ इतिसंचिंत्यचूडालासिंहनादंचकारसा ॥ नृपोनृपयोः
सभोरस्थैवनैवरमयपरं ॥ नववाल्तदारामयदाशानादेनतेनसः ॥ नृपोनृपःस्तनेन
पितदापार्तमचाल्यपत ॥ चालितःपातितोप्येषतदानोबुबुधेबुधरति ॥ सकृत्रदृवतं
तेनापिएतदेवोह्नाजदार ॥ इतिसंचिंतयन्नेवमस्फारदःपरिवारह्वानिर्विकल्पपरानंद
समाधिंसमुपाययौ ॥ निर्विकल्पसमाधिस्थंष्टिचार्पितइतिवाचमो ॥ पंचवर्षसह
स्त्राणिपीनांसोतिष्ठद्देकरकृमस्वाल्पनंसमकुध स्वैस्वेतदिमुरूदाहृत ॥ पांचलेस्यप
रध्यौवस्ववनयानुकर्ड्डेङ्नगणे । महतातेनशादेनवैस्मवत्राणमवानो । वमत्वसंमकु

र्वाल्पादानवेन्द्रः ॥ त्रानैरिति ॥ एवंवीतह्व्यादिनामपिसमाधिन्दादरणीयः वैराग्यंपि
विधंचापरंचैव ॥ यतमानव्यतिरेकएकेन्द्रियवशीकारसंज्ञैरेपरंचतुर्विधा ॥ तत्राद्यप्र
त्वानुतत्रयत्नास्याचतुर्थंसंज्ञयति दृष्टानुश्रविकविषयविरसस्यवशीकारसंज्ञावै
राग्यमितिसूत्रकृद्वैदत्रवनितापुत्रमित्रक्षेत्रधनादयोदृष्टाःवेदोक्ताःस्वर्गादयः ॥ अ
नुश्रविकाः ॥ तत्रोभयत्रसत्यामपितृष्णायांविवेकतारतम्येनयतमानादिवैराग्य
त्रयंभवति ॥ अस्मिन्जगतिकिंसारंकिंमसारमितिगुरुशास्त्राभ्यांजानामितुंप्रयोगो
यतमानत्वंस्वचित्तेपूर्वंविद्यमानानांदोषाणांमध्येऽत्रतस्माभ्यानेनविवेकेनएतावंतः
पक्वाः ॥ एतावंतोवसिष्टाइतिविवेचनंव्यतिरेकः ॥ दृष्टानुश्रविकविषयप्रवृत्तिः ॥ दुःख
त्वात्मवोधेनर्तौप्रवृत्तिंनिरसन्मनसमौत्सुक्यमात्रेणात्वस्यावस्थानंएकेन्द्रियत्वं ॥ ३ ॥
त्पिन्नस्याप्यवशीकार ॥ ४ ॥ तदिदमपरवैराग्यमस्यंगयोगस्यवहिरंगत्वेनसंप्रज्ञातस्यांत

रंगं ॥ असंप्रज्ञातस्य तु बहिरंगमप्यांतरंगं परं वैराग्यं सूचयति ॥ तत्परं पुरुषख्यातेर्गु
णवैतृष्ण्यमिति ॥ संप्रज्ञातसमाधिपरिपाकेन गुणत्रयात्मकात्प्रधानाद्विविक्तस्य पु
रुषस्य ख्यातिः ॥ साक्षात्कार उत्पद्यते ॥ तस्माच्च साक्षात्काराद्धेतोर्गुणत्रये यन्मावस्था
रेयत्तैव ह्यं तत्परं वैराग्यं ॥ तस्य तारतम्येन समाधेः ॥ शीघ्रप्राप्त्यं तारतम्यं सूचयति तीव्रसं
वेगानामासन्नः समाधिलाभ इति ॥ संवेगो वैराग्यं । तद्भेदात्योगिनस्त्रिविधाः । मृदु
संवेगाः मध्यसंवेगाः ॥ तीव्रसंवेगाश्चेति ॥ आसन्नोऽल्पेनैव कालेनैव कालेनैव कालेन
समाधिलाभस्तदर्थं ॥ तीव्रसंवेगेष्वेव समाधितारतम्यं सूचयति ॥ मृदुमध्याधिमा
त्रत्वात्ततोऽपि विशेषः ॥ इति मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति ॥ तीव्रसंवेगानामन्तरस्य
त्वरया समाधिसिद्धिर्दृष्टा उक्ता वा तस्मादनन्तरमुपक्रान्तादयोऽधिमात्रतीव्रा मृदुती
मात्रेविचारेणेत्यत्र समाधिलाभादधमा उदाहृताः कादयो मृदुसंवेगाश्चिरमप्यासेवन

तस्माभात एव ममैव विपर्ययो योग्यमुमुक्षवः ॥ तदेव मध्ये मात्रतीव्रस्य दऊर्ध्व मा व संप्रज्ञा
तः समाधौ लब्धे सति पुनर्मुक्तानुमतात्मकं सन्न्यतोऽनुरूपति । मनोनाशोच्चवासनाक्षयेन
ते सति ॥ ४ ॥ जीवन्मुक्तिः स्थितोऽकुतोऽयं । प्रश्नो नरात्मोऽतल्लिर्णयात् राम० ॥ विवेकात्सुदया
स्थिते स्वस्वरूपे न हि तमुने ॥ मैत्र्यादयो गुणाः कुत्र जायंते योगिनां वर ॥ वसिष्ठ उवाच
॥ द्विविधश्च नाशोऽस्ति सरूपोऽरूप एव च । जीवन्मुक्तौ सरूपः स्यादरूपो देहमुक्तिग
ः ॥ प्राकृतं गुणसंभारं मम मेति बुद्धिकृ विमन्यते ॥ सुखदुःखाद्यवष्टम्भ विद्यमाने मनो
विदुः । चेतसः कल्पितास्तत्र मया राघुकुलोद्वह ॥ अस्य नाशमिदानीं त्वं शृणु प्रश्नवि
दां वर । सुखदुःखादयो धीरं समान्नम्रोद्धरंति यं ॥ निश्वासाइव शैलेंद्रं तस्याविवरं मतं वि
दुः अवस्यकार्यं सैमयोक्तो मदेमाघंमहोन्नतः ॥ यत्स्वयं तिविहरूपं तं तस्य नष्टं मनो विदुः ॥
स्थिरमानसमानिधनं हि यदा तत्कालि राघव । मैत्र्यादिभिर्गुणैर्युक्तं तदा सत्वमुदेत्यनं म

योजनम्माविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः सरूपोसौ मनोनाशो जीवन्मुक्तस्य विद्यते
॥अरूपस्तु मनोनाशो योसौ मयोक्तो रघूद्वह॥ विदेहमुक्त एवासौ विद्यते निष्कलात्मकः
॥समग्राग्र्यगुणाधारमपि सत्त्वं प्रलीयते॥ विदेहमुक्तावमले पदे परमपावने॥ संसारं
तद्दुःखसुखडामरूपमेकरूपमानंदमथ परमपेतरजस्तमो यत॥ आकाशकोशतनवो
महांतस्तस्मिन्न देहांतेति विततवावसंतीति तस्मात्सरूपो मनोनाशो जीवन्मुक्ति
साधनमिति॥ इति जीवन्मुक्तिसाधनमनोनाशप्रकरणं॥ केयं जीवन्मुक्तिः किं तत्र प्र
माणं कथं वा तत्सिद्धिरित्येवं तस्य प्रश्नत्रयस्योत्तरं निरूपितं॥ सिद्धौ किं प्रयोजनमित्य
स्य चतुर्थप्रश्नस्योत्तरमिदानीमभिधीयते॥ ज्ञानरक्षातपोविसंवादाभावदुःखनाशा
सुखाविर्भावाः पंच प्रयोजनानि॥ ननु प्रमाणोत्पन्नस्य तत्त्वज्ञानस्य को नाम बाधप्रसं
गो येन रक्षापेक्ष्यते इति चेदुच्यते॥ विना विश्रांतेरभावेन संशयविपर्यययोग्यतां॥

तथाहि तत्त्वविदो राघवस्य विश्रांतेः पूर्वं संशयं विश्वामित्र उदाजहार॥ न राघव त
वास्त्यन्यज्ज्ञेयं ज्ञानवतां वर॥ स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवानसि॥ भगवद्व्या
सपुत्रस्य शुकस्येव मतिस्तव॥ विश्रांतिमात्रमेवात्र ज्ञानते याप्यपेक्षते इति॥ शुक
स्य स्वयमेवादौ तत्त्वं विदित्वात्र संशयानः पितरं पृष्ट्वा पितृतथैवानुशिष्टः॥ तत्रापि
संशयानो जनकमुपागात् तेनापि तथैवानुशिष्टस्तं प्रत्येवमुवाच॥ स्वयमेव मया पूर्
वमभिज्ञातं विशेषतः॥ एतदेव हि पृष्टेन पित्रा मे समुदाहृतं॥ भवताप्येष एवार्थः क
थितो वाग्विदांवर॥ एष एव हि वाक्यार्थः॥ शास्त्रेषु परिदृश्यते॥ यथायं स्वविकल्पोत्थः स्व
विकल्पपरिक्षयात्॥ क्षीयते दग्धसंसारो निःसार इति निश्चयः॥ तत्किमेतन्महाबाहो सत्य
ं ब्रूहि ममाचलं॥ त्वत्तो विश्राममाप्नोति चेतसा भ्राम्यता जगत्॥ जनकः॥ नातः परतरः कश्चिन्नि
श्चयोस्त्यपरो मुने॥ स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतं॥ अव्युच्छिन्नचिदात्मैकः पु

मातस्तीदृत्तेनरः॥ स्वयं कल्पंवशाद्दृष्टोपिः संकल्पस्तुमुच्यते॥ मुनेत्वंयास्फुटंज्ञानंतेषु
स्वस्थमहात्मनः॥ भोगेभ्यो व्युपरतिर्जाताद्दृष्टपादासकलादेहि॥ प्राप्तं व्यवसितं त्वं भवनाह
र्षवैतस्य॥ सद्रूपेयतसि ब्रह्मन्तु कस्त्वं भ्रांतिमुत्सम॥ अबुद्धिपूर्वः सदसैवं मनकेनमह
त्मना॥ विश्राम्यामस्त्रुकस्तु संभिरवस्थे परमवस्तुनि॥ वीतशोकभयायासो निरीहश्छिन्नसं
शयः॥ जगाम शिखरे मेरोः सामाध्यर्थमनिंदितः॥ तत्रवर्षसहस्राणि निर्विकल्पसमाधि
ना॥ दशास्थित्वाशशामासावात्मन्येव हरीपवत॥ तस्मादिदितेपितत्वविश्रांतिरहितस्य
शुकस्यैवयोगिवत्संज्ञायजस्यते॥ स्वानमिवमोक्षस्यप्रतिबंधकः॥ अतएवभ
गवतोक्तं॥ अतश्चास्मद्धातस्य पूर्वसंज्ञायामात्माविनस्य॥ नायंलोकोस्तिनपरोनसु
खंसंज्ञायात्मनइति॥ अप्रबुद्धापि विपर्यः मनोवारज्ञोदाहरिष्यते॥ अज्ञानविपर्ययोभि
समानविरोधिनो॥ संज्ञायस्तु योगमोक्षयोरपि विरोधात्तस्य परस्परविरुद्धकोटिद्वया

वलंबित्वात॥ यदासंसारसुखायप्रवृत्तिः॥ तदामोक्षमार्गेबुद्धिस्तांरुणद्धि॥ यदामो
क्षमार्गेप्रवृत्तिस्तदासंसारबुद्धिस्तांप्रतिबध्नाति॥ तस्मात्कल्पनायालमोनकिंचित्सुखम
स्तीतिमुमुक्षुणा सर्वथा संज्ञाच्छेत्तव्यः॥ अतएवश्रूयते॥ छिद्यंतेसर्वसंशयाइति॥ विपर्य
यस्यापिनिदाघउदाहरणं॥ कृतुः परमक्रूरत्वयाविनिदाघस्यगृहमेत्यबुद्धात्तेबोध
यित्वापिनिर्गामबुद्धेपितद्युपदिष्टवस्तुनिश्चयाद्धातोपिनिदाघःकर्मण्येवपरमपु
रुषार्थदैवतुरितिविपर्ययंप्राप्यकर्माणुष्ठानेयथापूर्वंप्रवृत्तः॥ सोपिनिदाघस्यपरमा
र्थतत्त्वंशोभामासदितिक्रूरयागुरुःपुनरागत्यबोधयामास॥ तदपिविपर्ययंतनदेहे॥
तृतीयेतनुबोधनेनविपर्ययंपरित्यज्यविश्रांतिमजमत॥ संज्ञायविपर्ययाभ्यांमसं
भावनाविपरीतभावनाभावनारूपाभ्यांतत्त्वज्ञानस्यफलंप्रतिबध्यते॥ तदुक्तंप
राशरेण॥ मणिमंत्रौषधैर्वह्निःसुदीप्तोपियथैधने॥ प्रत्युद्धनैवदाहकःस्यात्तथाप्रतिबंध

स्त्वथैवच ॥ ज्ञानाग्निरपि संजातः सुदामः सुरदोपि च ॥ मद्गुणनैवनाकः स्यात्कतिवधस्तु
कल्मषम् ॥ भावना विपरीता या च संशयभावना कुरुते प्रतिबंधं सा रघुनन्दन तु ज्ञानस्य नापु
रमिति ॥ तस्माद्दृढविश्रान्तचित्तस्य संशयविपर्ययप्रसंगेन तत्त्वज्ञानस्य फलप्रतिबं
धलक्षणाबाधानपेक्षते ॥ विश्रांतचित्तस्य संशयविपर्ययप्रसंगेन तत्त्वज्ञानस्य फ
लप्रतिबंधलक्षणाद्बाधोऽनपेक्षते ॥ विश्रांतचित्तस्य तु मनोनाशो नयदा गदेवस
लीयते ॥ तदा न ज्ञानविपर्ययोः कः प्रसंगः ॥ जगन्मतिबाधरहितस्य ब्रह्मविदो दे
हव्यवहारेऽपि विदेवयत्न परमेश्वरप्रेरितेन प्राणवायुना निर्व्याघते ॥ अत एव छां
दोग्याश्रामनंति ॥ नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवाय
मस्मिन् शरीरे प्राणो युक्त इति ॥ उपजनं जनानां समीपे वर्तमानमिदं शरीरं न स्म
रन् ब्रह्मविद्विचरतीति ॥ पार्श्वजनानां एव तत्त्वविदः शरीरं पश्यंती ॥ स्वयं तु निर्निमित्तकारणा

त्शरीरमिदं शरीरमिति न स्मरति ॥ प्रयोग्यः अश्वः शकटादिवाहने प्रयोक्तुं मंदुरायां स्थितो
युक्तो वहति ॥ स यथा सारथिना मार्गस्याचरणे प्रेरितः पुनः पुनः सारथिप्रयत्न
मनपेक्ष्य स्वयमेवाश्वः शकटादिकं पुरोवर्तिग्राममेतयति ॥ एवमेवायं प्राणवायुः परमेश्व
रेणास्मिन् शरीरे नियुक्तः सन्स्वतीवनीवश्ययत्नेन व्यवहारं निर्वाहयति ॥ भगवति
समर्पितं ॥ देहं विनश्वरमवास्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूप
दैवाद्व्यवहारं निर्वाहयति ॥ भगवत्समर्पितं ॥ देहं चिनुपेतमथ दैववशादपेतं वा
सो यथा परिकृतं मदिरामदांध इति ॥ वसिष्ठोऽप्याह सर्वस्य बोधिताः संतः स्वबो
धारकमारातो ॥ आचारमाचरंत्येव सुप्तबुद्धवदस्तनाः ॥ इति ॥ सिद्धोनपुत्रपति आचा
वाचारमाचरति उभयोः परस्परविरोध इति चेत् ॥ विश्रांतिं तारतम्येन तत्त्वविदः पच
॥ तेरेवतारतम्यमभिप्रेत्य श्रूयते ॥ आत्मक्रीडायते आत्मरतिः क्रियावाने

ष्ठब्रह्मविदां वरिष्ठ इति ॥ अत्र चात्वारः प्रतीयंते ॥ ब्रह्मविन्मध्यमं ब्रह्मविद्वरो द्वितीय ॥
वरीयांस्तृतीय ॥ वरिष्ठश्चतुर्थः तदेते समस्तु योगभूमिषु चतुर्थी योगभूमिमार
भ्य क्रमेण भूमिचतुष्टयं प्राप्ता स्वस्य वर्गं तत्र ॥ भूमयश्च वसिष्ठेन दर्शिताः ॥ ज्ञानभू
मिः शुभेच्छाख्या प्रथमा समुदाहृता विचारणा द्वितीया स्यात्तृतीया तनुमानसा
॥ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ॥ पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा
स्मृता ॥ इति ॥ स्थितः किं मूढ एवास्मि प्रेक्ष्येऽहं शास्त्रसज्जनैः वैराग्यपूर्वमिच्छेति शुभे
च्छेत्युच्यते बुधैः ॥ शुभेच्छाख्या प्रथमा प्रोच्यते बुधैः ॥ शास्त्रसज्जनसंपर्कवैरा
ग्याभ्यासपूर्वकं ॥ सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ॥ विचारणाशुभेच्छा
भ्यामिंद्रियार्थेष्वसक्तता ॥ यत्र सा तनुतामेति प्रोच्यते तनुमानसा ॥ भूमिकात्रितया
भ्यासाच्चित्तेऽर्थविरतेर्वशात् ॥ सत्त्वात्मनि स्थिते शुद्धे सत्त्वापत्तिरुदाहृता ॥ दशा

चतुष्टयाभ्यासात् ॥ असंसर्गकलाभिया ॥ रूढसत्त्वचमत्कारात्प्रोक्ता संसक्तिनामिका ॥ भू
मिकापंचकाभ्यासात्स्वात्मारामतया दृढं ॥ आभ्यंतराणां बाह्यानां पदार्थानामभावना
त् ॥ परप्रयुक्तेन चिरं प्रयत्नेनावबोधनं पदार्थाभाविनी नाम षष्ठी भवति भूमिका
॥ भूमिषट्कचिराभ्यासाद्भेदस्यानुपलंभनात् ॥ यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा ग
तिरिति ॥ अत्र भूमिकात्रितयं ब्रह्मविद्यायाः ॥ साधनमेव तत्त्वविद्याकोटावंतर्भवति ॥ भेदस
त्त्वबुद्धेरनिवर्तितत्वात् ॥ अत एवैतज्जागरणमित्यपदिश्यते ॥ तदुक्तं ॥ भूमिकात्रित
यमेतद्राम जाग्रदिति स्थितं ॥ यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते ॥ इति ॥ चतुर्थभूमेर्जग
दुपादानाद्ब्रह्मसत्त्वापत्तेर्वास्तवमद्वितीयस्वभावे निश्चितत्वात् ॥ भिन्नब्रह्मत्वारोपितत्वा
ज्जगत्स्वप्नाभिधेयया भाति [illegible] ॥ पूर्वोक्तं जागरणम
पेक्ष्यैतत्स्वप्नं भूमिः ॥ तथाहि ॥ अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते ॥ पश्यंति स्वप्नवल्लोकं

जीवन॰
८१

चतुर्थी भूमिकाः ॥ विविक्तं शास्त्रदृष्ट्यां त्रांविज्ञानं प्रविजीयते ॥ सत्त्वापत्तिरेव एवास्ति भूमिकामि
ताः इति सोयं चतुर्थीं प्राप्तो योगी ब्रह्मविदित्युच्यते । पंचम्यादयस्तिस्रो भूमियो जीवन्मुक्तेरवां
तरभेदाः । ते च निर्विकल्पकसमाध्यभ्यासकृतेन विश्रांतितारतम्येन संपद्यंते ॥ पंचमभू
मौ निर्विकल्पकात् स्वयमेव व्युत्तिष्ठति सोयं योगी ब्रह्मविद्वरः ॥ षष्ठभूमौ पार्श्वस्थैर्बो
धितो व्युत्तिष्ठति ॥ सोयं ब्रह्मविद्वरीयान् । तदेतद्भूमिद्वयं सुषुप्तिरिवाभिधीयते ॥ तदाह ॥ पं
चमीं भूमिकामेत्य सुषुप्तिपदनामिकां । शांताशेषविशेषांशस्तिष्ठत्यद्वैतमात्रके ॥ अंतर्मुख
तया तिष्ठन् बहिर्वृत्तिपरोपि सन् परिश्रांततया नित्यं निद्रालुरिव ल
क्ष्यते ॥ कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः ॥ षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति
भूमिकां ॥ यत्र नासन्न सद्रूपो नाहं नाप्यनहंकृतिः ॥ केवलं क्षीणमनन आस्तेऽद्वैतेऽतिनिर्भयः
गतः ॥ अंतःशून्यो बहिःशून्यः शून्यकुंभ इवांबरे ॥ अंतःपूर्णो बहिःपूर्णः पूर्णकुंभ इवार्णवे ॥ गाढं

राम॰
८१

निर्विकल्पसमाधिं प्राप्तस्य संस्कारमात्रस्य चित्तस्यैवेनोरांतर्यं कर्तुं बाह्यपदार्थान् ग्रहीतुं वासा
मर्थ्याभावादाकाशावस्थितकुंभवदंतर्बहिः भूमं स्वयंप्रकाशसच्चिदानंदैकरसे ब्रह्मणि
निमग्नेन समुद्रमध्यस्थापिनजजपूर्णकुंभवदंतर्बहिः पूर्णत्वं तुरीयाभिधां सप्तमभूमिं
प्राप्तस्य योगिनः ॥ स्वतः परतो वा व्युत्थानमेव नास्ति तादृशमेवोपदिश्यते हं विश्वरमव
स्थितं वेत्यादिवाक्यं प्रवृत्तं ॥ असंप्रज्ञातसमाधिप्रतिपादिकानि योगशास्त्राण्येतत्रैव प
र्यवसितानि सोयमीदृशो योगी सर्वोदारूढतां प्राप्तो ॥ ब्रह्मविद्वरिष्ठ इत्युच्यते ॥ तदेवं पार्श्व
स्थबोधितः सिद्धो न पश्यति त्वनयोर्भूमिद्वये व्यवस्थितत्वान्न कोपि विरोधः पंचम्यादिभू
मित्रयरूपायां जीवन्मुक्तौ संपद्यमानायां द्वैतप्रतिभासेनाकेनसंशयविपर्ययाभा
वादुत्पन्नं तत्त्वज्ञानं अबाधेन रक्षितं भवति । सेयं ज्ञानरक्षा जीवन्मुक्तेः प्रथमं प्रयोज
नं ॥ तपो द्वितीयं प्रयोजनं ॥ योगभूमीनां देवत्वादिप्राप्तिहेतुतया तपस्त्वं द्रष्टव्यं ॥ तदेतुत्वं

यो०व०न०
८८

वार्जुनं भवतीः॥ श्रीरामस्मिं श्लोके सप्रश्नोत्तरं स्मारयवगम्यते॥ अर्जुन उवाच॥ ॥अयतिः
श्रद्धयोपेतो योगाच्चलितमानसः॥ अप्राप्य योगसिद्धिं कां गतिं कृष्ण गच्छति॥ कच्चिन्नोभ
यविभ्रष्टश्छिन्नाभ्रमिव नश्यति। अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः॥ पथि॥ श्रीभगवा
नुवाच॥ प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टो
भिजायते। अथवा योगिनामेव कुले भवति धीमतां॥ एतद्धि दुर्लभतरं लोके जन्म यदी
दृशं॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं॥ यतते च ततो भूयः संसिद्धौ कुरुनंदने
त्यादि॥ श्रीराम उवाच॥ ॥ एकामथ द्वितीयां वा तृतीयां भूमिकामुत॥ आरूढस्य मृतस्या
थ कीदृशी भगवन् गतिः॥ ॥ वसिष्ठ उवाच॥ ॥योगभूमिकयोत्क्रांतजीवितस्य शरीरिण
:॥ भूमिकांशानुसारेण क्षीयते पूर्वदुःकृतं॥ ततः सुरविमानेषु लोकपालपुरेषु च मे
रूपवनकुंजेषु रमते रमणीसखः॥ भूतो सुकृतसंभारे दुःकृते च पराकृते॥ भोगक्ष

राम०
८८

यपरीक्षाणे जायंते योगिनो भुवि॥ शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सतां॥ तत्र प्राक्भाव
नाभ्यस्तयोगभूमित्रयं बुधः युक्तः पुनः प्रतत्तु चैतत्स्वमं भूमिकाक्रममिति। अस्त्वेवं यो
गभूमीनां देवलोकप्राप्तिहेतुत्वं तावता तपस्त्वं कुतः इति चेत्॥ श्रुतेरिति ब्रूमः। तथा च तैत्ति
री आम्नामनंति तपसा देवतामग्र आसन्॥ तपसर्षयः स्वरन्वविंदंति इति ननु तत्त्वज्ञानात्माचि
नस्य भूमिकात्रयस्य तपस्त्वं न तत्त्वज्ञानस्योत्तरकालीनस्य निर्विकल्पसमाधिरूपस्य पं
चम्यादि भूमिकात्रयस्य तपस्त्वं केमुतीकन्याये न सिद्धिं॥ अत एव स्मर्यते॥ मनसश्चेन्द्रिया
णां एकाग्र्यं परमं तपः। तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते इति॥ यद्यप्येतेनाप्ये
नत्यसाम्राज्यं जन्मान्तरं नास्ति तथापि लोकसंग्रहायेदं तत्र उच्यते॥ अत एव भगवानाह
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसीति॥ सत्याख्यश्च लोके त्रिविधः॥ शिष्यो भक्तः स्व
स्थश्चेति॥ तत्र शिष्यस्यांतर्मुखयोगिनि गुरौ प्राप्तौ लौकिकत्वबुद्धिनिरासायेदमुपदिश्यते

नीलकं०
८९

परमविश्वासं प्राप्य चित्तं सदसा विश्राम्यति ॥ अत एव श्रूयते ॥ यस्य देवे परा भक्तिर्यथा
देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति स्मर्यते च ॥ श्रद्धावांल्लभते
ज्ञानं तत्परः संयतेंद्रियः ॥ ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ अत्र प्रदानेन विवा
सस्थानकल्पनादिना योगिनां सेवमानो भक्तस्तदा तपःस्वयमादत्ते ॥ तथा च ॥ श्रूयते
तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति तदस्योपि द्विविधः
अस्तिको नास्तिकश्चेति ॥ तत्रास्तिको योगिनः सन्मार्गाचरणादेव स्वयमपि सन्मार्गे प्र
वर्त्तते ॥ तथा च स्मृतिः ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनाः स यत्प्रमाणं कुरुते लो
कस्तदनुवर्त्तत इति ॥ नास्तिकोपि योगिना दृष्टः पापान्मुच्यते ॥ तदुक्तं ॥ यस्मान्नु नवप
र्यंतात्तत्त्वबुद्धिः प्रवर्त्तते ॥ तद्दृष्टिगोचराः सर्वे मुच्यंते सर्वपातकैरित्यनेन प्रकारेण सर्व
प्राण्युपकारित्वं विवक्षितं त्वादापद्यते ॥ कुलं पवित्रं जननी कृतार्था वसुंधरा पुण्यवती च ये

राम०
८९

न अपारसंवित्सुखसागरेस्मिन् लीनं परे ब्रह्मणि यस्य चेतः ॥ न केवलं योगिनः शास्त्री
यव्यवहारतत्परत्वं किंतु सर्वस्यैव लौकिकव्यवहारस्यापि ॥ तथा च तैत्तिरीयाः समा
मामनंति चानुवाके न विदुषोपि महिमानमामनंति ॥ तस्मिश्चानुवाके सर्वभोगे योगि
नो वयवत्तांगत्वेनाम्नाता ॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः ॥ श्रद्धा पत्नी शरीरमिध्म
मुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः ॥ काम आज्यं ॥ मन्युः पशुस्तपोग्निः दमः श
मयिता ॥ दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीदिति ॥ अत्र
दानं दक्षिणेति यद् मध्यावरुद्धं ॥ अथ पत्नयो दानमार्थवादिस्यासत्यवचनमिति ॥ वाग
स्य दक्षिणेति छंदोगैराम्नातत्वात् उक्तानुवाके तस्य धर्मा भावेन योगिव्यवहारस्ती
त्रीचनकाज्यश्चर्योतिष्टोमा ॥ वयवक्रियात्वेनोक्तरसर्वयज्ञावयवक्रियारूपत्वेन चा
म्नाताः यावज्जीवपत्नेसारीक्षा ॥ यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तद्

यस्तद्वेद संचरन्नुपविशन्तितिष्ठते च स एवर्योग्य सुखं न तादृवनीयः॥ याज्याहुतीराहुस्त्विर्य
दस्य वितानं तन्नुदोति॥ यस्मायं प्रातरग्निहोत्रमभिधीयत्यात मध्यंदिनं पक्त्वा यंचनीतामिस
वनातिथ्येऽहोरात्रे तेद्दर्शपूर्णमासौ येद्र्धमासाश्च मासाश्च ते चातुर्मास्यानि यदृतवस्ते पशुबं
धाः॥ ये संवत्सराः ते द्वादशाहः सर्ववेद संवायः॥ तस्मात्त्रं यन्म्रियते तदवभृथमितिसर्ववेद स
ल दक्षिणाकां अत्रैतन्धरे तन्मरुते होत्रादि वत्सरांत सर्वकालं समस्त्यु पलक्षितं यो
गिनेः क्रियामुर्विलसते॥ यद्वा दा पुरुस्त सर्ववेददक्षिणोपेतं सत्रमित्यर्थः॥ उत्तरानुवाके
चरमभागे न सर्वयतात्मकं योगिनमुपासीनस्य क्रममुक्तिरुपरत्यार्चं रमसोः क्कार्य
कारणब्रह्मणो महिमानमित्युपविष्टादिति॥ जरामरणावधिकं यद्योगि चरितमसितरु
देहकाग्निहोत्रादीसंवत्सरसत्रांतकर्मस्वरूपमित्येवमुपासीनो भावनातिशये नसूर्य
सूर्यद्यमसोः सायुज्यं तत्सात्म्यं माप्नोति भावनामांद्ये न समालोकंमाप्नोत दितिस्मिंल्लोके

सूर्याद्यमस्योर्विभूतिमनुभूयते तेऽवश्य स्यलोके च तनुमुखस्य ब्रह्मणो महिमानमा
प्नोति तदोपेत तत्ता ने न तद्द्वय सत्तता नानंदरूपस्य परब्रह्मणो महिमानं केवल्यमा
प्नोतिरत्युपनिषदित्य नेन यथोक्तं विद्यायास्तत्त्राति पादकं ग्रंथोस्योपसंहारः क्रियते
॥ तदेवं जीवन्मुक्तेः स्वरूपं प्रतिपाद्य प्रयोजनं विसंवादाभावस्ततीयं प्रयोजनं॥ न
खात्वं तनुमुखे बाह्यव्यवहारव्यापृतौ योगिष्वरे लौकिकः तैर्थिको वा नस्य कश्चिदपि संवने
॥ विसंवादो द्विविधः॥ कलहरूपो निंदारूपश्च तत्र क्रोधाहितेन योगिना सह क
यनं नाम लौकिकः॥ कलहः येन क्रोधहितं संपद्यते॥ कुप्यंतं न प्रति कुप्येदाकृष्टः
कुशलं वदेत्॥ अतिवादांस्तितिक्षेत नावमन्येत कंचनेति॥ न तु जीवन्मुक्ते॥ प्राची
नो विरुद्धं स्वपासम्पनो पि प्राचीनं तत्त्वज्ञानं तस्मादपि प्राचीनो विविदिषा तं सांप्र
॥ अत्रैते क्रोधादिराहित्य धर्माः कथं सन्ता इति चेत्॥ बाढं॥ अत एव जीवन्मुक्त

स्य क्रोधादयः॥ शंकितुमर्हाः अर्वाचीनपदेपि विदिषां संन्यासेपि दा क्रोधादयो न
संति तस्योत्तमपदे तत्वज्ञाने कृतस्य सुः कृतस्तरां विद्वत्संन्यासे कृतस्तमां चतुर्विधनमुक्तो॥ अ
तोनं योगिनां सद्भ्लोके कलहः संभवति॥ नापिपिंदारूपोपि संवादः शंकनीयोनिषस्यानि
श्चितत्वात्॥ यथाच स्मर्यते यं न संतं न वा संतं नाश्रुतं न बहुश्रुतं न सुवृत्तं न दुर्वृत्तं वेद
काश्चिद्वै यतिरिति॥ मदस्तेउत्तमाधममातिरिति॥ तीर्थपि कोत्रात्मप्रमेये विज्ञं वदे
ते किं वा योगिचरिते॥ अहो न तु योगी परत्वात्मप्रमेयं द्रूपयति तं मैवै कं जातु नेति॥ तो
र्थपि आत्मानमन्या वाचो विमुंचथ॥ नानुध्यायान्बहून्छब्दान्वाचोविग्लापनं
हि तदिस्यादि श्रुत्य उरोधात् नापि स्वत्रास्त्रप्रमेयं प्रतिवादिनोग्र. समर्थयते॥ पत्रा
प्रमेये वधान्यार्थीत्सिजे द्वंधमत्नोपतः॥ परमं ब्रह्मवित्राप्य उत्कोवन्नात्मप्योत्स्मे हि
श्रुतस्पर्थपरत्वान्नपदा प्रतिवादिनमपि स्वत्मतया वीक्षते॥ तदा विजिगीषायाः कृ

कृपाना पिलोकायतिकव्यतिरिक्तः सर्वोपि तीर्थिको क्षमगीकुर्वन्योगिचरितेपि वि॥
संवदितुमर्हति॥ आर्हत बौद्ध वैशेषिक नैयायिक शैव वैष्णव शाक्त सांख्ययोगादिभि
क्षत्रास्त्वेपुप्रमेयस्य नानाविधत्वेपि मोक्षसाधनस्य यमनियमाद्यष्टांगयोगस्यैक
विधत्वात्॥ तस्माद्विसंवादेन सर्वसंमतो योगीश्वरः॥ एतदभिप्रेत्य वसिष्ठ आह स्य
स्येदं जन्म याश्वात्स्यंते माश्र्वेव मद्यमते॥ विश्रांतिविधिवाविमलाश्रुक्ता वेणुविवोत्तमां॥ आ
र्य्यताहृद्यता मैत्री सौम्यता मुक्तता तता॥ समाश्रयंति तं नित्यं मं तं तः॥ पुरमिवांगनाः
पेशलाचारमधुरं सर्वे वांछंति रंजनता॥ वेणुमधुरनिध्वानं वनेवमृगा इव सुपुसव
तप्रशमितनावबल्लि नाति तः सदाजागर्तियेनचेतसाकलाञ्चितो विधुरिवयः सद
बुधैर्निषेव्यते मुक्त इति कथ्यस्य तदिति॥ मातरीव परायामं तिविषमानि मदतिश्च॥ वि
श्वासमिहभूतानि सर्वाणि समरत्राणि॥ नयस्वेधुबुद्धेते भुयागके पुनपेशुचा॥

श्रीरत्न॰ ९२

विश्वासमिदं भूतानि सर्वाणि समत्राणि लिनि ॥ एवमस्य गुणादेषु त्रामवानेव राजतेइति
तवमबाध जीवन्मुक्तेर्विसंवादाभावरूसं तृप्तियं प्रयोजनं सिद्धं ॥ दुःखनाशसुखावि
र्भावरूपं च मे रूपे प्रयोजने विद्यानंदात्मके न ब्रह्मानंदगते न चतुर्थाध्याये न निरू
पते तदुभयमंत्र संक्षिप्योच्यते ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ कि
मिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ इत्यादिश्रुत्या दुःखस्योच्छिकस्य विना
श उक्तः ॥ एतद्ध वा न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्यादिश्रु
तय ॥ आमुष्मिके हेतुदुःखस्य पर्विताकूपस्य दुःखस्य नाशमाह ॥ सुखाविर्भा
वस्त्रिधा सर्वकामावाप्तिः कृतकृत्यत्वम् प्राप्तप्राप्तव्यत्वं चेति सर्वकामावाप्तिस्त्रेधोपसमा
प्तित्वं सर्वत्राकामहतत्वं सर्वभोक्तृत्वं चेति ॥ हिरण्यगर्भादिस्थावरांतेषु दे
हेषु अनुगतत्वं साक्षित्वेन तन्मद्रूपं यन्मद्रूपं तदेवास्मीति जानतः ॥ स्वदेहइव पर

राम॰ ९२

देहेष्वपि कामसाक्षित्वमस्ति तदेतदभिप्रेत्य श्रूयते ॥ सोऽश्नुते सर्वान्कामान्
सह ब्रह्मणा विपश्चितेति लोके मुक्तेषु भोगिषु अकामहतत्वादस्ति सर्वकामावा
प्तिः ॥ अत एव सर्वभोगोपक्रमे बृहदारण्यगर्भपर्यंतेषु उत्तरोत्तरस्यागुणेषु आ
नंदेषु श्रोत्रियस्य चाकामहतस्येति श्रुतेः स्वरूपेणानंदरूपेण सर्वत्रावस्थितं
स्वात्मानमनुसंदधतः सर्वभोक्तृत्वमस्ति तमिमं सैवं श्रूयते ॥ अहमन्नमहम
न्नाद इति कृतकृत्यत्वं तु स्मर्यते ॥ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ॥ नैवास्ति किं
चित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥ आ
त्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते इति प्राप्तप्राप्तव्यता श्रूयते ॥ अभयं वै
जनक प्राप्तोऽसीति तस्मात्तत्सर्वमभवदिति ॥ ब्रह्मविद्ब्रह्मैव भवतीति च न
ानन्दैश्चेतौ द्वौ दुःखविनाशसुखाविर्भावौ तत्त्वज्ञानेनैव सिद्धत्वात्र जीवन्मुक्तौ

प्रयोजनमर्हतः॥ एवं सुरक्षितयोस्तयोस्तयोरविक्षिप्तत्वात्॥ यथा कल्पतरावे
श्वमेवोत्सन्नमपि जीवन्मुक्तस्य सुरक्षितं भवति एवमेतावपि सुरक्षितौ भवतः। तत्रै
वं जीवन्मुक्तेः पंचप्रयोजनत्वे सति समाहितो योगीश्वरो लोकव्यवहारं कुर्वतः॥
त्वनविरोधप्रश्न इति वक्तव्यं तत्र प्रश्नोत्तरान्यान्दर्शनं॥ श्रीराम०॥ भगवन्भूत
भव्येश कस्मिञ्जात समाधिः॥ प्रबुद्ध इव विश्रांतो व्यवहारपरोपि सन्॥ कश्चिदेकांत
माश्रित्य समाधिनियमस्थितः॥ तयोस्तु कतमः श्रेयानिति मे भगवन्वद॥ वसि
ष्ठ उवाच॥ इमं गुणसमाहारमनात्मत्वेन पश्यतः। अंतःशीतलता यासौ स
माधिरिति कथ्यते॥ दृश्यैर्न मम संबंध इति निश्चित्य शीतलः। कश्चित्संव्यव
हारस्थः कश्चिद्ध्यानपरायणः॥ द्वावेतौ राम सुखिनौ यद्यंतः शीतलौ॥ अं
तः शीतलता यत्स्यात्तदनंततपः फलमिति नैव दोषः॥ अथवा मनोनाशय

रूपत्वे हेत्वतः॥ शीतलत्वमवश्यं संपादनीयमित्येव संपाद्यते। ननु तदंतर्भावि
नो मनोनाशस्य श्रेष्ठत्वं निवार्यते शीतलत्वं च ध्यायाः राम न मिथि। तादृशीं वि
वक्षां स्वयमेव स्पष्टीचकार॥ अंतःशीतलतायां तु लब्धायां शीतलं जगत्॥ अंत
स्तृष्णोपतप्तानां दावदाहमयं जगदिति। ननु समाधिर्निदाघव्यवहारसंसारस्वा
नोपलभ्यते समाधिस्थानकस्तस्य चेतसो ह्युक्तिरेवं चलं॥ तस्य तु समाधानं समसु
न्यवहारं दैवेः॥ उन्मत्तता तु व्यक्तस्य चेतसो तस्मीणवासनां मदस्योन्मत्तत्वं तु स
मंत्रस्य समाधिर्नेति॥ मैवं॥ अत्र हि समाधिप्ररूपस्य भावि मे वंशीकल्पवासनाधि
घते॥ इयमत्र वचनव्यक्तिः। यद्यपि व्यवहारांस्तु समाधि। प्रमत्तस्तत्र व्यापृतो सबा
सनाश्चेत्तदापि वासनानाम्यवहाराधसत्व एव सवासनाः समाधिः। यदि समाहित
व्यवहर्त्तारावुभावपि अत्र तत्वे तौ सवासनौ चेत तदा समाधेरुत्तमलौकमार्ति

जीवन० ९१

देहेतु पुण्यत्वेन माशास्त्वं यदा तु सौ तास्यनविशेषो निर्वासनैव ॥ तदपि वासनाक्षयेन तु मा
जीवन्मुक्तिपरिपालनयत्नमनोनाशरूपसमाधिः सत्यमत्र एव ॥ तस्माद्योगीश्वरस्य
श्रेष्ठत्वात्तं प्रयोजनीयेतया जीवन्मुक्तेर्न कोपि विघ्नः ॥ इति जीवन्मुक्तिप्रकरणं स्व
रूपप्रमाणसाधनैर्जीवन्मुक्तिर्निरूपिता ॥ अतएव उपकारिणं विद्वत्संन्यासं नि
रूपयामः ॥ विद्वत्संन्यासस्य परमहंसोपनिषदि प्रतिपादितः ॥ तां चोपनिषदम
नुव्याख्यामः ॥ तत्रादौ नारदो भगवंतमुपगम्योवाचेति ॥ यद्यप्यत्र नारदपृष्टितं श्रा तं
तद्यप्रतियोगीनकोऽयमार्ग इति मातिं ॥ तथा च अयं मार्गो विद्वत्संन्यासः ॥ तस्मिंश्च
विदितनलोकव्यवहारैर्विक्षिप्यमानो मनो विश्रांतिकांक्षया मनोधिकारी ततस्तत्वार
गधिकारसंपत्त्यानंतर्यमथशब्दार्थः ॥ केवलयोगिनः केवलपरमहंसस्य चैवार
यितुं पदद्वयमुक्तं केवलयोगी तत्त्वज्ञानाभावेन क्षिकाल तकाभ्यासमनादितु यो

राम० ९१

गैरवशवमक्तारब्धवदारेधासक्तः ॥ संयमविशेषैस्तत्र त्रयोयुक्तं ततः परमपुरुषा
र्थरूपत्वो भवति ॥ तस्मिन्नर्थे तत्त्वाः पूर्वमेवोदाहृतं तेन समाधावुपसर्गा व्युत्थाने सिद्ध
य इति ॥ केवलपरमहंसस्तु तत्त्वविवेकेनैश्वर्यमसारतां बुद्ध्वा विरज्यति ॥ तदप्युदा
हृतं चिदात्मन् इमाः संतं स्फुरंतिहि शक्तयः ॥ इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतूह
लमिति ॥ विरक्तोप्यसौ ब्रह्मविद्यानर [illegible] विधिनिषेधावुल्लंघयति तदुक्तं ॥ निस्त्रैगुण्ये पथि
विचरतां को विधिः को निषेधयति ॥ तथा च भगवान्वः शिष्टास्तमेव निंदंति ॥ सर्वे ब्रह्म
वदिष्यंति संप्राप्ते च कलौ युगे ॥ नानुतिष्ठंति मैत्रेय शिश्नोदरपरायणा इति ॥ योगिनि
परमहंसे दोषद्वयं नास्तीत्यनन्योच्यस्ताति त्रायः ॥ प्रश्नोत्तररा स्यात्स्मृतिः ॥ श्रीराम०
॥ एवं स्थिते विभगवन्जीवन्मुक्तस्य सत्तमः ॥ कस्स्वातित्रायः को सो भवत्यात्म
विदांवर ॥ वसिष्ठ उवाच ॥ तस्य कस्मिंश्चिद्देवो भगवत्यतित्रायेन धीः ॥ विस्पतश्मा

मन्त्राणां नाना सत्वा आत्मन्येव तिष्ठति ॥ मंत्रसिद्धिस्तपःसिद्धिर्योगसिद्धिश्च भूयिष्ठाः ॥ कृतमा
कासया नादित्र्यकाम्या दर्शना ॥ एकस्यैव विशेषोस्य न समो मूढबुद्धिभिः सर्वत्रास्था
परित्यागात्तीरागम मलं भवः ॥ एतावदेव तु लिंगमलिंगमूर्तेः ॥ मंत्राणां संसविवि
रश्र मनिरुतस्य ततस्य यन्मदनकोप विचारलोभोपशमनबुद्धिनं लिपुएषं त्वमिति ॥
अनेनातिरूपेणोपेतानां दोषद्वयरहितानां मार्गस्थितिर्दृष्टैते ॥ देशभाषादिरूपो
हिव्यवहारो मार्गः ॥ द्वितीयोपरमहंसपुरश्रांतरो धर्मः स्थितिर्भगवाश्च तत्सुखो ब्रह्मा ॥
यथोक्तं प्रश्नोत्तरमवधारयति ॥ तं भगवानाहेति ॥ वक्ष्यमाणमार्गस्य द्वाविंशायमु
स्यादपि तुं मार्गं प्रशंसति ॥ येप्ययं परमहंसमार्गो लोके दुर्लभतरो न तु बाहुल्यइति
यः श्रद्धः ॥ सोयमिति योजना स्वयमित्युत्तरे ग्रंथे वक्ष्यमाणः ॥ आठादनादि पुत्रा
रीरोपभोगि लोकोपकारेण निरपेक्षो मुख्यमार्गः ॥ परामनप्रते ॥ नादत्रास्य परम

काशमात्रस्यैव रागस्पादृश्वरत्वात्तस्य मार्गस्य दुर्लभतरत्वं तत्त्वैव तात्पर्यं तामान्
कनीयस्त्वमित्रस्य बाहुल्यमेव प्रतिषेधति ॥ न तु बाहुल्यइति ॥ लिंगमत्र यस्थोद
सः ॥ ननु स्वयं मार्गो दुर्लभतरश्चेत् तर्हि तत्र यत्नो न कर्तव्यः ॥ तेन प्रयोनाना
वादित्यात्तं ब्राह्मणस्येकोभवति स एव नित्यपूत स्थः स एव वेदपुरुष इति विदुषो मन्य
ते इति ॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सोयः कश्चिल्लभ्यते ॥
तर्हि स एव नित्यपूतस्थो भवति नित्यपूतः परमात्मानं अधेयपदं तत्पाप्नोति श्रुतेः ॥ एवं का
रेणा केवलयोगी केवलपरमहंसो व्यावर्तते ॥ केवलयोगी नित्यपूतं न प्राप्नोति ॥ केव
लपरमहंसोपि नात्मपि विचिव विश्रांत्यभावाद्बहिर्मुखो ब्रह्मणो न तु इति वेदप्रति
पाद्यः पुरुषो वेदपुरुषः ॥ विद्वांसो ब्रह्मानुभवविश्रांतिप्रतिपादकत्वादात्म
पारगतायोगिनः ॥ परमहंसस्य ब्रह्मनिष्ठत्वं सर्वेषां नाम मन्यंते ॥ यथोक्तं विद्वांस

स्कंदस्यस्वरमानानां ब्रह्मत्वमेवमन्यंते॥ तथा च स्मर्यते॥ सर्वोनादर्शनि दित्वा स्वयं के
वलरूपतः यस्तिष्ठति स तु ब्रह्मन् ब्रह्मलि विस्त्वयमिति॥ अतो न प्रयोजनाभावः शं
कितुमपि युक्त्यते॥ निष्ठतस्य तत्त्वं वेद पुरुषत्वं च मुख्यतो विद्यादयमार्थेऽल्पस्थि
तिरिप्रश्नो नरं संस्तदयति॥ महापुरुषोपस्थितं तत्क्षणमेवावतिष्ठते॥ तस्मादहं
च॥ तस्मिन्नेवावस्थीयत इति वैदिकानां कर्माधिकारिपुरुषो बुमध्ये योगिनः परम
हंसस्यास्य तत्पुत्रमत्वान्महापुरुषत्वं स च महापुरुषोपस्थितं स्वकीयं तत्क्षणमेवाव
स्थापयति॥ संसारगोचराणां तदाद्वचितन्वति नामान्यो निरुद्धत्वात्॥ अत एव भगवा
नुग्रगापति॥ तान्सिद्धं परमात्मानं स्वानुभवेन परामृशन्नमयीति व्यपदिशति॥
यस्याघो योगी यत्येव स्थितं स्थापयति तस्मादहमपि परमात्मस्वरूपत्वेन तस्मिन्नेवयो
गिना स्थितौ वस्थितो स्थित्रेनरेश अजानाति युते युमविघान्तत्वात्तत्त्वविद्यपि अयो

गिषुमावाघवितवृति मिथाद्वतत्वात्तस्याविर्भावः॥ इदानीं कार्यं मार्गं इति उपदि
शति॥ असौ स्वपुत्रमित्रकलत्रबंधूदीन् विरखायतो पवीतस्वाध्यायं च सर्वकर्मा
णि संन्यस्याय ब्रह्माहं च हित्वा कौपीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय च
लोकस्योपकारार्थाय च परिग्रहेदिति॥ यो ग्रस्तः पूर्वजन्मसंचितपुण्यपुंजेपु
रिपक्के सति मातपितृतामादिनाल्लिकेन विहित्वा संन्यासरूपं परमहंसाश्रममस्वी
कृत्यैवश्रवणादिसाधनान्यनुष्ठापयन्नसम्य। ग्गवाछति॥ ततो गृहीस्थाश्रमो लौकि
कवैदिककर्मफलस्मरहस्तो चितैर्विक्षेपैः मतिविश्रांतिसिद्धये विद्वत्संन्यासिकी ख्याति। तं म
ति स्वपुत्रमित्रेत्याद्युपदेशः पूर्ववत् विविदिषासंन्यासेकृत्वा तत्त्वं विदितवतेऽविद्व
त्संन्यासं विकीर्षोः पुत्रकलत्रादिप्रसंगाभावात् तन्नरूपं विद्वत्संन्यासः॥ किमितर
संन्यासवत् तत्रापि अनुग्रहणादिविधुक्रमकारेण संपादनीयः॥ किंवा जीर्णवस्त्रयोप

जीव० ९१

इव ग्रामादिभागत्यागो लौकिकत्यागमात्ररूपः ॥ नाद्यः तत्त्वविदः कर्तृत्वराहित्येन विधिनिषे
धानधिकारात् ॥ अत एव स्मर्यते ॥ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । नैवास्ति
किंचित्कर्तव्यमस्ति चेन्न स तत्त्वविदिति न द्वितीयः कौपीनदंडाद्याश्रमलिंगविधानश्र
वणात् ॥ नैष दोषः प्रतिपत्तिकर्मवदुपपन्नत्वोपपत्तेः ॥ तथा हि ज्योतिष्टोमे दी
क्षितस्य हरिणशृंगनियमानुष्ठानकाले कंडूयितुं हस्ते प्रतिषिद्धे हस्तस्य विषाणं विहि
तं द्वैधेय्येन कंडूये ॥ तथा यजमानेन भवुकाः प्रजाः स्युरिति ॥ कृष्णविषाणया कंडू
यत इति ॥ तस्याश्च कृष्णविषाणायाः समाप्तिर्यमे प्रयोजनाभावे सोऽपि मन्त्रा
क्यत्वाच्च त्यागः ॥ स्वत एव प्राप्तं तत्त्यागप्रकारं स्वेसो विदधाति नीतासु दक्षिणासु
चात्वाले कृष्णविषाणां प्रास्यतीति ॥ तदिदं प्रतिपत्तिकर्म लौकिकं चेत्तु प्रयत्नपं
एवं विद्वत्संन्यासोऽपि प्रतिपत्तिरूपः ॥ न चात्र तत्त्वविदि कर्तृत्वस्यात्यंताभावः ॥ कौपीनद्य

राम० ९१

ः चिरात्समारोपितस्य कर्तृत्वस्य विघयावोह्नितत्वेऽपि विच्छायापेते तत्कारणोपाधौ
विक्रियासद्भावयुक्ते स्वतः सिद्धस्य कर्तृत्वस्य यावदव्यभावितया न बोधितत्वात्
॥ न चैवं ज्ञानामृतेनेत्यादिस्मृतिविरोधः सत्यपि ज्ञाने विश्रांति रहितस्य कृत्यभावे
न विश्रांतिसंपादकस्य तल्लक्षणाकर्तृत्वस्य शेषसद्भावेन कृतकृत्यताभावात् ॥ ननु त
त्त्वविदो विध्यंगीकारे स्वभिते नारूढवंदेहांतरमारभ्येत मैवं ॥ तस्मात्सर्वस्य चित्त
विश्रांतिबंधवारणालक्षणस्य दृष्टफलस्य संभवे सत्यदृष्टकल्पनायाः प्रमाणा
प्रत्वात्स्मृत्यनुयायाश्च वचनादिविधिरहिताप्रवृत्तिर्नोऽस्मृतेः प्रतिबंधनिवारणात्सूपं दृष्ट
फलमुपेक्ष्य जन्मांतरदेहेतुत्वं कल्प्येत ॥ तस्माद्विध्यंगीकारे दोषाभावाद्विविदिषुरिव
विद्वानपि परमहंसो नारीमुखग्रंथाविद्या वा सजागरणादिविधिमनुसरेदेव संन्यसे
त् । यद्यप्यत्र श्रुतिर्विविदिकेनोपदिष्टा तथाप्यविद्वत्संन्यासस्य विविदिषासंन्यासवदि

कृतित्वा॥ तत्र कृतिर्विद्वत्कृतिः कर्तव्यमिति न्यायेन तदीया धर्मास्तत्प्रवर्तनामनुवंति॥ यथा
शिष्टेश्मस्य विकृतिश्च निराकारादिषु तदीयधर्म्मप्राप्तिः न दृष्टा॥ तस्मादितरसंन्यास
वदत्रापि प्रैषमंत्रेणापुत्रमित्रादित्यागसंकल्पयेत्॥ वंध्वादिनित्यादिना एतत्स्वसृ
पशुगृहक्षेत्रादिलौकिकपरिग्रहादिविशेषाः संगृह्यंते॥ स्वाध्यायं चेति चकारेण
तदर्थतिपर्यायोपयुक्तमिति पदवाक्यप्रमाणशास्त्राणि वेदोपबृंहणादितो इतिहास
पुराणानि च समुच्चिनोति॥ औत्सुक्यनिवृत्तिमात्रप्रयोजनानां काव्यनाटकादीनां
त्यागः केमुतिकन्यायसिद्धः सर्वकर्माणि न्यस्य लौकिकवैदिकनित्यनैमित्तिकनिषि
द्धकाम्यानि संगृह्यंते॥ पुत्रादित्यागेनैहिकं भोगः परिहृतः॥ सर्वकर्मत्यागेन आ
नुश्रविकलोकत्रयावित्तविक्षेपकरी एषणा परिहृता॥ अयमिति शब्दो दत्त्वा विमर्किकस्य
येनेदं ब्रह्मांडमिति योजनीयं॥ ब्रह्मांडत्यागो नाम तत्स्वामिहेतोर्विराडुपासनस्य

त्यागः॥ ब्रह्मांडं चेति चकारेण सत्त्वान्मपातालादे॥ तोरहिरण्यगर्भोपासनस्य तत्त्वसा
नहेतुनाश्रवणोपाद्भवेद्वा विरक्त्या यात्कुर्यात्स्वात्मस्वसंग्रहमिति॥ स्वशरीरोपभो
गोनामकौपीनाद्यात्स्व चेति चकारेणापाउकरणिसमुच्चिनोति॥ स्मृतिकौपीनयुगलं वा
सः कंथाशीतनिवारणीकौपीनेन लज्जामावृत्ति॥ दंडेन गोसर्पाद्युपद्रवपरिहारश्च
आच्छादनेन त्राणादिपरिहारः चकारात्पादुःकास्थानं कंटकदेशेस्वत्राणादिपरिहार
समुच्चिनोति॥ लोकस्योपकारो नामादरादिलिंगेन तदीयमुत्तमाश्रमं परिज्ञाय
तदुचितमभिवंदनं॥ भिक्षाप्रदानादिप्रवृत्त्यानुकूलनसिद्धिं॥ चकाराभ्यामाश्रममर्यादा
याः शिष्टाचारप्राप्तायाः पालनं समुच्चिनोति॥ कौपीनादिपरिग्रहस्यानुकल्पत्व
मभिप्रेत्य मुख्यत्वं प्रतिबोधयति॥ तच्चान्तमुख्योस्तीति यत्कौपीनादिपरिग्रहणमस्ति
तदस्य योगिनः परमहंसस्य मुख्यः कल्पो न भवति किंत्वनुकल्प एव विविदि

यो संन्यासि तस्तु दंडग्रहणं मुख्यमिति कृत्वा दंडवियोगस्य निषेधं स्मरंति दंडात्मनो
स्तु संयोगः सर्वदैव विधीयते ॥ तं दंडं विना गच्छेदिषुक्षेपत्रयं बुध इति ॥ प्रायश्चि
त्तमपि दंडनाशे प्राणायामशतं स्मर्यते ॥ दंडत्यागे कायं चरेदिति । योगिनः परमहं
सस्य मुख्यं कल्पं प्रश्नोत्तराभ्यां दर्शयति ॥ कोयं मुख्य इति चेद् येन मुख्यो न दंडं न शि
खं न यज्ञोपवीतं नाच्छादनं चरति परमहंस इति ॥ नहि शीतमिति छांदसो लिंगव्यत
योनुसंधेयः ॥ यथाविधिविदिष्टुः परमहंसः शिखायज्ञोपवीताभ्यां रहितो मुख्यस्तथा
योगी दंडाच्छादनाभ्यां रहितः सन्मुख्यो भवति ॥ दंडस्य वेणुत्वादि लक्षणं ॥ आच्छादन
स्य कंथात्वादि स्तथा योगी दंडाच्छादनाभ्यां रहितं च चरक्षितुं च चित्तेनाकृतेनस
न्नित्य विरोधलक्षणो योगो न सिध्येदिति ॥ तत्र तत्रयुक्तं बहिर्विरविघातायं
कल्पोवा हरति भ्यापातः ॥ आच्छादनाद्यभावे शीतातापादिबाधायाः ॥ कथमतिकार इत्या

शंक्याह ॥ न शीतं न चोष्णं न सुखं न दुःखं न मानावमाने च षडूर्मिवर्जमिति ॥ तितिक्षा
शेषसहिष्णुत्वात्योगिनः शीतं नास्ति तस्य यथा भावात् ॥ यथालोलापा मासक्तस्य बा
लस्याच्छादनादिरहितस्यापि हेमंतशिशिरयोः प्रातःकाले शीतं नास्ति तथा परमा
त्मासक्तस्य योगिनः ॥ शीताभावः घर्मकाले उष्णाभावश्चैतद्वेद्यं ॥ वर्षाभावस्तु
च्छ्रायार्थश्च कारः शीतोष्णयोरुपनीतयोस्तयोस्तज्जन्ययोः सुखदुःखयोरभाव
उपलक्षः निदाघे शीतं सुखजनकं हेमंते दुःखजनकं ॥ उक्तविपर्ययउष्णेन षट्क
ःमानः पुरुषांतरेण संपादितः सत्कारः अवमानस्तिरस्कारः ॥ यदा योगिना
आत्मनो व्यतिरिक्तं पुरुषांतरमेव न प्रतीयते तदा मानावमानौ इतरादयेतो ॥ च
कारः शत्रुमित्ररागद्वेषाग द्वेषादि द्वन्द्वानां वंसमुच्चिनोति ॥ षडूर्मयः श्रुति
मासे नोक्तमोहौ जरा मरणमेव ॥ ते षड्रमाणादेहानां क्रमेण प्राणमनोदेह

जीवे न०
१००

धर्मत्वोदार्मन्वां दात्मवत्वात् सुखस्य योगिन स्वदर्शनं युज्यते ॥ ननु यस्त्वेवं समाधि
स्त्रायां शीताद्यभावः सुखाभवत्वाद्यं नुनिंदादिकं न्याय ॥ संसारिणमिवैनं बाधतए
वि सांत्रं वसम् ॥ निदा गर्वमत्सर दंभ यदर्ष्ये छाहे बेसुखद ॥ स्वकाम क्रोध लोभमो
हदर्पा स्तत्पादं कायं दोषबुद्धि न्वेति ॥ विविवे ॥ पुरुषे ॥ स्वस्मिन्न पादित दोषो कि र्निं
दा ॥ अन्यस्योधिको हमिति चित्तवृत्तिर्गर्वः ॥ विद्याधनादि निरस्य सदृशो न्यवामो
ति बुद्धिर्मत्सरः ॥ परेषामग्रे न्यथमानादिम कुर्वनं दंभः ॥ मर्कानादिषु बुद्धिर्दर्प
ः ॥ धनाधलितो लोभरुष्णा ॥ वानुषधादि बुद्धिद्वेषः ॥ अनुकूलत्व वादि लोभेन बुद्धि
स्वास्त्वं सुखं ॥ नहि पर्यवोदः खंयो पिदायमि लोषः काम ॥ कामितार्थ विघातजे
न्या बुद्धिक्षोभ क्रोधः ॥ नवस्वधनस्यत्यागासहिष्णुत्वं लोभः ॥ हिते अहित बुद्धिरदि
ते शुद्धित बुद्धिर्मोहः ॥ चित्तागत सुखे मिक्केजि कासु खविकानादि हेतुधीवतिर्

राम०
१००

र्षः ॥ परकीयपरगुणेषु दोषत्वारोपणमसूया ॥ देहेंद्रियसंघाते स्वात्मत्वम्मोऽहं
कारः ॥ आहितान्ननयोर्भोगवस्तुषु ममकाररूपो वा ममतारिबुद्धिर्ममता ॥ चकारे
यथोक्तनिंदादिविपरीतं स्तुत्यादिकं समुच्चिनोति ॥ एतान्सर्वान्निंदादीन्दिवा
रवीकवासः ॥ नाश्रयान्यासेन परित्यज्यावतिष्ठतीति शेषः ॥ ननु विद्यामात्रेणुप
रतस्यागो न संभवति स्यात्राहं ॥ स्ववधुः कुणपमिव दग्धपतनस्त्वद्गुरपद्धतिमि
ति ॥ दर्पः स्वकीयवपुस्तद्विदानीं स्वात्मवेतन्यात्मतत्परिमलत्वेन कुणपमिव
लोकयते ॥ यथाश्रद्धालुः स्वगृहं निर्माल्याभावेदं हरस्थितो वलोकयति ॥ तथायं यो
गी ताहात्म्यताक्यो सदयमिमाया वधानो देहे विदात्मनः संकारणान्निरंतरं नि
तक ॥ यतः कारणात् हृद्गुराचार्योपदेशात् मोनुभवैरपद्मस्यं चिदात्मनः सको
कानिराकृतं ॥ ततश्चैतन्यपि सुकृतस्य देहस्य राबवं तत्पादरुपमानत्वा भः

जीव न० १०१

स्यपिदेहेनिंद्रादित्ताघटनइत्यभिप्राय॥ननुतत्वतोदिग्गमःस्पर्योयत्क्षीनेनविभि
शेषपाकरादिविरहतुवर्त्ततेनथाकदाचिदात्मानेदेहात्मसंज्ञापादिग्गुरन्तोनिदारि
केत्राःपुत्रःपुत्रःश्रस्तज्योतेस्माहस्तेत्रायविपरीतमिथ्याज्ञानानांयोदेहेतुतित्वत्तेनत्कां
त्ताजेनामिवर्णिनिवत्तइति॥आत्माकर्त्तृत्वादिधर्मोपेतेनत्तद्दहितोदेहादिकंसंज्ञाय
ज्ञानंदेहादिरूपएवआत्मतिविपरीतज्ञानंएतदुभयंकर्त्तृत्वविषये॥मिथ्याज्ञानंतु
नोगत्वामोक्षविषयमिथ्याज्ञानंमिति।विवक्षितेतन्नज्ञानेकुविधे।संकल्पमभावा
:क्वामाविनिल्पवस्पष्टोहत्ता॥नहेतुविधिःअविद्यात्मासुविदु:खनात्मतुमित्यनुवि
तुखात्मख्यातरविपेतिलक्षणात्॥अनित्येगिरनदरीसमुद्गावेतिसत्वभ्रांतिरका
अशुचौपुत्रभार्यादिशरीरंसुविल्वभ्रांतिद्विदीयादुः॥खेकृषिवाणिज्यादोसुख
त्वभ्रांतिस्तृतीयागौएमिथ्यात्मनिपुत्रभार्यादौ॥अनात्मयादौअनात्मविनु

राम० १०१

ख्यात्मभ्रांतिश्चतुर्थी॥एतेषांसंज्ञायादीनांहेतुरहितोयब्रह्मतत्वावरकमज्ञानंतदा
सनाच॥तत्त्वज्ञानंयोगिनः।परमहंसाभ्यसनवाक्यार्थबोधेनविवेकतपासनानु
योगांभ्यासेनिवृत्ता।उदाहृतापांदिज्ञानंमावत्तानेनिवर्त्तेपिसुसंनासाघनाघ
याहवंभवहार:।योगिनोभ्रांतिहेतुरहितात्॥कुतःसंज्ञायादीननुवर्त्तेरिन
तमेवमनुवत्वमावमभिप्रेत्यानेनहेतुद्वयेनयोगिनिसंनिवृत्तहेतुकं॥सत्या
मपिभ्रांतौनतत्रासनामिवृत्तनिवृत्तेविनाभ्रमावात्।निमित्वहेतुमं॥तन्निर्लि
प्तत्वेहेतुमाह।तल्लिप्तबोधइतिसर्वनामात्मात्मसिद्धापर्यवाचीनछूत्रेत्रसर्वविदं
तत्रसिद्धंपरमात्मात्वमाचष्टे॥तस्मिन्परमात्मनिमितबोधोयस्ययोगिनः।सोयं
तल्लिप्तबोधः॥योगादिवीजापमंतोकुर्वंतितिस्युतिमतुसस्यचित्तविक्षेपात
योगेनपरिकृत्यनेरंतर्येणपरमात्मविषयामेवमतोकरोति॥अतोबोधस्य

भिन्नत्वावबोधविनाशयोरज्ञानतदाभानयोर्निवृत्तिः भिन्नेऽर्थः ॥ बुधमात्मस्वपरमात्म
नं स्वर्किं केश्वरवन्नष्टस्त्रैत्वशंकां वारयति ॥ न स्वयमे । वावस्थितिरिति हि दंतत्वेऽप
रं ब्रह्मासमीति स्वयं न स्वस्मादन्यदित्यवं अभिध्यं तस्य योगिनो वास्थितिरित्यर्थः ॥ तस्य
योगिनो नु मतमकारं दर्शयति ॥ तं चांतमचलमद्वयानंदविज्ञानघनएवास्मि तत्
देवमपरमं धामेति ॥ तत्त्वत्वादिप्रपञ्चबोधकितीयामव्यमार्थेदृष्टाम् । परमा
त्मा नु शांतः ॥ क्रोधादिविक्षेपरहितः अजंचलोगमनादिक्रियारहितः ॥ स्वगतस
जातीयविजातीयभेदशून्यः सच्चिदानंदैकरसो स एवाहमस्मि तदेवं ब्रह्म
तत्त्वमस्य योगिनः परमं धाम वास्तवस्वरूपं यत्त्वे तत्त्वं कर्न्दलमोन्तनादि नयु
क्तं एतस्य मायाकल्पितत्वात् । योगिनः पूर्वाश्रमप्रसिद्धाश्चावार्याः पितृत्वा
त्रास्थः कर्मणिः अजाजन्मः शिखायज्ञोपवीतसंध्यावंदनादि तेन पावंदि

त्वमारोप्य आमोदरात् उत्तरानं आमोऽरात् पुनस्तस्य योगिनस्तदामोदात्प्रयुक्तये
योगिनो वर्तमानं निश्चयं दर्शयति ॥ तदेवेच शिखा तदेवोपवीतं च परमात्मानो
रेकत्वज्ञानेन । तयोर्भेद एव विभिन्नः सा संध्येति ॥ यच्छिदांतवेद्यस्वपरब्रह्मणो
ज्ञानं तदेव कर्मणि भूतबाह्य शिखायज्ञोपवीतस्थानीयत्वात्स्वमंत्रमग्नलस्य
गोदकमंगे मूलैव कारामां समुच्चायेन शिखायोगसाध्यैः कर्मभिः तत्त्वं यत्
स्वर्गादिसुखं तत्सर्वं ब्रह्मज्ञानेनैव लभ्यते ॥ विषयानंदस्य सर्वस्य ब्रह्मानंदलेश
त्वात् ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः । एतदेवाभिप्रे
त्याथर्वणिकाब्रह्मोपनिषद्यामनंति ॥ सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बु
धः । यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥ सूचनात्सूत्रमित्याहुः सूत्रं नाम
परं पदं ॥ तत्सूत्रं विदितं येन स विप्रो वेदपारगः । येन सर्वमिदं प्रोतं सूत्रे मणिग

ण्डाइव तन्तुसूत्रं धारयेद्योगी योगवित्तत्त्वदर्शिवान् ॥ बहिःसूत्रं त्यजेद्विद्वान् योगमु
त्तममास्थितः ॥ ब्रह्मभावमिदं सूत्रं धारयेद्यः सचेतनः ॥ धारणात्तस्य सूत्रस्य नोच्छिष्टो
नाशुचिर्भवेत् ॥ सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीतिनां ॥ ते वै सूत्रविदो लोके ते च य
ज्ञोपवीतिनां ॥ ज्ञानशिखिनो निष्ठा ज्ञानयज्ञोपवीतिनः ॥ ज्ञानमेव परं तेषां पवित्रं ज्ञान
मुच्यते ॥ अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ॥ स शिखीत्युच्यते विद्वान्नेत
रे केशधारिणः ॥ कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः ॥ तैर्विधार्यमिदं सूत्रं क्रि
याङ्गं तद्धि वै स्मृतं ॥ शिखा ज्ञानमयी यस्य चोपवीतं च तन्मयं ॥ ब्राह्मण्यं सकलं त
स्य इति ब्रह्मविदो विदुः ॥ इदं यज्ञोपवीतं तु परमं यत्परायणं ॥ विद्वान्यज्ञोपवीत
स्या संज्ञास्तं यज्ञविनं विदुरिति ॥ तस्माद्योगिनः शिखयज्ञोपवीते विद्येते ॥ तथै
वं संध्याविधिर्वितर्यन्ता स्वगम्यः परमात्मा पश्चाहं प्रत्यगात्मा जीवात्मा तयोरे

कत्वतामेव महावाक्यजन्येन धीवृत्तिभेदो विशेषेण एतन्मयस्वं तु तन्मीत्मतुरयोऽन्य
स्य विशेषपेयमेकत्वबुद्धिः सेयमुभयोरात्मनोः संधौ जायमानत्वात् संध्येत्युच्य
ते ॥ अहोरात्रयोः संधावनुष्ठेया क्रिया यथा संध्या न तद्वत् ॥ एवं च नाति योगीश्व
राजे इदं वाक्यमाह पितुः का कः कोऽयं मार्ग इति पृष्टस्याप्यस्वपुत्रमित्रादिनोत्तर
मुक्तं ॥ काऽस्थितिरिसेतस्य महापुरुष इत्यादिना संक्षिप्योत्तरमुक्तं ॥ संन्यास
विपरीतत्वादिना तदेव प्रपंचेदानीमुपसंहरति ॥ सर्वांश्च कामान्परित्यज्या
द्वैते परमे स्थितिरिति ॥ क्रोधलोभादीनां कामपूर्वकत्वात्कामपरीत्यागे न चित्त
दोषासत्वाज्जयंते ॥ तदेवाभिप्रेत्य वाजसनेयिन आमनंति ॥ अथो खल्वाहुः काम
मय एवायं पुरुष इति ॥ अतो निःशेषकामसंयोगित्वे तस्याद्वैते निर्विघ्ना स्थितिरुप
घते ॥ ननु दंडग्रहणविधिबलेनोपिताविविदिषासंन्यासिनो योगिनं दंड इत्येतं

जीवन० १०४

प्रदं नाम तु संगच्छेत्तासां कोपाद्॥ ज्ञानदंडो धृतो येन एकदंडी स उच्यते। काष्ठदंडो धृ-
तो येन सर्वाशी ज्ञानवर्जितः॥ स याति नरकान्घोरान्महारौरवसंज्ञकान्॥ तितिक्षाज्ञान-
वैराग्यशमादिगुणवर्जितः। भिक्षामात्रेण यो जीवेत्स पापी यतिवृत्तिहा॥ इदमंत-
रं ज्ञात्वा स परमहंस इति॥ परमहंसस्य योयमेकदंडः स द्विविधः ज्ञानदंडः काष्ठ-
दंडश्चेति॥ यथा त्रिदंडिनो वाग्दंडो मनोदंडः कायदंडश्चेति॥ द्विविधेतद्दंडद्वयो
मनुना स्मर्यते॥ वाग्दंडोथ मनोदंडः कर्मदंडस्तथैव च॥ यस्यैते नियता बुद्धौ स
त्रिदंडीति चोच्यते॥ त्रिदंडमेवं निक्षिप्य सर्वभूतेषु मानवः। कामक्रोधौ तु संय-
म्य ततः सिद्धिं नियच्छतीति॥ तेषां स्वरूपं दक्षः स्मरति। वाग्दंडोथ मनोदंडः क-
र्मदंडस्तथैव च। यस्यैते नियता दंडाः त्रिदंडीति स उच्यते॥ वाग्दंडे मौनमा-
तिष्ठेत्कर्मदंडे त्वनीहतां। मानसस्य च दंडस्य प्राणायामो विधीयते॥ कर्मदं-

राम० १०४

स्य भोजनमिति॥ समस्तं तरपाव॥ ईदृशं च त्रिदंडत्वं परमहं यथा व्यसि॥ तदेतदभि-
प्रेत्य पितामहः स्मरति॥ यतिः परमहंसस्तु तुर्याख्यः श्रुतिचोदितः। यमैश्च नियमै-
र्युक्तो विष्णुरूपी त्रिदंडभृदिति॥ एवं सति मोनादीनां वागादिदमनहेतुत्वात्तथैव ज्ञा-
नतत्कार्यदमनहेतोर्ज्ञानस्य दंडत्वं॥ अयं ज्ञानदंडो येन परमहंसेन धृतस्स एव मुख्य
एकदंडी स उच्यते॥ मानसस्य ज्ञानदंडस्य कदाचिच्चित्तविक्षेपेणापि स्मृतिः॥ प्रसक्ते-
ति तन्निवारणार्थं स्मारकं काष्ठदंडो ध्रियते॥ तदेतादृशात्यर्थरहस्यमबुद्ध्वा वेषमा-
त्रेण पुरुषार्थसिद्धिमभिप्रेत्य काष्ठदंडो येन परमहंसेन धृतः॥ स पुरुषो बहु-
विधयातनोपेतान्घोरान्महारौरवसंज्ञकान्नरकान्प्राप्नोति॥ तत्र हेतुरुच्य-
ते॥ परमहंसवेषं दृष्ट्वा ज्ञानित्वभ्रान्त्या सर्वे जनाः॥ स्वस्वगृहे तं भोजयंति॥ अ-
यं च भिक्षालंपटो बहुभोजकेषु मत्त्वा समश्नातीति तेन स वायं प्राप्नोति यानि

तेनात्र दोषेण मस्करी चतुर्थेऽपि चरेद्भैक्षमित्यादिस्मृतिकालितानि तानि विषयाणि
अयं च तानर्थान्नहतितिष्ठुको नरकः ॥ अत एव तानन्दी तस्य पद्मैर्भिक्षानियममाह ॥
मनुः ॥ न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ॥ नानुशासनवादाभ्यां भिक्षां लि
प्सेत कर्हिचित् ॥ एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे ॥ भैक्षे प्रसक्तो हि यतिर्विष
येष्वपि सज्जतीति ॥ नानाभ्यासिनं प्रतिलेवं समर्थनं एकवारं वा दिनं भुंजीत परस्परमद्द
सकः ॥ येन केन प्रकारेण तावता मासी मसी मवेस्सदेति ॥ एवं नातीतान दंडकाष्ठ
दंडयोर्यदेनारतस्य मुख्यमाधममत्तपंचदिदमवग मोक्षमें तावनदंडं पोधारय ॥
तिस एव मुख्यः परमहंसस्तु मुख्यगं तत्त्वं ॥ अन्वमुख्य परमहंसस्य संन्यासो मान्ने
ते काष्ठदंडनिंबधनरतरानुवर्षास्ववांकाद्याम्यान्कांक्षाह ॥ आचार्यान्वरो नतनम
स्कारो नस्वधाकारो न चिंदानं कस्कति यदृच्छिको भवति भुनीवाहनं नाविस

र्जनं न मन्त्रं न ध्यानं नोपासनं च न लक्ष्यं नालक्ष्यं न पृथक् नाहं न त्वं सर्वं चानिके
तस्थितिरेव स भिक्षुः ॥ सौवर्णादीनां नैव परिग्रहेत् ॥ तल्लोकं नावलोकयेच्चेति ॥
आनाविः कृतां एवांव रक्षत्व मान्धारनं पस्यासावानां वरः ॥ मनुः स्मृतिवचनं ॥
जीर्णकौपीनं मध्ये नाभेः परिधायैकमंबरं ॥ द्वितीयमंतरं वासः परिधाय गृहान्तरे दि
तिनदिस्म यो गिरिविषयं ॥ अत एव हृदं नन्वन मुख्यो स्तोतुकं पंचमस्य सेतरं ॥ या
मवेत्सर्वसंन्यासिनस्त्यागो धर्मतायदि ॥ तस्मै प्रणाममवक्त्रीत्युच्यते ॥ तस्माप्य स्वविष
यत्वान्नस्य नमस्कारकर्तव्योऽस्ति ॥ अत एव ब्राह्मणलक्षणे निर्नमस्कारमस्तुति
मिसु साहते ॥ यथा प्रयागादितीर्थेषु श्रद्धाजाज्ञातस्यामस्वधाकारो निषिध्यते एवं
त्र भिगर्वत्वादिवाक्ये परः कृतमात्मानिदं भाक्तो भोनिवारितः ॥ अत तु स्वकर्तके मति
विषये निराशितविपिने व्याद्दच्छिकं निर्बंधरहितस्य ॥ न कृद्धि दर्पमवसारेनिवे

धं कुर्यात् ॥ यस्त्वेकदेवहृनायां निर्बंधः स्मर्यते वरुणायां निर्बंधः स्मर्यते ॥ भिक्षाटनं जप
ः शौचं स्नानं ध्यानं सुरार्चनं ॥ कर्तव्यानि षडेतानि सर्वथा नृपदंडवदिति ॥ तस्य योगि
विषयत्वमभिप्रेत्य नावादरमिति आम्नाने ॥ सकृत्स्मरणं ध्याननैरंतर्येणानुस्म
रणमुपासनमिति तयोर्भेदः ॥ यथा योगिनस्त्रिदंडादिलौकिकव्यवहाराभावः ॥
यथा वादेवहृनादिधर्मशास्त्रव्यवहाराभावः ॥ तथा लक्ष्यत्वादि ज्ञानशास्त्रव्यव
हारोऽपि नास्ति ॥ यः कोऽपि चेतनस्तमसि तदिदं तत्त्वमसीति वाक्ये त्वंपदेन लक्ष्यं देहादि
व्यतिरिक्तं चैतन्यं लक्ष्यं न भवति ॥ किंतु वाक्यं तच्छ्रवात्वं तत्पदलक्ष्यपरमात्मपृथकू ॥ तल्ल
क्ष्यं च तत्पदार्थात्पृथक् ॥ स्वदेहं तिष्ठे वा तद्वार्थो द्विमिति व्यवहारः ॥ परदेहस्थि
तत्पदार्थः ॥ त्वमिति व्यवहारः ॥ लक्ष्यं वा क्षमिस्तु मयाविधचैतन्योपेतमस्य ज्ञातुं
[illegible]ज्ञ्यर्थमिति व्यवहारादिमिस्तेनाद्ध्योविकल्पो न कोऽपि योगी नास्ति ॥ तदि

यस्मिंस्तस्य ब्रह्मणि विश्रांततात् ॥ अत एव समाधिस्फुरणमि केवलस्थिरेव ॥ यदि नियत
भिक्षासार्थकं चिन्मयं संपादयेत् तदानीं तस्मिन्न समत्वे सति तदानीं यद्वा निर्वाहो वि
चेकिश्चिष्वते ॥ एतदेवाभिप्रेत्य गोडपादाचार्या आहुः नस्तुतिर्न नमस्कारो न स्वधा
कार एव च चलाचलनिकेतश्च यतिर्यादृच्छिको भवेदिति ॥ यथाशमनेनपरिगृहीतव्य
ः तथा सौवर्णरजतादीनां भक्षाचमनादिपात्राणामेकमपि न गृह्णीयात् ॥ त
दाह यम ॥ हिरण्मयानि पात्राणि कृष्णायसमयानि च ॥ यतीनां तान्यपात्राणि
वर्जयेत्तानि भिक्षुकः इति ॥ मनुरपि ॥ अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि
च ॥ तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ अलाबुं दारुपात्रं च मृन्मयं वै
णवं तथा ॥ एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीदिति ॥ बोधायनोऽपि स्वयमा
हृतपर्णेषु स्वयंशीर्णेषु वा भुंजीत न वृक्षात्कुशंजन्तोर्व यतीव ॥ आपद्य

पितकं श्रेशुभलाभीकांस्यभोजनं ॥ सौवर्णराजते कांस्यमये वा पुत्रपुत्रीसयोग्ये दि
॥ तथा लोकजनं शिष्यवर्गं न गृह्णीयात् ॥ तदाह मनुः एक एव चरेन्नित्यं सिद्ध्यर्थम
सहायकः ॥ सिद्धिमेकस्य संपश्यन् न जहाति न हीयते इति मेधातिथिरपि श्रा
सनपात्रलोपश्च संचयस्य शिष्यग्रहः दिवास्वापो रथ्या यातेर्बंधकरा लिप
द् ॥ एकाहांतपरतो ग्रामे पंचाहात्परतः पुरे ॥ वर्षाभ्यो स्थानमासनं तद्दूस
हतं ॥ उक्ता लोभादिपापानामेकैकस्याप्यसंग्रहः ॥ भिक्षोर्मैक्ष्यमुत्सृज्य पिपात्र
लोपः समुच्यते ॥ जलदानस्यतुंदेडादेर्द्वितीयस्य परिग्रहः ॥ कालांतरोपभोगार्थ
संचयः समपरिग्रहः ॥ कालांतरोपभोगार्थं संचयः परिकीर्तितः ॥ भुक्तशेषालाभ
हजार्थं परोर्थं वा परिग्रहः ॥ शिष्याणां तु नकारण्यात् संमतेयः ॥ शिष्यसंग्रहः
॥ विघातीनां प्रकाशत्वाद्विघातविरुच्यते ॥ विघात्मासे प्रमादोयः ॥ स दिवास्व

प उच्यते ॥ लोकशिष्यजनं नरूपं न गृह्णीयादात्येतावदेव न भवति किंतु तस्य लोक
दर्शनमपि न कुर्यात् ॥ तस्य बंधहेतुत्वात् ॥ न चेत्सनेनानंदपिस्मृति लिपिवि
न कुर्यादित्यभिप्रेतं तच्छुविधिविद्धं ॥ मेधातिथिर्दर्शयति ॥ स्थावरं जंगमं बीजं तैज
सं विषमायुधं ॥ षडेतानि न गृह्णीयात् यतिर्मूत्रपुरीषवत् ॥ रसायनं क्रिया
चारं ज्योतिषं क्रयविक्रयं ॥ विविधानि च शिल्पानि वर्जयेत्परदारवदिति ॥ यो
गिनो लौकिकवैदिककर्मव्यापारगता क्रियाभिबाधकानि संति ॥ तेषां वर्जनेन सिद्धि
तां अपवर्गो नरामा मत्वं तद्बाधकं प्रदर्शनिवर्जनमाह ॥ आबाधकः क इति वेदा
बाधकोऽस्त्येव यस्मात् हि क्षुद्रहिरण्यं रसेन दृष्टं चेत् ॥ सत्रस्य लाभ एव यस्मात् हि क्षु
द्रहिरण्यं रसेन स्पृष्टं चेन्नयोलके सो भवेत् यस्मात् हि क्षुद्रहिरण्यं रसेन गृहीतं च
तत्सआत्मघाती भवेत् तस्मात् दृष्टं च न स्पृष्टं च न ग्राह्यं चेति आकारो व्याप्यार्थ

जीवनं०
१०८

आईषदभिव्याप्ताविसम्भिद्दिन्नत्वात् ॥ अभिव्याप्तौ बाधकौ त्वं न बाधकः ॥ तस्य स
म्यवं प्रतिज्ञाय हिरण्यस्य तथाविधबाधकत्वमुक्तम् ॥ एतेनाभिलाषयुक्तेनादरेण हि
रण्यं यदि दृष्टं स्यात्तदानीं तद्द्रष्टा भिक्षुर्ब्रह्महा भवेत् ॥ हिरण्यास्कन्दात्संपादनेर
क्षणयोः सर्वदा श्रवणमात्रत्वेऽप्यर्थपरिहाराय प्रपंचमिथ्यात्वप्रतिपादकाद्वै
तशास्त्रदर्शित्वात्तत्त्वमवलंबते ॥ ततः ॥ शास्त्रासिद्ध्यद्वितीयं ब्रह्म तेन भिक्षुणा
दृष्टमिव भवति तस्मात् सो ब्रह्महा भवेत् ॥ तथा च स्मर्यते ॥ ब्रह्म नास्तीति यो ब्रूया
द्द्वेष्टि ब्रह्मविदं च यः ॥ अभूतं ब्रह्मवादी च त्रयस्ते ब्रह्मघातका इति ॥ अभिलाषपूर्व
कं हिरण्यं स्पृष्टं चेत्तदा स भिक्षुः पतितत्वात्पौल्कसो म्लेच्छसदृशो भवेत्तालि
तं च स्मर्यते ॥ एतत्स सोऽप्यवं भिक्षुर्यस्य भिक्षोर्दर्शनं भवेत् ॥ धीपूर्वं रेतउत्सर्गोऽस्य
संग्रह एव चेति ॥ अभिलाषपुरःसरं हिरण्यं गृहीतं चेत्तदा स भिक्षुर्देहिपति

राम०
१०८

साक्षिणमसंगं विदित्वा तद्दर्शनात् ॥ असंगत्वमपोह्य स्वात्मनो हिरण्यादिस्वं प्रति
भोक्तृत्वेन प्रतिपन्नत्वात् ॥ तस्मादस्यान्यथाप्रतिपत्तेः सर्वपापकृत्पतत्वं स्मर्यते ॥ योऽन्य
थासंतमात्मानमन्यथा प्रतिपद्यते ॥ किं तेन न कृतं पापं चौरेणात्मापहारिणेति ॥ किं चा
त्मघातिनमुखलेवोनधिरहितावकुविधडखनारतालोकाः श्रूयन्ते ॥ असुर्या ना
म ते लोका अंधेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ इति दृष्टं चे
त्स्वेनकारेण श्रुतं चेति ॥ समुच्चीयते ॥ स्पृष्टं चेत्स्वनेन न कथितेत्वेति समुच्चयः ॥ ग्र
हं चेत्स्वनेनेत्यवं कृतं चेति समुच्चयः ॥ दर्शनस्पर्शग्रहणावदभिलाषपूर्वकाद्धिर
ण्यवर्जनं श्रवणानुपाकथनं तदापक्वयादिकमवदाराज्ञपि भक्षणाघदेनवर
स्पर्शः ॥ यस्य साभिलाष ॥ हिरण्यदर्शनादयो दोषकारिणस्तस्माद्भिक्षुणा हि
रण्यदर्शनादयो वर्जनीया इत्यर्थः ॥ हिरण्यवर्जनस्य फलमाह ॥ सर्वे कामा

मनोगतान्यावर्तते दुःखेनोद्विग्नः सुखेष्वि। स्पृहात्यागो रागे सर्वत्र शुभाशुभयो रन
भिस्नेहो न द्वेष्टि न मोदं च सर्वेषामिंद्रियाणां गतिरुपरमते एव आत्मन्येवावस्थो यते
॥ इति पुत्र भार्या गृहक्षेत्रादिकामानां सर्वेषां हिरण्यमूलत्वाद्धिरण्ये परित्यक्ते स
ति ते कामा मनोगता मनस्यवस्थानात्। व्यावर्तते आत्मन्यात्मना भवेति॥ कामनिवृत्तौ प
त्रां कर्मत्रामयोर्दुःखसुखयोरुद्वेगस्पृहे न भवतः॥ एतच्च स्थितप्रज्ञप्रस्तावे प्रपंचि
त। ऐहिकयोः सुखदुःखयोर्न विक्षेपकत्वे सत्यामुष्मिक विषयरागे पिकामो भव
ति। तस्मादकें निस्पृहत्वमामुष्मिके रागाभावो वा युज्यते॥ एवं सति सर्वत्र लोकद्वयेपि
योः शुभाशुभयोरनुकूलप्रतिकूलविषययोस्तयोरनभिस्नेहः॥ ताभ्यां द्वेषराहित्यस्या
प्युपलक्षणं॥ तादृशो विद्वान् शुभकारिणं कंचिदपि पुरुषं न द्वेष्टि॥ शुभकारिणं
च दृष्ट्वा न च मोदं प्राप्नोति॥ द्वेषमोदरहितो यः शुभानात्मन्येव सर्वदावतिष्ठते॥

तस्य सर्वेषामिंद्रियाणां गतिः प्रवृत्तिरुपरमते इंद्रियोपरतौ न कदाचिदपि निर्वि
कल्पसमाधेर्विघ्नो भवति॥ तेषा कास्थितिरिति प्रश्नस्य संक्षेपतिस्तात्पर्यान्यांभ्र
रेर्व मूलं॥ तदेवात्र पुनरपि हिरण्यनिषेधप्रसंगेन स्पष्टीकृतं॥ आत्मा विद्वं स्त्रो
सास्य मुपसंहरति॥ यत्स्वर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवती
ति॥ यद्ब्रह्मवेदांतेष्वखंडानंदैकबोधः परमात्मेति निरूपितं तद्ब्रह्माहमस्मीत्ये
वं सर्वदानुभवन्नयं योगी परमहंसः कृतकृत्यो भवतीति॥ तथा स्मार्यते॥ ज्ञाना
मृतेन तृप्तस्य कृतकृत्यस्य योगिनः॥ नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स
तत्त्ववित्॥ जीवन्मुक्तिविवेकेन बंधध्वांतं निवारयन्॥ पुमर्थमखिलं दे
याद्विद्यातीर्थमहेश्वरः॥ ॥ इति श्री जीवन्मुक्तिविवेकः समाप्तः॥ ॥ ॥

जीवन०
११०

राम०
११०